# JŃĀNAPRASTHĀNA-ŚĀSTRA

OF KĀTYĀYANĪPUTRA

ŚĀNTI BHIKṢU ŚĀSTRĪ

# JÑĀNAPRASTHĀNA-ŚĀSTRA

OF KĀTYĀYAĪNPUTRA

Retranslated into Sanskrit from Chinese Version
of Hiuan Tsang

BY

ŚĀNTI BHIKṢU ŚĀSTRĪ
*Lecturer, Viśvabharati*

With a Foreword By

Dr. P. C. Bagchi M. A., Dr. ès Lettres (Paris), F. A. S.
*Vice-Chancellor and Director of Research Studies, Visvabharati.*

**Vol. I.**
Book One and Two

**VISVABHARATI**
**SANTINIKETAN**
**1955**

*To be had of*
The Visvabharati Publishing Department
6/3 Dwarkanath Tagore Lane, Calcutta

PRICE RUPEES TWELVE

Printed and Published by Kalidas Chatterji,
Santiniketan Press, Santiniketan, Birbhum,

कात्यायनीपुत्रकृतिः

# ज्ञानप्रस्थानम्

नामाभिधर्मशास्त्रम्

शान्तिभिक्षुशास्त्रिणा
विश्वभारत्युपाध्यायेन चीनभाषातः प्रत्युनूदितम्

श्रीप्रबोधचन्द्र बागची—विश्वभारत्युपाचार्यस्य
आमुखेन प्रतिमंडितम्

प्रथमो भागः

प्रथमद्वितायस्कन्धौ

विश्वभारती-शान्तिनिकेतनम्
२४९९ बुद्धाब्दाः

मूल्यं द्वादश रूप्यकाणि

# FOREWORD

It is now a matter of common knowledge that there were more than one collection of Abhidharma texts in Hīnayana canonical literature. The tradition clearly states that the Mahāsāṅghika, the Bahuśrutīya and the Dharmaguptaka schools possessed complete Abhidharmapiṭakas of their own, which are now lost. We possess now two independent Abhidharmapiṭakas, one of the Theravāda school in Pali and the other of the Sarvāstivāda school in Sanskrit.

The Abhidharmapiṭaka of Theravāda consists of seven texts : (i) Dhammasaṅganī, (ii) Vibhaṅga, (iii) Kathāvatthu, (iv) Puggala-paññatti, (v) Dhātukathā, (vi) Yamaka, (vii) Paṭṭhāna. The Sarvāstivāda Abhidharmapiṭaka also consisted of seven texts, (i) Jñanaprasthānaśāstra, (ii) Saṅgītiparyāya-pāda-śāstra, (iii) Prakaraṇapada-śāstra, (iv) Vijñānakāyapāda-śāstra, (v) Dhātu kāyapādasāstra, (vi) Dharmaskandha, (vii) Prājñaptipāds-śāstra. All the original texts have been lost excepting a small fragment of the Saṅgītiparyāya that was discovered from the caves of Bamiyan in Afganistan (S. Lévi, J. AS, 1932). The Sarvāstivāda texts have however been preserved in ancient Chinese translations which were the object of a study by Prof. Takakusu (*J. P. T. S.*, 1904-1905, pp 67 ff.)

For want of easy accessibility to this Chinese translations comparative study of the Abhidharma literature has been so far confined to special problems of the Buddhist psychology and the Chinese translations have been only partially used as in : La Vaallée Poussin *Abhidharmakośa de Vasubandhu*, Bareau—*L' Absolu en philosophie Bouddhique*, Bareau—*Les Sectes Bouddhiques du Petit Vehicle* etc. No full scale attempt has been till now made for retranslating the Sarvāstivāda Abhidharma from its Chinese translation.

Of the seven Sarvāstivāda texts the *Jñānprasthāna-Sāstra* is the principal work and the other six which are called *pāda* are only supplements to it. It is now difficult to know if that

indicates any chronological order. The *Jñānaprasthāna* however is the largest and the most comprehensive text of the collection. It exists in two Chinese translations, one by Gautama Saṅghadeva ( dated 383 ) and the other by Hiuan-Tsang ( middle of the 7th century ).

My esteemed colleague Śri Śānti Bhikṣu Śāstri who is fully equipped for the task has now undertaken the retranslation of Jñānaprasthāna-śāstra with a view to supply a solid basis for the comparative study of the Abhidharma. The stupendous work is to be completed in four volumes. The first consisting of two sections of the original is now being presented to the specialists in the field. It is roughly one-fourth of the whole work. As Hiuan Tsang's translation is more literal than Saṅghadeva's the present retranslation is based on the former. Saṅghadeva's translation has also been used wherever necessary.

It is needless to justify the retranslation into Sanskrit. The Abhidharma texts consist of a chain of technical terms which may be more easily translated into Sanskrit. Translation into Sanskrit does not mean that the original text is being restored. It is something nearer the original which is being presented.

P. C. BAGCHI

# उत्सर्गः

स आत्मवानेष मदीयनाथः
सत्त्वैः समग्रैर्गगनोपमानैः ।
अनेन संतुष्यतु लोकशास्ता
कात्यायनीपुत्रमुखैस्तनूजैः ॥

# उपोद्घातः

## (१) चिकीर्षा

अभिधर्मज्ञानप्रस्थानशास्त्रं यत् प्राचरत् पुरा ।
आर्यकात्यायनीपुत्रप्रोक्तं सुगतशासनं ॥१॥

भारत्यां नामशेषं तच्चीनानुवचने स्थितं ।
यतिष्ये पुनराहर्तुं संस्कृते प्रत्यनूदितं ॥२॥

यस्मिन् महति शास्त्रे ऽभूद् विभाषा सुमहत्तरा ।
यद्धै मतिमतामासीद् निकषो वादवर्तिनां ॥३॥

अभिधर्मामृतं दुग्ध्वा यद् ज्ञानक्षीरसागरं ।
भदन्तघोषको ह्यादौ चक्रे प्रकरणं पुरा ॥४॥

ततः प्रकरणानां वै ववृधे ऽत्र परंपरा ।
उच्चावचान् बहून् ग्रन्थान् चक्रिर आभिधार्मिकाः ॥५॥

सर्वतः सारमादाय कोशं पूर्णं लघुं यतः ।
उद्दिश्य संक्षेपरुचीन् वसुबन्धुर् विनिर्ममे ॥६॥

प्रवर्तमानो भोटेषु सोऽयं सानुचरैः सह ।
अभिधर्म स्नातुकामैर् घत्सरैर् बहुभिः श्र तः ॥७॥

एवं ग्रन्थान्तरासक्तिमतिभिर् यदुपेक्षितं ।
ग्रन्थमात्रेऽपि स्वाध्यायवैधुर्याद् विलयं गतं ॥८॥

## (२) आत्मवैगुण्यं

तदत्र शास्त्रं किल संस्कृते भवेद्
इति स्वचेतः कुरुते मनोरथं ।
ध्रुवं कुमारो ऽक्षरमात्रवैभवो
महाकवीनामनुकर्तुमिच्छति ॥९॥

अहं क्व चाल्पश्रुत एष धीमतां
क्व कार्यमेतद् विपुलश्रुतोचितं ।
ममेहितं वीक्ष्य बुधाः स्मितानना
भवन्तु पंगोरिव धावनश्रमं ॥१०॥

अनेन मार्गेण बुधा उपासितुं
मनो मदीयं भवतः समुत्सुकं ।
तदस्तु हर्षाय मदीयचापलं
न ना शिशोर्दुर्ललिताय कुप्यति ॥११॥

(३) कृतवेदिता

चिकीर्षिते ऽस्मिन् हि खले कपोतवत्
सहायको यो य इहाभवद् मम ।
कृतं हि तं तं प्रति वेदयाम्यहं
कृतज्ञताद्भिर् विशदेन चेतसा ॥१२॥

श्रीमद्वेंकटरमणं सुहृदं चर्चयाम्यहं ।
धन्यवादोपनिषदा चीनवागुद्ग्रहे हितं ॥१३॥

ममानुग्रहीता सर्वप्रथमं विचेष्टिते ऽभूत्
सुहृद् गुरुकल्पो यो ऽस्ति सततं गुणाशयः ।
प्राक्तनचरित्रे बौद्धशासने प्रवीणः परं
यस्य कृतयो ऽत्र सुविख्याता मानराशयः ॥
चीनभारतीयप्रत्नचर्चा यत्र मूर्तिमती
यः प्रवर्तकोऽत्र शोधकार्यस्य सदाशयः ।
विश्वभारतीभृदसौ धन्यवादैरर्च्यतेऽत्र
धन्यः श्रीप्रबोधचन्द्र बागची महाशयः ॥१४॥
[ मनोहरकवित्वं ( मनहरकबित्त ) नाम हिन्दीच्छन्दः ]



(४) याचना

मनोरथस्यास्य ममानुमोदनां
निजानुभावैः कुरुतानघास्तथा ।
यथैधतामेष किशोरशाखिवत्
सुभूमिवर्षातपवातलाभतः ॥१५॥

प्रसादकोपो न विधीयतां बुधैर्
उपेक्षितं स्याद् यदि शब्दशासने ।
न शब्ददृक् श्रोत्रियवज् जनो ऽर्थवान्
मतिर्हि यस्यास्ति सुधर्मशासने ॥१६॥

सुगतसुगतपुत्रैर्यद्यदुक्तं तदर्थो
मम विगुणवचोभिर्मिश्रितो वर्तते ऽत्र ।
तमिह तितउनेव प्रज्ञया सक्तुमर्थं
निपुणमिह पुनन्तः प्राज्ञवन्तो दयन्तां ॥१७॥

# सूची


पृष्ठ

आमुखम् ( Foreword ) डा० प्रबोधचन्द्र बागची—विश्वभारत्युपाचार्यस्य

उत्सर्गः ... ... ✓०

उपोद्घातः ... ... ≡०

संक्षेपाः ( Abbreviations ) ... ... ॥०

**ज्ञानप्रस्थाने प्रथमः स्कन्धः संकीर्णविषयः ... ... १-६१**

- प्रथमो निःश्वासः, लौकिकाग्रधर्मः ... ... १
- द्वितीयो निःश्वासः, ज्ञानम् ... ... १०
- तृतीयो निःश्वासः, पुद्गलः ... ... २१
- चतुर्थो निःश्वासः, स्नेहगौरवम् ... ... २६
- पंचमो निःश्वासः, आह्रीक्यम् ... ... ३८
- षष्ठो निःश्वासः, लक्षणम् ... ... ४४
- सप्तमो निःश्वासः, अनर्थकम् ... ... ४८
- अष्टमो निःश्वासः, चेतना ... ... ५३

**ज्ञानप्रस्थाने द्वितीयः स्कन्धः संयोजनविषयः ... ... ६५-१८५**

- प्रथमो निःश्वासः, अकुशलम् ... ... ६५
- द्वितीयो निःश्वासः, सहचरितम् ... ... ६३
- तृतीयो निःश्वासः, सत्त्वाः ... ... १३२
- चतुर्थो निःश्वासः, दश द्वाराणि ... ... १५०

# संक्षेपाः

( Abbreviations )

[ उत्सर्गतः प्रमाणनिर्देशः पृष्ठाङ्कैः। ग्रन्थो ऽनेकभागश्चेत्, भागांकैः पृष्ठाङ्कैश्च। ]

अं — अङ्गुत्तरनिकायो ( पा० टे० सो०=Pali Text Society's edition )
अ — अट्ठकथा
अमृत — अभिधर्मामृतम्। चीनभाषातः शान्तिभिक्षुणोद्धृतं विश्वभारत्या प्रकाशितं। [ बिन्द्वनुच्छेदयोः संख्यया प्रमाणनिर्देशः ]
इ — इतिवुत्तकं ( पा० टे० सो० )
कथा — कथावत्थुपकरणं ( पा० टे० सो० )
कोश — कोशकारिका ( The Journal of the Bombay Branch, Royal Asiatic Society, N. S , Vol 22, 1946 ) वी० वी० गोखलेसंपादिता। [ कोशस्थानकारिकाभ्यां प्रमाणनिर्देशः ]।
कोशपु — अभिधर्मकोशभाष्यम्—पुसां ( Louis De La Vallèe Pousin ) द्वारा फ्रांसभाषयानूदितं।
गाता — श्रीमद्भगवद्गीता [ अध्यायश्लोकाभ्यां प्रमाणनिर्देशः ]
च — चरियापिटकं ( पा० टे० सो० )
चुनि — चुल्लनिद्देसो ( पा० टे० सो० )
चुल्ल — विनयविटकचुल्लवग्गो ( Oldenberg's edition )
जातक — जातकट्ठकथा ( Fausboll's edition )
टि — टिप्पण
टी — टीका
तिप — तिकपट्ठानं पञ्हावारविभंगो। धर्मानन्दकोसम्बिकृतनवनीतटीकया सनाथे अभिधम्मत्थसंगहे परिशिष्टरूपेण निवेशितः। [ अनुच्छेदैः प्रमाणनिर्देशः ]।
थेर — थेरगाथा ( पा० टे० सो० ) [ गाथाङ्कैः प्रमाणनिर्देशः ]
थेरी — थेरीगाथा ( पा० टे० सो० ) [ गाथाङ्कैः प्रमाणनिर्देशः ]
दी — दीघनिकायो ( पा० टे० सो० )
दीपिका — विसुद्धिमग्गदीपिका। धर्मानन्दकोसम्बिसंस्कृता वाराणसीपरिसरे सारनाथस्थया महाबोधिसभया प्रकाशिता, १९४३ ख्रीष्टाब्दः [ परिच्छेदानुच्छेदाभ्यां प्रमाणनिर्देशः ]।
ध — धम्मपदं [ गाथांकैः प्रमाणनिर्देशः ]
धम्म — धम्मसंगणि ( Bhandarkar Oriental Series, Poona 1940 ) [ अनुच्छेदैः प्रमाणनिर्देशः ]।
धातु — धातुकथा ( पा० टे० सो० )
न्या — न्यायसूत्रं वात्स्यायनभाष्यसमेतं। [ अध्याय-पाद-सूत्रैः प्रमाणनिर्देशः ]



पटि — पटिसंभिदामग्गो ( पा० टे० सो० )
पट्ठान — पट्ठानप्रकरणं
परि — विनयपिटकपरिवारो ( Oldenberg's edition )
पाचि — विनयपिटकपाचित्तियादि ( Olderberg's edition )
पारा — विनयविटकपाराजिका ( Oldenberg's edition )
पुग्गल — पुग्गलपञ्ञत्ति ( पा० टे० सो० )
पेत — पेतवत्थु ( पा० टे० सो० )
भा — भाष्यम्
मं — न्यायमंजरी। वाराणस्यां चौखम्बासंस्कृतपुस्तकमालायां प्रकाशिता।
म — मज्झिमनिकायो ( पा० टे० सो० )
मनि — महानिद्देसो ( पा० टे० सो० )
महा — विनयपिटकमहावग्गो ( Oldenberg's edition )
मा — माध्यमिककारिका, अथवा, मध्यमककारिका [ परिच्छेदकारिकाभ्यां प्रमाणनिर्देशः ]।
मावृ — माध्यमिकवृत्तिः, अथवा, मध्यमकवृत्तिः Ed. Louis dela Vallèe Poussin, Bibliotheca Buddhica iv.
मि — मिलिन्दपञ्हो ( Trenckner's edition )
यथारुतं — शब्दानुसृतार्थानुवचनं ( Literal )
वि — विसुद्धिमग्गो। धर्मानन्दकोसम्बिसंस्कृतो बंबईनगरे भारतीयविद्याभवनेन देवनागराक्षरैः प्रकाशितः। [ परिच्छेदानुच्छेदाभ्यां प्रमाणनिर्देशः ]
विभंग — विभंगपकरणं ( पा० टे० सो० )
विमान — विमानवत्थु ( पा० टे० सो० )
वृ — वृत्तिः
सं — संयुक्तनिकायो ( पा० टे० सो० )
संगह — अभिधम्मत्थसंगहो। धर्मानन्दकोसम्बिकृतनवनीतटीकसमेतः, वाराणस्यां सारनाथस्थया महाबोधिसभया प्रकाशितः।
समुच्चय — अभिधर्मसमुच्चयः। प्रह्लादप्रधानेन संस्कृतः, विश्वभारत्या प्रकाशितः।
सु — सुत्तनिपातो ( पा० टे० सो० ) [ गाथांकैः प्रमाणनिर्देशः ]
स्फु — स्फुटार्था नामाभिधर्मकोशव्याख्या जापानदेशे रोमनाक्षरैः प्रकाशिता।

आर्यकात्यायनीपुत्रकृतिः

# ज्ञानप्रस्थानम्

## प्रथमः स्कन्धः

आर्यकात्यायनीपुत्रप्रणीतं

# ज्ञानप्रस्थानम्

## नामाभिधर्मशास्त्रम्

[ शुआन्-चुआङ्कृतचीनभाषान्तरात्[1] संस्कृते शांतिभिक्षुणा प्रत्यनूदितम् ]

### प्रथमे संकीर्णस्कंधे[2]

## प्रथमो निःश्वासः

### लौकिकाग्रधर्मः

#### उद्देशः

१लौकिकाग्रधर्मः सप्त २द्वे मूर्धा ३ऊष्मा ४ऽथकायदृक् ।
५दशैकं दृग्ग्रहहाने इतिवर्गविवक्षितं ॥[3]

---

1. Taisho No. 1544, Pp. 918-1031.

चीनत्रिपिटकेऽष्टग्रन्थो नाम ज्ञानप्रस्थानस्यान्योऽप्यस्ति ग्रन्थः संघदेवकृतानुवादः [ Taisho No. 1543, Pp. 771-917 ]। शुआन्-चुआङ्संघदेवग्रन्थयोरनुवादकर्तृभेदमूलको भाषाभेदः स्वाभाविक एव । परं संदर्भ ( text ) भेदः किंमूलकः ? मन्ये ज्ञानप्रस्थानस्यास्तामध्येतृसंप्रदायभेदेन पाठसंनिकर्षविप्रकर्षौ । तत्रैकः पाठः शुआन्-चुआङ्ग्रन्थे दृश्यते । अन्यस्तु संघदेवग्रन्थे । यतो विभाषा शुआन्-चुआङ्ग्रन्थमनूद्य विवृणोति ततः शुआन्-चुआङ्ग्रन्थो विभाषासहितः सर्वास्तिवादिनां तत्त्वाधिगमाय पर्याप्त इति स एवानूद्यते । संघदेवग्रन्थोऽपि पाठविवेचनाय तत्र तत्रोपकारी । ग्रन्थारंभे तत्र समग्रस्याष्टग्रन्थस्योद्देशो दृश्यते । तथा हि । सकीर्णं, संयोजनं, ज्ञानं, कर्म, चतुर्महाभूतानि, इन्द्रियं, समाधिः, दृष्टिः ।

2. इतः परं संघदेवग्रन्थे सकलस्य प्रथमस्कन्धस्योद्देशः । प्रथमस्कन्धान्तर्गतनिःश्वासशीर्षकाणि प्रथमस्कन्धोद्देशतयेह संकलितानि ।

3. लौकिकाग्रधर्मः सप्तकोटिषु विभज्य निर्दिष्टः । मूर्धधर्मौ द्वयोः कोट्योः । ऊष्मधर्म एकस्यां कोट्यां । सत्कायदृष्टिरेकस्यां कोट्यां । दृष्टिसंग्रहदृष्टिप्रहाणे एकादशकोटिषु विभज्य निर्दिष्टे। इतिवर्गविवक्षितमिति तात्पर्यानुवचनं ।

एतस्य संक्षिप्तस्योद्देशस्य स्थाने संघदेवग्रन्थेऽतिविस्तृतोद्देशो दृश्यते । वस्तुतस्तु स केवलं निःश्वासेऽस्मिन् याः प्रश्नरूपा मातृकास्तासां सर्वासामेकत्रीकरणमेव । इयमेवोद्देशपद्धतिरन्येषु निःश्वासेष्वपि द्रष्टव्या ।

# १. लौकिकाग्रधर्मः

## (१) लौकिकाग्रधर्मलक्षणं

लौकिकाग्रधर्मः कतमः । प्रतिवचनं[4] । चित्तचैतसिकधर्माः समनन्तराः सम्यक्त्वन्यामम्[5] अवक्रान्ता लौकिकाग्रधर्म इति । अपर आह । पंचेन्द्रियाणि समनन्तराणि सम्यक्त्वन्याममवक्रान्तानि लौकिकाग्रधर्म इति । अत्रार्थे तु चित्तचैतसिकधर्माः समनन्तराः सम्यक्त्वन्याममवक्रान्ता लौकिकाग्रधर्म इति ॥

## (२) लौकिकाग्रधर्मनिर्वचनं

कस्मादभिधीयते लौकिकाग्रधर्म इति । प्रतिवचनं । चित्तचैतसिकधर्मा एते भवन्त्यन्येषु लौकिकेषु धर्मेषु वराः प्रकृष्टा ज्येष्ठाः प्रधाना उत्तराः परमा इत्यभाधीयते लौकिकाग्रधर्म इति । पुनः खल्वेवमेते चित्तचैतसिकधर्माः समनन्तरा विहाय पृथग्जनत्वं प्राप्नुवन्त्यार्यत्वं विहाय मिथ्यात्वं प्राप्नुवन्ति सम्यक्त्वं प्रतिबलाश्च सम्यक्त्वन्यामावक्रान्तये इत्यभिधानं लौकिकाग्रधर्म इति ॥

---

4. संस्कृतशास्त्रग्रन्थानां शैलीपरिशीलनेन ज्ञायते यत "प्रतिवचनम्" इत्येतत्पदं मूले नासीत् । इदं तु स्पष्टप्रतिपत्त्यर्थं मन्ये ऽनुवादकेन प्रक्षिप्तं । प्रत्यनुवादे तु निराकरणीयमपीदं यन्नाहं निराकरोमि, तत्केवलं प्रत्यनुवादस्य चीनानुवादेन सह सामीप्यतरं ख्यापयितुं । समग्रो हि ग्रन्थः प्रश्नोत्तरमयः । उत्तरकथनात् पूर्वं सर्वत्रानुवादे प्रतिवचनमिति पदं दृश्यते । प्रतिवचनपदं मूले नासीदिति स्वसंमतस्य ज्ञापनं दिष्ट्या परत्र शब्दशोऽनूदितं सुरक्षितं ज्ञानप्रस्थानवचनमेव । तथा हि । बुद्धवचनं कुशलं वक्तव्यं, अव्याकृतं वक्तव्यं । स्यात् कुशलं । स्याद् अव्याकृतं । [ स्फु ५२ ] नह्यत्रोत्तरात्पूर्वं प्रतिवचनपदमस्ति ।

5. सम्यक्त्वन्यामः, अथवा, सम्यक्त्वनियामः । दृश्यते इको लोपो यणि । तद्यथा । पर्याण-व्यामस्वर्णादिपदानि [ Whitney : Sanskrit Grammar, 233a ] । विमार्गान्न सम्यक्त्वे नियमयति निवेशयतीति निर्वचनाद् आर्यमार्गस्यैव नामान्तरं सम्यक्त्वन्याम इति । तद्यथा ।

> सद्धो सुत्वा नियामदस्सी वग्गगतेसु न वग्गसारि धीरो ।
> लोभं दोसं विनेय्य पटिघं सम्मा सो लोके परिब्बजेय्य ॥ [ सु ३७१ ]

इमां गाथां विवृण्वन् नियामदस्सीपदमुद्दिश्य अट्ठकथाकार आह—सम्मत्तनियामभूतस्स मग्गस्स दस्सावी =सम्यक्त्वन्यामभूतस्य मार्गस्य दर्शी—[ सुअ ३६५ ] इति ।



## (३) लौकिकाग्रधर्मे धातुप्रतिसंयोगः

लौकिकाग्रधर्मो वक्तव्यः किं कामधातुप्रतिसंयुक्तो रूपधातुप्रतिसंयुक्त आरूप्यधातुप्रतिसंयुक्त इति । प्रतिवचनं । वक्तव्यो रूपधातुप्रतिसंयुक्तः ॥ किमुपादायायं धर्मो न वक्तव्यः कामधातुप्रतिसंयुक्तः । प्रतिवचनं । न कामधातु-मार्गेण शक्यं नीवरणप्रहाणं पर्यवस्थानाभिभवः कामधातुकपर्यवस्थानापुनरुद्भावनं । रूपधातुमार्गेण तु शक्यं नीवरणप्रहाणं पर्यवस्थानाभिभवः कामधातुकपर्यवस्थाना-पुनरुद्भावनं । यदि कामधातुमार्गेण शक्यं स्यात् नीवरणप्रहाणं पर्यवस्थानाभिभवः कामधातुकपर्यवस्थानापुनरुद्भावनं । एवं तर्हि लौकिकाग्रधर्मो वक्तव्यः कामधातु-प्रतिसंयुक्तः । परं न कामधातुमार्गेण शक्यं नीवरणप्रहाणं पर्यवस्थानाभिभवः कामधातुकपर्यवस्थानापुनरुद्भावनं । रूपधातुमार्गेण तु शक्यं नीवरणप्रहाणं पर्यवस्थानाभिभवः कामधातुपर्यवस्थानापुनरुद्भावनं । तस्माल् लौकिकाग्रधर्मो न वक्तव्यः कामधातुप्रतिसंयुक्तः ॥ किमुपादायायं धर्मो न वक्तव्य आरूप्यधातु प्रतिसंयुक्तः । प्रतिवचनं । सम्यक्त्वन्यामावक्रान्तस्य प्रथमोऽभिसमयः कामधातुकं दुःखं दुःखमिति । पश्चात् सहाभिसमयो रूपारूप्यधातुकं दुःखं दुःखमिति । आर्यमार्गोदये प्रथमं [ 918b ] कामधातुवस्तुविवेकः पश्चाद् रूपारूप्यधातुवस्तुसह-विवेकः । यदि सम्यक्त्वन्यामावक्रान्तस्य भवेत् प्रथमोऽभिसमय आरूप्यधातुकं दुःखं दुःखमिति । पश्चात् सहाभिसमयः कामरूपधातुकं दुःखं दुःखमिति । आर्यमार्गोदये भवेत्प्रथममारूप्यधातुवस्तुविवेकः । पश्चात् कामरूपधातुवस्तुसह-विवेकः । एवं तर्हि लौकिकाग्रधर्मो वक्तव्य आरूप्यधातुप्रतिसंयुक्तः । परं सम्यक्त्वन्यामावक्रान्तस्य प्रथमोऽभिसमयः कामधातुकं दुःखं दुःखमिति । पश्चात् सहाभिसमयो रूपारूप्यधातुकं दुःखं दुःखमिति । आर्यमार्गोदये प्रथमं कामधात-वस्तुविवेकः । पश्चाद् रूपारूप्यधातुवस्तुसहविवेकः । तस्माल् लौकिकाग्रधर्मो न वक्तव्य आरूप्यधातुप्रतिसंयुक्तः ॥ पुनः खलु । आरूप्यसमाधिमवतीर्णस्य रूपसंज्ञाव्यपगमः । न विरहितरूपसंज्ञः प्रतिबलो विज्ञातुं कामधातुं । यद्धर्म-प्रत्ययाद् दुःखधर्मज्ञानक्षान्त्युदयो भवति तद्धर्मप्रत्यादुदयति लौकिकाग्रधर्मः ॥

### (४) लौकिकाग्रधर्मे वितर्कविचारस्वभावः

लौकिकाग्रधर्मो वक्तव्यः किं सवितर्कसविचारो ऽवितर्कसविचारो ऽवितर्काविचारः। प्रतिवचनं। वक्तव्यः सवितर्कसविचारो वा। अवितर्कसविचारो वा। अवितर्काविचारो वा। सवितर्कसविचारः कतमः । प्रतिवचनं । सवितर्कसविचारसमाधिमाश्रितस्य सम्यक्त्वन्यामावक्रान्तौ तत्प्राप्तो लौकिकाग्रधर्मः । अवितर्कसविचारः कतमः । प्रतिवचनं । अवितर्कसविचारसमाधिमाश्रितस्य सम्यक्त्वन्यामावक्रान्तौ तत्प्राप्तो लौकिकाग्रधर्मः । अवितर्काविचारः कतमः । प्रतिवचनं । अवितर्काविचारसमाधिमाश्रितस्य सम्यक्त्वन्यामावक्रान्तौ तत्प्राप्तो लौकिकाग्रधर्मः ॥

### (५) लौकिकाग्रधर्मे इन्द्रियसंप्रयोगः

लौकिकाग्रधर्मो वक्तव्यः किं सुखेन्द्रियसंप्रयुक्तः सौमनस्येन्द्रियसंप्रयुक्त उपेक्षेन्द्रियसंप्रयुक्तः । प्रतिवचनं । वक्तव्यः सुखेन्द्रियसंप्रयुक्तो वा । सौमनस्येन्द्रियसंप्रयुक्तो वा । उपेक्षेन्द्रियसंप्रयुक्तो वा। सुखेन्द्रियसंप्रयुक्तः कतमः। प्रतिवचनं। तृतीयध्यानमाश्रितस्य सम्यक्त्वन्यामावक्रान्तौ तत्प्राप्तो लौकिकाग्रधर्मः। सौमनस्येन्द्रियसंप्रयुक्तः कतमः। प्रतिवचनं। प्रथमद्वितीयध्याने आश्रितस्य सम्यक्त्वन्यामावक्रान्तौ तत्प्राप्तो लौकिकाग्रधर्मः। उपेक्षेन्द्रियसंप्रयुक्तः कतमः। प्रतिवचनं । अनागम्यचतुर्थध्याने आश्रितस्य सम्यक्त्वन्यामावक्रान्तौ तत्प्राप्तो लौकिकाग्रधर्मः ॥

### (६) लौकिकाग्रधर्मस्यैकचित्तवत्त्वं

लौकिकाग्रधर्मो वक्तव्यः किमेकचित्तो बहुचित्तः। प्रतिवचनं। वक्तव्य एकचित्तः। कस्मान्नायं धर्मो बहुचित्तः। प्रतिवचनं। एतेभ्यश्चित्तचैतसिकधर्मेभ्यः समनन्तरेभ्यो नेतरस्य लौकिकचित्तस्योत्थापनम् उत्थापनं केवलस्य लोकोत्तरचित्तस्यैव। उत्थिता चेदितरलौकिकचित्तता भवति हीनाय समाय प्रणीताय। हीनो भवति चेद् अप्रतिबलो भवितव्यः सम्यक्त्वन्यामावक्रामाय। कस्य हेतोः। न परिहीनेन मार्गेण भव्यः सम्यक्त्वन्यामावक्रम इति। समो भवति चेत् तथाप्य-



प्रतिबलः सम्यक्त्वन्यामावक्रमाय। कस्य हेतोः। पूर्वम् [ 918c ] एवंजातीयेन मार्गेणाभव्यः सम्यक्त्वन्यामावक्रम इति। प्रणीतो भवति चेत् पौर्विको न भवितव्यो लौकिकाग्रधर्मः। पर एष लौकिकाग्रधर्मः ॥

### (७) लौकिकाग्रधर्मस्याविवर्तनीयता

लौकिकाग्रधर्मो वक्तव्यः किं विवर्तनीयोऽविवर्तनीयः। प्रतिवचनं। वक्तव्यो ऽविवर्तनीयः। कस्मादयं धर्मो नियतमविवर्तनीयः। प्रतिवचनं। लौकिकाग्रधर्मः सत्यानुसारी सत्याभिमुखः सत्यनिर्वेधांशिकः। अन्योन्यान्तरे नावकाशोऽसदृशचित्तोत्पादस्य येन नार्यसत्याभिसमयनिर्वेधः। तथा हि। बलवान् पुरुषो नदीपारं गच्छन् दरीपारं गच्छन् पर्वतपारं गच्छन् प्रपातपारं गच्छन् नान्तरे शक्तः प्रतिनिवर्तयितुमात्मानं प्रतिगन्तं मूलस्थानं गन्तुं वा स्थानान्तरं। प्रथमं प्रस्थितो ऽधिमात्रकायव्यापारो गन्तव्यमनासाद्य न भवति विरन्तुमर्हः। लौकिकाग्रधर्मोऽपि पुनस्तथा। सत्यानुसारी सत्याभिमुखः सत्यनिर्वेधांशिकः। अन्योन्यान्तरे नावकाशो ऽसदृशचित्तोत्पादस्य येन नार्यसत्याभिसमयनिर्वेधः। तथा हि। सन्ति जंबूद्वीपे पंच महानद्यः। गंगा नाम प्रथमा। यमुना नाम द्वितीया। सरयू नाम तृतीया। अचिरवती नाम चतुर्थी। मही नाम पंचमी। यथा पंच नद्यो महासमुद्रानुसारिण्यो महासमुद्राभिमुख्यो महासमुद्रनिर्वेधांशिका अन्तरे न शक्ताः प्रतिनिवर्तितुम् उद्गमस्थानं प्रति स्रोतो वाहयितुं गन्तुं वा स्थानान्तरं। ध्रुवं ता महासमुद्रमवतर्तुं प्रतिबला वहन्ति। लौकिकाग्रधर्मोऽपि पुनस्तथा। सत्यानुसारी सत्याभिमुखः सत्यनिर्वेधांशिकः। अन्योन्यान्तरे नावकाशो ऽसदृशचित्तोत्पादस्य येन नार्यसत्याभिसमयनिर्वेधः। पुनः खलु। लौकिकाग्रधर्मो दुःखधर्मज्ञानक्षान्तेर्भवति समनन्तरप्रत्ययः। न कश्चिद् धर्मः क्षिप्रं पुनरावर्तमानश्चित्तम्[6] अतिक्राम्यन् तदानीं प्रतिबलः कर्तुम् अन्तरायम् आर्यसत्याभिसमयनिर्वेधस्य । तस्मादेष धर्मो ध्रुवमविवर्तनीयः ॥०॥

[ लौकिकाग्रधर्मनिर्देशः परिनिष्ठितः ] ॥०॥

6. दुःखधर्मज्ञानक्षान्तिसंप्रयुक्तचित्तम् इति यावत् ।

# २. मूर्धा

## (१) मूर्धलक्षणं

मूर्धा कतमः। प्रतिवचनं। बुद्धधर्मसंघेष्वल्पप्रमाणश्रद्धोत्पादः। यथा पारायणमाणवकम्[7] अवोचद् भगवान्—

बुद्धे धर्मेऽथ संघे चेत्प्रसादोऽल्पोऽपि जायते।
मूर्धधर्मं गतो नाम विज्ञातव्यः स माणव॥

## (२) मूर्धपातलक्षणं

मूर्धपातः कतमः। प्रतिवचनं। यथैकत्यः सत्पुरुषमुपगम्य सद्धर्मं श्रुत्वा योनिशो मनस्कारेण श्रद्दधाति बुद्धं बोधिधर्मान् कुशलदेशकं संघं। सच्चारित्रो भावयति—रूपमनित्यं वेदनासंज्ञासंस्कारविज्ञानान्यनित्यानि। सुप्रतिष्ठितं दुःखसत्यं सुप्रतिष्ठितानि समुदयनिरोधमार्गसत्यानि। ततः कालान्तरे नोपगच्छति सत्पुरुषं। न शृणोति सद्धर्मं। अयोनिशो मनस्कारेण प्राप्तलौकिकश्रद्धातो भवति परिहीणो भग्नो निवृत्तो नष्ट [ ९।१२ ] इति मूर्धपातो नाम। यथा पारायणमाणवकमवोचद् भगवान्—

एवं त्रिधमतो यदि परिहीयेत पूरुषः।
वदामि मूर्धपतितं ज्ञेयं नाम तथाविधं॥०॥
[ मूर्धनिर्देशः परिनिष्ठितः ]॥०॥

7. सुत्तनिपात-पारायणवग्गगाथासु नात्रोद्धृतवचनानि दृश्यन्ते तथापि मूर्धमूर्धपातविषयिणो चर्चा विद्यते। तद्यथा।

मुद्धं मुद्धाधिपातं च बावरी परिपुच्छति।
तं व्याकरोहि भगवा कंखं विनय नो इसे॥
अविज्जा मुद्धाति जानाहि, विज्जा मुद्धाधिपातिनी।
सद्धासतिसमाधीहि छन्दविरियेन संयुता॥ [ सु १०२५-२६ ]

सुत्तनिपातज्ञानप्रस्थानग्रन्थयोर्विरोधः। तथा हि।

| ज्ञानप्रस्थाने | सुत्तनिपाते |
|---|---|
| त्रिरत्नश्रद्धा नाम मूर्धा | अविद्यानाम मूर्धा |
| त्रिरत्नश्रद्धापरिहाणिर्नाम मूर्धपातः | अविद्यानिपातः, अर्थात्, श्रद्धादिसहितविद्याधिगमो नाम मूर्धपातः |

ज्ञान प्रस्थानप्रयोगमौपचारिकं मत्वा विरोधोऽयं परिहर्तुं शक्यः।



# ३. ऊष्मा

ऊष्मा कतमः। प्रतिवचनं। सद्धर्मविनये ऽल्पश्रद्धासमादानं। यथा भगवानुद्दिश्याश्वजित्पुनर्वसू भिक्षू अवोचत्। एतौ मोघपुरुषौ मम सद्धर्मेण विगतौ विनयेन च। तथा हि। महापृथिवी दूरमाकाशाद् गता। एतौ मोघपुरुषौ मम सद्धर्मविनये नाल्पांशतो ऽप्यूष्मीकृतौ[8] ॥०॥ [ ऊष्मनिर्देशः परिनिष्ठितः ]॥०॥

# ४. सत्कायदृष्टिः

विंशतिकोटिषु सत्कायदृष्टिषु कत्यात्मदृष्टयः कत्यात्मीयदृष्टयः। प्रतिवचनं। पंचात्मदृष्टयः। तद्यथा समनुपश्यति। रूपमात्मा। वेदना०। संज्ञा०। संस्काराः०। विज्ञानमात्मा॥ पंचदशात्मीय दृष्टयः। तद्यथा समनुपश्यति। रूपवानात्मा। रूपमात्मीयं। रूपे आत्मा। वेदना०। संज्ञा०। संस्कार०। विज्ञानवानात्मा। वेदना०। संज्ञा०। संस्काराः०। विज्ञानम् आत्मीयं। वेदनायां०। संज्ञायां०। संस्कारेषु०। विज्ञाने आत्मा॥०॥ [ सत्कायदृष्टिनिर्देशः परिनिष्ठितः ]॥०॥

# ५. दृष्टिसंग्रहो दृष्टिप्रहाणं च

## (१) नित्यदृष्टिः

यदनित्ये नित्यदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। अन्तग्राहदृष्टिशाश्वतदृष्टिसंग्राह्या। दुःखदर्शनहेया॥

8. अपि नायं अरिट्ठो भिक्खु गद्धबाधिपुब्बो उस्मीकतोऽपि इमस्मिं धम्मविनये—इति अलगद्दूपमसुत्तवचनं तुलनीयं [ म १।१३२ ]।

(२) अनित्यदृष्टिः

यन्नित्ये ऽनित्यदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। मिथ्यादृष्टिसंग्राह्या। निरोधदर्शनहेया॥

(३) सुखदृष्टिः

यद् दुःखे सुखदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। हीनधर्माणां प्रणीततया ग्राहकेण दृष्टिपरामर्शेन संग्राह्या। दुःखदर्शनहेया॥

(४) दुःखदृष्टिः

यत् सुखे दुःखदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। मिथ्यादृष्टिसंग्राह्या। निरोधदर्शनहेया॥

(५) शुचिदृष्टिः

यदशुचौ शुचिदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। हीनधर्माणां प्रणीततया ग्राहकेण दृष्टिपरामर्शेन संग्राह्या। दुःखदर्शनहेया॥

(६) अशुचिदृष्टिः

यच् छुचावशुचिदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। मिथ्यादृष्टिसंग्राह्या। अस्या द्वौ भेदौ। यद्युच्यते निरोधऽशुचिः। निरोधदर्शनहेया। यद्युच्यते मार्गोऽशुचिः। मार्गदर्शनहेया॥

(७) आत्मदृष्टिः

यदनात्मन्यात्मदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। सत्कायदृष्टिसंग्राह्या। दुःखदर्शनहेया॥



(८) हेतुदृष्टिः

यदहेतौ हेतुदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। अहेतौ हेतुप्रतिपादकेन शीलव्रतपरामर्शेन संग्राह्या। दुःखदर्शनहेया॥

(९) अहेतुदृष्टिः

यद् हेतावहेतुदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। मिथ्यादृष्टिसंग्राह्या। निरोधदर्शनहेया॥

(१०) अभावदृष्टिः

यद् भावे ऽभावदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। मिथ्यादृष्टिसंग्राह्या। अस्याश्चत्वारो भेदाः। यद्युच्यते न दुःखं। दुःखदर्शनहेया। यद्युच्यते न समुदयः। समुदय [919b]-दर्शनहया। यद्युच्यते न निरोधः। निरोधदर्शनहया। यद्युच्यते न मार्गः। मार्गदर्शनहेया॥

(११) भावदृष्टिः

यदभावे भावदृष्टिः। पंचसु दृष्टिषु कतमया दृष्ट्या संग्राह्या। कतमेन दर्शनेन हेया। प्रतिवचनं। एषा न दृष्टिः। मिथ्याज्ञानमेतत्॥०॥ [दृष्टिसंग्रहप्रहाण-निर्देशः परिनिष्ठितः]॥०॥

इति ज्ञानप्रस्थानस्य प्रथमे संकीर्णस्कंधे लौकिकाग्रधर्मो नाम प्रथमो निःश्वासः॥

प्रथमे संकीर्णस्कन्धे

# द्वितीयो निःश्वासः

## ज्ञानम्

उद्देशः

१एकं ज्ञानं २विज्ञानं ३द्विचित्तहेत्वालंबनं ४स्मृतिः ५श्राद्धं।
६त्रीन्द्रिययोगो ७ऽतीतो ८विचिकित्सा ९नामपदव्यंजनकायाः॥
१०बुद्धावसादः ११षड्हेतवो १२ऽनुशयचित्तं च हानं च।
१३गोचरनिमित्तहेयविज्ञानार्थ इति वर्गविवक्षितं॥

## १. एकं ज्ञानं

अस्त्येकं ज्ञानं जानाति यत्सवधर्मान्। प्रतिवचनं। नास्ति। सर्वे धर्मा अनात्मान इति ज्ञानोत्पादे ज्ञानमिदं किं न जानाति। प्रतिवचनं। न जानाति स्वभावं तत्संप्रयुक्तांश्च सहभूधर्मान्॥०॥ [एकज्ञाननिर्देशः परिनिष्ठितः]॥०॥

## २. एकं विज्ञानं

अस्त्येकं विज्ञानं विजानाति यत्सर्वधर्मान्। प्रतिवचनं। नास्ति। सर्वे धर्मा अनात्मान इति विज्ञानोत्पादे विज्ञानमिदं किं न विजानाति। प्रतिवचनं। न विजानाति स्वभावं तत्संप्रयुक्तांश्च सहभूधर्मान् ॥०॥ [एकविज्ञाननिर्देशः परिनिष्ठितः]॥०॥



## ३. द्विचित्तहेत्वालंबनं

### (१) द्विचित्तमिथोहेतुभावः

द्वे चित्ते किं भवतः परंपरमिथोहेतू। प्रतिवचनं। न। कस्माद् हेतोः। यस्मान्नास्ति कस्यचित् पुद्गलस्यापूर्वाचरमयोर्द्विचित्तयोः सहोत्पादः। न चापि परं चित्तं भवति पूर्वचित्तस्य हेतुः॥

### (२) द्विचित्तमिथआलंबनभावः

द्वे चित्ते किं भवतः परंपरमिथआलंबने। प्रतिवचनं। भवतः। यथानागतचित्तं नास्तीति जायमानं चित्तं। अथैतच्चिन्तोत्थितं द्वितीयं चित्तं। यथानागतचित्तमस्तीति जायमानं चित्तं। अथैतच्चिन्तोत्थितं द्वितीयं चित्तं। यथानागतमार्गचित्तं नास्तीति जायमानं चित्तं। अथैतच्चिन्तोत्थितं द्वितीयं चित्तं। यथानागतमार्गचित्तमस्तीति जायमानं चित्तं। अथैतच्चिन्तोत्थितं द्वितीयं चित्तं। यथा द्वौ परचित्तज्ञौ। एतयोः द्वे चित्ते भवतः परंपरमिथआलंबने। कस्मान्न कस्यचित् पुद्गलस्यापूर्वाचरमयोर्द्वयोश्चित्तयोः सहोत्पादः। प्रतिवचनं। यस्मान् नास्ति द्वितीयः समनन्तरप्रत्ययः। यस्मात् सत्त्वानामेकैकचित्तं संतानवर्ति। यस्मात् पुद्गलो नोपलभ्यते। नापि पूर्वचित्तं गच्छति परचित्तं॥०॥ [द्विचित्तहेत्वालंबननिर्देशः परिनिष्ठितः]॥०॥

## ४. स्मृतिः

केन प्रत्ययेन पूर्वकृतवृत्तस्य स्मरणप्रतिबला भवन्ति। प्रतिवचनं। सत्त्वानां धर्मेष्वभ्यासबलेन लभ्यत एवं [919c] सभागज्ञानं यथागतं वृतं येन प्रतिबला भवन्ति तथा ज्ञातुं। यथा मुद्राकारौ ज्ञातुं प्रतिबलौ परस्परकृतमुद्राक्षराणि। यद्यपि तौ पुरुषौ न गच्छतो मिथः प्रष्टुं त्वं कथमकार्षीरेतान्यक्षराणीति। नापि मिथः प्रतिभाषेते एवमहं करोम्येतान्यक्षराणीति परं तयोः पुरुषयोरभ्यासबलेन

लभ्यत एवं सभागज्ञानं ज्ञातुं प्रतिबलौ भवतो येन परस्परकृतमुद्राक्षराणि। सत्त्वा अपि तथा। अभ्यासबलेन लभ्यत एवं सभागज्ञानं यथागतं वृत्तं येन प्रतिबला भवन्ति तथा ज्ञातुं। पुनर्यथा परचित्तज्ञयोर्भवति परस्परचित्तज्ञानं। यद्यपि तौ पुरुषौ न गच्छतो मिथः प्रष्टुं त्वं कथं जानासि मे चित्तमिति। नापि मिथः प्रतिभाषेते एवमहं ते जानामि चित्तमिति। परं तयोः पुरुषयोरभ्यासबलेन लभ्यते तथा सभागज्ञानं यथा भवतः परस्परचित्तं ज्ञातुं प्रतिबलौ। सत्त्वा अपि तथा। अभ्यासबलेन लभ्यत एवं सभागज्ञानं यथागतं वृत्तं येन प्रतिबला भवन्ति तथा ज्ञातुं। पुनर्यथा। सर्वे चित्तचैतसिका आलंबननियता आलंबनसुप्रतिष्ठिताः॥ भूयोऽपि। चित्तसमादानं हि हेतुः। तस्मिन् प्रबले स्मरणं पुनरविस्मरणं। किं प्रतीत्य सत्त्वानां भवति विस्मरणमथ पुनः स्मरणं। प्रतिवचनं। सत्त्वानां सभागसन्तानप्रवृत्तिकाले धर्मेषु भवति परस्परानुबद्धज्ञानदर्शनोत्पादः। भूयोऽपि। चित्तसमादानं हि हेतुः। तस्मिन् प्रबले स्मरणं न पुनर्विस्मरणं। किं प्रतीत्य सत्त्वानां भवति स्मरणमथ पुनर्विस्मरणं। प्रतिवचनं। सत्त्वानां विसभागसंतानप्रवृत्तिकाले न धर्मेषु भवति परस्परानुबद्धज्ञानदर्शनोत्पादः। भूयोऽपि चित्तसमादानं हि हेतुः। तस्मिन् दुबले स्मरणं पुनः स्मृतिप्रमोषः॥०॥ [ स्मृतिनिर्देशः परिनिष्ठितः ]॥०॥

## ५. श्राद्धं

किं प्रतीत्य श्राद्धमुपतिष्ठन्ति पितरो न गच्छन्त्यन्यतः। प्रतिवचनं। तद्गतिधर्मस्तथा लभन्ते येन तथास्थानवस्तुजातिकमात्मभागं। इति श्राद्धमुपतिष्ठन्ति नान्यतः। यथा हंसमयूरशुकशारिकाजीवंजीवकादयो यद्यपि यथाकाममाकाशे स्वच्छन्दोत्पतनास्तथापि ऋद्धिबलानुभावगुणे न ते मनुष्योत्तराः। परं तद्गतिधर्मस्तथा लभन्ते येन तथास्थानवस्तुजातिकमात्मभागं भवन्ति च प्रतिबला आकाशोत्पतनाय। पितृगतिरपि तथा। तथाधर्मबलेन श्राद्धमुपतिष्ठन्ति। नान्यगतिस्तथा। पुनर्यथा। एकत्या नरकाः प्रतिबलाः स्मर्तुं पूर्वनिवासं ज्ञातुमपि परचित्तं। एकत्यास्तिर्यंचः। एकत्याः प्रेताः प्रतिबलाः स्मर्तुं पूर्वनिवासं ज्ञातुमपि परचित्तं। जनयितुं च धूमज्वलनं प्रारब्धुं मेघान प्रयोजयितु वर्षं शीतीकर्तुमुष्णमित्यादि। यद्यपि प्रतिबलाः कर्तुं वस्तून्येतानि तथापि ऋद्धिबलानु-



भावगुणे न ते मनुष्योत्तराः। परं तद्गतिधर्मस्तथा लभन्ते येन तथास्थानवस्तुजातिकमात्मभागं प्रतिबलाः कर्तुमेतानि वस्तूनि। पितृगतिरपि तथा। तथाधर्मबलेन श्राद्धमुपतिष्ठन्ति। नान्यगतिस्तथा। पुनः। कश्चिद्दीर्घरात्रं जनयत्येवं छन्दम् एवं नन्दीरागं। भवतु दारपरिग्रहो मे पुत्राय दारपरिग्रहो मे पौत्राय दारपरिग्रहो मे पुत्रपौत्रप्रजननाय सन्तत्यविच्छेदाय। मम जीवितस्यान्ते यदि पितृगतावुपपन्नो भवेयं तर्हि ते ऽनुस्मरन्तो मां कुर्युर्मे श्राद्धं। तस्य दीर्घरात्रं भूतेनैतेन कामगुणेन श्राद्धमुपतिष्ठन्ति नान्यतः॥०॥ [ श्राद्धनिर्देशः परिनिष्ठितः ]॥०॥

## ६. त्रीन्द्रिययोगः = विषयस्य द्वाभ्यामिन्द्रियाभ्यां योगः

वक्तव्यमेकचक्षुषा रूपदर्शनं द्वाभ्यां चक्षुर्भ्यां रूपदर्शनं। प्रतिवचनं। द्वाभ्यां चक्षुर्भ्यां वक्तव्यं रूपदर्शनं[1]। कस्य हेतोः। एकस्मिन् चक्षुषि निमीलिते भवत्यस्फुटविज्ञानोत्पादः। उन्मीलिते भवतो यदा द्वे चक्षुषी तदा स्फुटविज्ञानोत्पाद इति। ननु निमीलिते चक्षुष्येकस्मिन् तथा विज्ञानं जायेत यथोन्मीलितयोश् [ ९२०a ] चक्षुषोः काले जायते तर्हि न वक्तव्यं द्वाभ्यां चक्षुर्भ्यां रूपदर्शनं। परमेकस्मिन् चक्षुषि निमीलिते भवत्यस्फुटविज्ञानोत्पादः। उन्मीलिते भवतो यदा द्वे चक्षुषी तदा स्फुटविज्ञानोत्पादः। तस्माद् वक्तव्यं द्वाभ्यां चक्षुर्भ्यां रूपदर्शनं। यथा निमीलितं तथावृतं दूषितं क्षतं नष्टं चापि। चक्षुर्भ्यां रूपदर्शनं यथा श्रोत्राभ्यां शब्दश्रवणं घ्राणाभ्यां गंधग्रहणमपि तथा॥०॥ [त्रीन्द्रिययोगनिर्देशः परिनिष्ठितः]॥०॥

## ७. अतीतं

सर्वमतीतं तत्सर्वमप्रत्युत्पन्नं किं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। अस्त्यतीतं नाप्रत्युत्पन्नं। यथावोचद् आयुष्मानुदायी—

---

१. परवर्तिनो नैयायिकतीर्थिका दर्शनरूपस्य कार्यस्य एकत्वाद् एकं चक्षुर् इत्याहुः [ मं २।५४ ]। इह तु दर्शनरूपकार्ये स्फुटत्वास्फुटत्वभेदसद्भावश् चक्षुषोरेकत्वद्वित्वसद्भावमाश्रित इति रूपदर्शनं प्रति चक्षुर्द्वयस्य हेतुभावः प्रतिपादितः।

सर्वसंयोजनमतीतं वनाद् निर्वणमागतं।
कामेभ्यो नैष्कम्यसुखं शैलमुक्तमिव कांचनं ॥[2]

अस्त्यप्रत्युत्पन्नं नातीतं। तथाहि कश्चिद् अभिज्ञया वा मंत्रविद्यया वा भैषज्य-वस्तुना वा तथाजात्यावासलब्धज्ञानेन वा किंचित् पिदधातीति न प्रतीयते। अस्त्यतीतमप्रत्युपन्नमपि। तथाहि सर्वे संस्कारा उत्पन्ना समुत्पन्ना जाताः संजाताः परिवृत्ताः संपरिवृत्ताः समुदिता अभ्युपपन्ना अतीता निरुद्धास्त्यक्तपरिणामा इत्यतीता अतीतांशका अतीताध्वसंगृहीताः। नास्त्यतीतं नाप्यप्रत्युत्पन्नं। तथाहि विहाय पूर्वलक्षणं॥

सर्वमतीतं तत्सर्वं निरुद्धं किं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। अस्त्यतीतं न निरुद्धं। यथावोचदायुष्मानुदायी—सर्वसंयोजनमतीतं यावद् विस्तरेणोक्तं। अस्ति निरुद्धं नातीतं। तथा हि भगवानवोचत्—एतेषामार्य-श्रावकाणां निरुद्धो नरकः। निरुद्धा तिर्यग्जातिः। निरुद्धः प्रेत [विषयः]। निरुद्धाः सर्वदुर्गतयः। अस्त्यतीतं निरुद्धमपि। तथा हि सर्वे संस्कारा उत्पन्नाः समुत्पन्नाः। यावद् विस्तरेणोक्तं। अस्ति नातीतं नापि च निरुद्धं। तथा हि विहाय पूर्वलक्षणं॥

पुनः खलु संयोजनप्रहाणमधिकृत्य वचनं। अस्ति संयोजनमतीतं न निरुद्धं। तथा हि संयोजनमतीतम् अप्रहीणम् अपरिज्ञातम् अनिरुद्धम् अनुद्वान्तं। अस्ति संयोजनं निरुद्धं नातीतं। तथा हि संयोजनमनागतं प्रहीणं परिज्ञातं निरुद्धम् उद्वान्तं। अस्ति संयोजनमतीतं निरुद्धमपि। तथा हि संयोजनमतीतं प्रहीणं परिज्ञातं निरुद्धम् उद्वान्तं। अस्ति संयोजनं नातीतं नापि निरुद्धं। तथा हि संयोजनमनागतम् अप्रहीणम् अपरिज्ञातम् अनिरुद्धम् अनुद्वान्तं। प्रत्युत्पन्नं च संयोजनं॥

सर्वमतीतं तत्सर्वमन्तर्हितं किं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। अस्त्यतीतं नान्तर्हितं। यथावोचदायुष्मानुदायी—सर्वसंयोजनमतीतं। यावद् विस्तरेणोक्तं। अस्त्यन्तर्हितं नातीतं। यथा व्यवहारमाश्रित्य परित्ता रथ्या परित्ता शालिका परित्तं भाजनं परित्तं चक्षुरुच्यते ऽन्तर्हिता रथ्या यावद् अन्तर्हितं चक्षुः। अस्त्यतीतम् अन्तर्हितमपि। यथा सर्वे [920b] संस्कारा उत्पन्नाः

2. थेर ६९४



समुत्पन्नाः। यावद् विस्तरेणोक्तं। अस्ति नातीतं नाप्यन्तर्हितं। यथा वर्जयित्वा पूर्वलक्षणं॥

पुनः खलु संयोजनप्रहाणमधिकृत्य वचनं। अस्ति संयोजनमतीतं नान्तर्हितं। तथा हि संयोजनमतीतम् अप्रहीणम् अपरिज्ञातम् अनिरुद्धम् अनुद्वान्तं। अस्ति संयोजनमन्तर्हितं नातीतं। तथा हि संयोजनमनागतं प्रहीणं परिज्ञातं निरुद्धम् उद्वान्तं। अस्ति संयोजनमतीतमन्तर्हितमपि। तथा हि संयोजनमतीतं प्रहीणं परिज्ञातं निरुद्धम् उद्वान्तं। अस्ति संयोजनं नातीतं नाप्यन्तर्हितं। तथा हि संयोजनमनागतम् अप्रहीणम् अपरिज्ञातम् अनिरुद्धम् अनुद्वान्तं। प्रत्युत्पन्नं च संयोजनं॥०॥ [अतीतनिर्देशः परिनिष्ठितः]॥०॥

## ८. विचिकित्सा

यदि दुःखे जायते विचिकित्सा—इदं दुःखमिति नेदं दुःखमिति। वक्तव्यं तदेकचित्तमनेकचित्तं। प्रतिवचनं। वक्तव्यमनेकचित्तं। तथा हि। इदं दुःख-मित्येकं चित्तं। नेदं दुःखमिति द्वितीयं चित्तं। समुदयनिरोधमार्गेषु जाता विचिकित्सापि तथा॥

अस्त्येकं चित्तं सविचिकित्साविचिकित्सं। प्रतिवचनं। न। कस्य हेतोः। तथा हि। दुःखसत्ये किंस्विदिदं दुःखमिति वचने चित्तमिदं भवति सविचिकित्सं। इदं दुःखमितिवचने चित्तमिदं भवत्यविचिकित्सं। किंस्विन्नेदं दुःखमिति वचने चित्तमिदं भवति सविचिकित्सं। नेदं दुःखमिति वचने चित्तमिदं भवत्यविचिकित्सं। समुदयनिरोधमार्गेष्वपि तथा ज्ञातव्यं॥०॥ [विचिकित्सानिर्देशः परिनिष्ठितः]॥०॥

## ९. नामपदव्यंजनकायाः

### (१) नामकायः

नामकायः कतमः। प्रतिवचनं। तथा हि। नामसमूहो विशेषवचनान्यधि-वचननानि संज्ञा अनुसंज्ञा उपादाय प्रतिष्ठितः। इति नामकायः॥

### (२) पदकायः

पदकायः कतमः। प्रतिवचनं। अपूर्णार्थपूरकपदानामेकत्र विन्यासः। इति पदकायः। यथाह भगवान्—

सर्वपापस्याकरणं कुशलस्योपसंग्रहः।
स्वचित्तपर्यवदानम् एतत् बुद्धानां शासनं ॥[3]

इति चत्वारि पदानि। प्रत्येकमपूर्णार्थपूरकमत्र विन्यस्तम् इति पदकायः ॥[4]

### (३) व्यंजनकायः

व्यंजनकायः कतमः। प्रतिवचनं। सर्वाक्षरनिकायः। इति व्यंजनकायः। यथाह भगवान्—

छन्दो निदानं गाथानामक्षराणि तासां व्यंजनं।
नामसंनिश्रया गाथा कविर्गाथानामाश्रयः ॥[5]

॥०॥ [ नामपदव्यंजनकायनिर्देशः परिनिष्ठितः ] ॥०॥

## १०. बुद्धावसादः

यथा बुद्धो भगवान् विवाचयति स्म शिष्यान् आमन्त्रयन् मोघपुरुष इति[6]। एतस्य कोऽर्थः। प्रतिवचनं। एतत् परिभाषवचनं। तथा हि। बुद्धो भगवान् विवाचयति स्म शिष्यान् आमन्त्रयन् मोघपुरुष इति। यथेदानीम् उपाध्याया आचार्याश्चान्तेवासिन आश्रितान् शिष्यान् जाते दोषे विवाचयन्ति यूयं बाला मूढा अप्रतिभाना अकुशला इति। भगवानपि तथा विवाचयति स्म शिष्यानामन्त्रयन् मोघपुरुष इति। कस्माद् भगवान् विवाचयति स्म शिष्यान् आमन्त्रयन् मोघपुरुष

3. ध १८३
4. पदकायः=वाक्यसमूहः, कोश २।४७
5. सं १।३८
6. बुद्धावसादविषयमधिकृत्य मिलिन्दनागसेनयोः संवादो द्रष्टव्यः [ मि १७१, १७२ ]।



इति। प्रतिवचनं। ते भगवतोऽववादानुशासनीं नाथतः स्म चरन्ति नानुवर्तन्ते न निरन्तरोकुर्वन्ति। प्रत्युत ते कुर्वन्ति स्मार्यशासने बालमूढकृत्यानि मोघानि विफलान्यनिःसरणान्यनास्वादान्यसुलाभानि बुद्धशासनप्रत्यनीकानि। सर्वशिक्षापदेषु न प्रतिबलाः शिक्षासमादानायेति भगवान् परिभाषते स्म तेषामामन्त्रयन् मोघपुरुष इति[7] ॥०॥ [ बुद्धावसादनिर्देशः परिनिष्ठितः ] ॥०॥

## ११. षड् हेतवः

### (१) षण्णां हेतूनामुद्देशः

सन्ति षड् हेतवः। तथा हि। संप्रयुक्तकहेतुः यावत् कारणहेतुः ॥

### (२) संप्रयुक्तकहेतुः प्रथमः

संप्रयुक्तकहेतुः कतमः। प्रतिवचनं। वेदना वेदनासंप्रयुक्तकधर्माणां संप्रयुक्तकहेतुः। वेदनासंप्रयुक्तकधर्मा वेदनायाः संप्रयुक्तकहेतवः। संज्ञा चेतना स्पर्शो मनस्कारश्छन्दो ऽधिमुक्तिः स्मृतिः समाधिर्मतिश्च मतिसंयुक्तकधर्माणां संप्रयुक्तकहेतुः। मतिसंयुक्तकधर्मा मतेः संप्रयुक्तकहेतवः। इति संप्रयुक्तकहेतुः ॥

### (३) सहभूहेतुर्द्वितीयः

सहभूहेतुः कतमः। प्रतिवचनं। चित्तं चैतसिकधर्माणां सहभूहेतुः। चैतसिकधर्मा चित्तस्य सहभूहेतवः। चित्तं चित्तानुवर्तिकायकर्मवाक्कर्मणां सहभूहेतुः। चित्तं चित्तानुवर्तिविप्रयुक्तसंस्काराणां सहभूहेतुः। चित्तानुवर्तिविप्रयुक्तसंस्काराश्चित्तस्य सहभूहेतवः। पुनः खलु सहजातानि चतुर्महाभूतानि परस्परं सहभूहेतवः। इति सहभूहेतुः ॥

7. तुलनीयमत्र नागसेनवचनं—यस्य पुग्गलस्स इमस्मिं अत्तभावे चतुसच्चाभिसमयो न होति, तस्स पुरिसत्तनं मोघं, अञ्ञं कयिरमानं अञ्ञेन संभवति, तेन वुच्चति मोघपुरिसो ति [ मि १७१ ] इति। बुद्धः प्राणिनां विनयं कथं करोति। अत्रोच्यते। "अहं खो, केसि, पुरिसदम्मे सण्हेनपि विनेमि, फरुसेनपि विनेमि, सण्हफरुसेनपि विनेमि" [ अं २।११२ ] इति।

## (४) सभागहेतुस्तृतीयः

सभागहेतुः कतमः। प्रतिवचनं। पूर्वजातकुशलमूलं पश्चाज्जातस्य स्वधातुकुशलमूलस्य तत्संप्रयुक्तकधर्माणां च सभागहेतुः। अतीतकुशलमूलम् अनागतप्रत्युत्पन्नस्य स्वधातुकुशलमूलस्य तत्संप्रयुक्तकधर्माणां च सभागहेतुः। प्रत्युत्पन्नकुशलमूलम् अनागतस्य स्वधातुकुशलमूलस्य तत्संप्रयुक्तकधर्माणां च सभागहेतुः। यथा कुशलमूलम् अकुशलाव्याकृतमूले अपि तथा। भेदस्त्वयं। अकुशले वर्ज्यते स्वधातुः। इति सभागहेतुः॥

## (५) सर्वत्रगहेतुश्चतुर्थः

सर्वत्रगहेतुः कतमः। प्रतिवचनं। पूर्वं जाता दुःखदर्शनहेयाः सर्वत्रगा अनुशयाः पश्चाज्जातानां स्वधातुकानां समुदयनिरोधमार्गदर्शनभावनाहेयानाम् अनुशयानां तत्संप्रयुक्तकधर्माणां च सर्वत्रगहेतवः। अतीता दुःखदर्शनहेयाः सर्वत्रगा अनुशया अनागतप्रत्युत्पन्नानां स्वधातुकानां समुदयनिरोधमार्गदर्शनभावनाहेयानामनुशयानां तत्संप्रयुक्तकधर्माणां च सर्वत्रगहेतवः। प्रत्युत्पन्ना दुःखदर्शनहेयाः सर्वत्रगा अनुशया अनागतानां स्वधातुकानां समुदयनिरोधमार्गदर्शनभावनाहेयानाम् अनुशयानां तत्संप्रयुक्तकधर्माणां च सर्वत्रगहेतवः। यथा दुःखदर्शनहेयाः समुदयदर्शनहेया अपि तथा। इति सर्वत्रगहेतुः।

## (६) विपाकहेतुः पंचमः

विपाकहेतुः कतमः। सर्वे चित्तचैतसिकधर्मा उद्गृह्णन्ति विपाकं रूपं चित्तचैत्तधर्मान् चित्तविप्रयुक्तसंस्कारान्। एते चित्तचैतसिकधर्मास्तस्य विपाकस्य विपाकहेतवः। सर्वकायवाक्कर्माण्युद्गृह्णन्ति [921a] विपाकं रूपं चित्तचैत्तधर्मान् चित्तविप्रयुक्तसंस्कारान्। एतानि कायवाक्कर्माणि तस्य विपाकस्य विपाकहेतवः। पुनः खलु सर्वचित्तविप्रयुक्तसंस्कारा उद्गृह्णन्ति विपाकं रूपं चित्तचैत्तधर्मान् चित्तविप्रयुक्तसंस्कारान्। एते चित्तविप्रयुक्तसंस्कारास्तस्य विपाकस्य विपाकहेतवः। इति विपाकहेतुः॥



## (७) कारणहेतुः षष्ठः

कारणहेतुः कतमः। प्रतिवचनं। चक्षुश्च रूपं च प्रतीत्य जायते चक्षुर्विज्ञानं। एतस्य चक्षुर्विज्ञानस्य ते चक्षूरूपे तत्संप्रयुक्तकधर्मास्तत्सहभूधर्माः श्रोत्रं शब्दः श्रोत्रविज्ञानं घ्राणं गन्धो घ्राणविज्ञानं जिह्वा रसो जिह्वाविज्ञानं कायः स्पर्शः कायविज्ञानं रूपिणो ऽरूपिणः सनिदर्शना अनिदर्शनाः सप्रतिघा अप्रतिघाः सास्रवा अनास्रवाः संस्कृता असंस्कृता इत्येवमादयश्च सर्वे धर्मा कारणहेतवः। वर्जयित्वा स्वभावं। यथा चक्षुर्विज्ञानं श्रोत्रघ्राणजिह्वाकायमनोविज्ञानान्यपि तथा। इति कारणहेतुः॥०॥ [षड्हेतुनिर्देशः परिनिष्ठितः] ॥०॥

# १२. चित्तसंबन्धेनानुशयानुशयितम् अनुशयप्रहाणं च

सर्वं चित्तम् अनुशयेन सहेति सानुशयचित्तं नाम। सो ऽनुशयः किमत्र चित्ते समनुशेते। प्रतिवचनं। समनुशेते वा। न समनुशेते वा। कतमः समनुशेते। तथा हि। यस्यानुशयस्यैतच्चित्तसंप्रयोगो ऽप्रहीणः। एतच्चित्तमालंबनं। कतमो न समनुशेते। तथा हि। यस्यानुशयस्यैतच्चित्तसंप्रयोगः प्रहीणः ॥[8]

नन्वनुशयश्चित्ते समनुशेते। तदिदं चित्तं किं तेनैवानुशयेन सहेति सानुशयचित्तं नाम। प्रतिवचनं। तेन नान्येन वा। तेन चान्येन च वा। कतमत् तेन नान्येन। तथा हीदं चित्तमप्रहीणं। कतमत् तेन चान्येन च। तथा हि दुःखज्ञान उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने यदिदं चित्तं दुःखदर्शनहेयसमुदयदर्शनहेयानुशयालंबनं॥

सर्वं चित्तम् अनुशयेन सहेति सानुशयचित्तं नाम। सोऽनुशयः किमत्र चित्त हातव्यः। प्रतिवचनं। हातव्यो वा। अहातव्यो वा। कतमो हातव्यः। तथा हि। यस्यानुशयस्येदं चित्तमालंबनं। कतमो ऽहातव्यः। तथा हि। यस्यानुशयस्यैतेन चित्तेन संप्रयोगः॥

सर्वोऽनुशयः किमुपादाय हातव्यः। प्रतिवचनं। आलंबनमुपादाय॥

भवानाह। अनुशय आलंबनमुपादाय हातव्यः। प्रतिवचनं। एवं॥

---

8. कोश ५।१७-१८

यदि तथा। यः सर्वोऽनुशयो निरोधमार्गदर्शनहेयः सास्रवालंबनः स किमुपादाय हातव्यः। एतस्य हानं[9] तस्य हानम्[10] इति चेदुच्यते न सर्वमिदं युक्तं। प्रतिवचनं। निरोधमार्गदर्शनहेयो ऽनास्रवालंबनो ऽनुशय आलंबनमुपादाय हीयते। एतस्य हानात्[11] तस्यापि हानं[12] ॥

नन्वनुशयश्चित्ते हातव्यः। तदिदं चित्तं किं तेनैवानुशयेन सहेति सानुशयचित्तं नाम। प्रतिवचनं। तेन नान्येन वा। तेन चान्येन च वा। कतमत् तेन नान्येन। तथा हि रागेणादूषितं भावनाहेयं। कतमत् तेन चान्येन च। तथा हि चित्तं रागदूषितं ॥

## १३. गोचरनिमित्तहेयविज्ञानं

[ 921b ] गोचरनिमित्तहेयं[13] विज्ञानं कतमत्। प्रतिवचनं। दुःखज्ञान उत्पन्ने समुदयज्ञानेऽनुत्पन्ने यदिदं चित्तं समुदयदर्शनहेयं दुःखदर्शनहेयालंबनं। इति गोचरनिमित्तहेयविज्ञानं। अस्मिन् विज्ञाने कत्यनुशया अनुशेरते। प्रतिवचनं। एकोनविंशतिः ॥ चित्तमेकं किं। प्रतिवचनं। न तथा। तथा हि। अप्रहीणकामरागस्य दुःखधर्मज्ञाने उत्पन्ने समुदयधर्मज्ञाने ऽनुत्पन्ने यच्चित्तं कामधातुकं समुदयदर्शनहेयं दुःखदर्शनहेयालंबनं। तदिदं गोचरनिमित्तहेयविज्ञानं कामधातुकैः समुदयदर्शनहेयैः सप्तभिरनुशयैरनुशयितं। प्रहीणकामरागस्याप्रहीणे रूपरागे दुःखान्वयज्ञान उत्पन्ने समुदयान्वयज्ञाने ऽनुत्पन्ने यच्चित्तं रूपधातुकं समुदयदर्शनहयं दुःखदर्शनहेयालंबनं। तदिदं गोचरनिमित्तहेयविज्ञानं रूपधातुकैः समुदयदर्शनहेयैः षड्भिरनुशयैरनुशयितं। प्रहीणरूपरागस्य दुःखान्वयज्ञान उत्पन्ने समुदयान्वयज्ञाने ऽनुत्पन्ने यच्चित्तमारूप्यधातुकं समुदयदर्शनहेयं दुःखदर्शनहेयालंबनं। तदिदं गोचरनिमित्तहेयविज्ञानम् आरूप्यधातुकैः समुदयदर्शनहेयैः षड्भिरनुशयैरनुशयितं ॥०॥ [ गोचरनिमित्तहेयविज्ञाननिर्देशः परिनिष्ठितः ] ॥०॥

इति ज्ञानप्रस्थानस्य प्रथमे संकीर्णस्कन्धे ज्ञानं नाम द्वितीयो निःश्वासः ॥

---

9. एतस्य हानं=आलंबनस्य हानं
10. तस्य हानं=अनुशयस्य हानं
11. एतस्य हानत्=अनास्रवस्य हानात्
12. तस्यापि हानं=सास्रवस्यापि हानं
13. यस्य विज्ञानस्य विषयप्रहाणेन प्रहाणं, न तु स्वतः प्रहाणं तदेवात्र गोचरनिमित्तहेयपदेन विवक्षितं।



प्रथमे संकीर्णस्कन्धे

# तृतीयो निःश्वासः

पुद्गलः

उद्देशः

१प्रतीत्योत्पादः २प्रत्यय ३आनाश्रयश् ४चित्ताश्रयो ५विभवरागः।
६चेत्तोमुक्तिर् ७आश्रयो ८धातुः ९संज्ञा -इति वर्गविवक्षितं ॥

## १. प्रतीत्य समुत्पादः

एकस्य पुद्गलस्येह जातौ द्वादशांगप्रतीत्यसमुत्पादे कत्यतीतानि कत्यनागतानि कति प्रत्युत्पन्नानि। प्रतिवचनं। द्व अतीते। तथा हि। अविद्या संस्काराः। द्वे अनागते। तथा हि। जातिर् जरामरणं। अष्टौ प्रत्युत्पन्नानि। तथा हि। विज्ञानं नामरूपं षडायतनं स्पर्शो वेदना तृष्णोपादानं भवः[1] ॥०॥ [ प्रतीत्यसमुत्पादनिर्देशः परिनिष्ठितः ] ॥०॥

## २. प्रत्ययः

यथा भगवानवोचत्—अविद्याप्रत्ययाः संस्कारा उपादानप्रत्ययो भव इति। कतमोऽविद्याप्रत्ययाः संस्काराः उपादानप्रत्ययो भव इति। प्रतिवचनं। अविद्याप्रत्ययाः संस्कारा इत्येतेन दर्शितं भवति कर्मणः पूर्वमितरजातौ कृतस्योपचितस्य लभ्यतेऽस्मिन् भवे विपाकः प्रत्यनुभूयते च विपाकः। उपादानप्रत्ययो भव इत्येतेन दर्शितं भवति कर्मणः प्रत्युत्पन्नायां जातौ कृतस्योपचितस्य प्राप्तव्यो ऽनागते भवे विपाकः ॥

---

1. कोश ३।२० इति तुलनीयं।

अविद्याप्रत्ययाः संस्कारा उपादानप्रत्ययो भव इत्यत्र को भेदः। प्रतिवचनं। अविद्याप्रत्ययाः संस्कारा इति विस्तरेणोक्तं यथापूर्वं। इदं कर्म प्रत्ययः। भगवानवोचत्—एकः क्लेशो यदियमविद्या—इति। उपादानप्रत्ययो भव इति विस्तरेणोक्तं यथापूर्वं। इदं कर्म प्रत्ययः। भगवानवोचत्—सर्वे क्लेशा यदिद-मुपादानम् इति। इति भेदः॥

अस्ति केचन संस्काराः प्रतीत्याविद्याम् अप्रतीत्य विद्यां। प्रतिवचनं। नास्ति॥ अस्ति केचन संस्काराः प्रतीत्य विद्याम् अप्रतीत्याविद्यां। प्रतिवचनं। नास्ति॥ अस्ति केचन संस्काराः प्रतीत्याविद्यां प्रतीत्य विद्यामपि। प्रतिवचनं। अस्ति॥ अस्ति केचन संस्कारा अप्रतीत्याविद्याम् अप्रतीत्य विद्यामपि। प्रतिवचनं। नास्ति॥ एतत् कस्य हेतोः। नास्ति कश्चित्सत्वः [921c] विरायागतो नाभ्याख्यातवानार्यमार्गम् अमार्ग इति। पूर्वमभ्याख्याय मार्गं स पश्चात्काले कर्म करोति। उपचिनोति महापृथ्वीप्रत्याक्षेपकं कर्म। अथवा पश्चात्काले कर्म करोति। उपचिनोति क्षुद्रकराजप्रत्याक्षेपकं कर्म। अथवा पश्चात्काले कर्म करोति। उपचिनोति महाराजप्रत्याक्षेपकं कर्म। अथवा पश्चात्काले कर्म करोति। उपचिनोति चक्रवर्तिराजप्रत्याक्षेपकं कर्म। एतेन हेतुना, एतेन प्रत्ययेन, तेनार्यमार्गेण च पर्यायेण प्रतिलभते महापृथिवीं सर्वैर् नगरग्रामनिगमैर् मानुषामानुषतिर्यग्भिर् धान्यौषधितृणैस् तरुगहनैर् वनैश्च समृद्धां स्फीतां। एवं पूर्वचित्तस्य चत्वारः प्रत्ययाः। परचित्तस्य केवलमेको ऽधिपतिप्रत्ययः॥

पुनः खलु हेतुप्रत्ययमधिकृत्य वचनं। अस्ति केचन संस्काराः प्रतीत्या-विद्याम् अप्रतीत्य विद्यां। प्रतिवचनं। अस्ति। तथा हि। अविद्याविपाकाः क्लिष्टाश्च संस्काराः॥ अस्ति केचन संस्काराः प्रतीत्य विद्याम् अप्रतीत्याविद्यां। प्रतिवचनं। अस्ति। तथा हि। स्थापयित्वा प्रथमां विद्यामपरेऽनास्रवाः संस्काराः॥ अस्ति केचन संस्काराः प्रतीत्याविद्यां प्रतीत्य विद्यामपि। प्रतिवचनं। नास्ति॥ अस्ति केचन संस्कारा अप्रतीत्याविद्याम् अप्रतीत्य विद्यामपि। प्रतिवचनं। अस्ति। तथा हि। स्थापयित्वा ऽविद्याविपाकान् अपरे ऽनिवृताव्याकृताः संस्काराः प्रथमा विद्या कुशलाः सास्रवाः संस्काराश्च ॥०॥ [प्रत्ययनिर्देशः परिनिष्ठितः] ॥०॥



## ३. आनापानाश्रयः

आनापानयोर्वक्तव्या कायाश्रया प्रवृत्तिश् चित्ताश्रयाप्रवृत्तिः। प्रतिवचनं। वक्तव्या कायाश्रयापि प्रवृत्तिश् चित्ताश्रयापि प्रवृत्तिर् यथायोगं। यद्यानापानयोः केवलकायाश्रया प्रवृत्तिर् न चित्ताश्रया प्रवृत्तिस् तर्हि आसंज्ञिकसमापत्तिनिरोध-समापत्तिदशायाम् आनापनयोरपि प्रवृत्तिः स्यात्। यद्यानापानयोः केवलचित्ताश्रया प्रवृत्तिर् न कायाश्रया प्रवृत्तिस् तर्हि आरूप्यधातुकसत्वानाम् आनापानयोरपि प्रवृत्तिः स्यात्। यद्यानापानयोः केवलकायचित्ताश्रया प्रवृत्तिर् अयथायोगं तर्हि अंडजस्य मातृगर्भ कललस्य अर्बुदस्य पेश्याः घनस्य अपूर्णाप्रौढेन्द्रियस्य चतुर्थध्यान-विहारिणश्चानापानयोरपि प्रवृत्तिः स्यात्। यस्माद् आनापानयोः कायाश्रयापि प्रवृत्तिश् चित्ताश्रयापि प्रवृत्तिर् यथायोगं च भवति तस्माद् अधो ऽवीचिनरकाद् ऊर्ध्वं यावच् छुभकृत्स्नम् इह सत्त्वानां पूर्णप्रौढेन्द्रियाणाम् आनापानयोः काय-चित्ताश्रया भवति प्रवृत्तिः ॥०॥ [आनापानाश्रयनिर्देशः परिनिष्ठितः] ॥०॥

## ४. चित्ताश्रयः

यथा रूपिणां सत्त्वानां चित्तसन्ततेः कायाश्रया प्रवृत्तिः। तथारूपिणां सत्त्वानां चित्तसन्ततेः किमाश्रया प्रवृत्तिः। प्रतिवचनं। आश्रित्य जीवितेन्द्रियं निकायसभागम् अन्यांश्चैवंजातीयकान् चित्तविप्रयुक्तसंस्कारान् ॥०॥ [चित्ताश्रय-निर्देशः परिनिष्ठितः] ॥०॥

## ५. विभवरागः

विभवरागो वक्तव्यो दर्शनहेयो भावनाहेयः। प्रतिवचनं। वक्तव्यो भावनाहेयः॥

अपर आह—विभवरागो दर्शनहेयो वा भावनाहेयो वा। कतमो दर्शनहेयः। यथा दर्शनहेयधर्मेषु विभवो ऽथ च रागः। कतमो भावनाहेयः। भावनाहेयधर्मेषु विभवो ऽथ च [922a] रागः॥

अत्रार्थे विभवरागो भावनाहेय एव वक्तव्यः॥

भवानाह—विभवरागो भावनाहेय एव ॥ ननु स्रोत आपन्नस्याप्रहीणः स रागः। प्रतिवचनं। तथा ॥ तव किं विवक्षितं। स्रोत आपन्नस्य भवत्येवं चित्तं यदहं परं मरणाद् नष्टो निहतो ऽभूतः कियानसुख इति। प्रतिवचनं। न तथा ॥ श्रृणु मे वचनं। यदि विभवरागो भावनाहेय एव। स्रोत आपन्नस्याप्रहीणः स रागः। तर्हि वक्तव्यं स्रोत आपन्नस्य भवत्येवं चित्तं यदहं परं मरणाद् नष्टो निहतो ऽभूतः कियानसुख इति। यदि स्रोत आपन्नस्य न भवत्येवं चित्तं यदहं परं मरणाद् नष्टो निहतो ऽभूतः कियानसुख इति। तर्हि न वक्तव्यो विभवरागो भावनाहेय एव। स्रोत आपन्नस्याप्रहीणः स रागः। इत्येवंवादः सर्वथाऽयुक्तः ॥

भवतामपि वचनं—नरकप्रेततिर्यग्विपाकानां रागो भावनाहेय एव ॥ ननु स्रोत आपन्नस्याप्रहीणः स रागः। प्रतिवचनं। तथा ॥ तव किं विवक्षितं। स्रोत आपन्नस्य भवत्येवं चित्तम् अहं भवेयमैरावणो नागराजः स्वस्तिको नागराजो यमः परेतराट् प्रेतधातुसत्त्वनिग्राहक इति। प्रतिवचनं। न तथा ॥ श्रृणु मे वचनं। नरकप्रेततिर्यग्विपाकानां रागो भावनाहेय एव। स्रोत आपन्नस्याप्रहीणः स रागः। तर्हि वक्तव्यं स्रोत आपन्नस्य भवत्येवं चित्तम् अहं भवेयमैरावणो नागराजो यावद् विस्तरेणोक्तं। यदि स्रोत आपन्नस्य न भवत्येवं चित्तम् अहं भवेयमैरावणो नागराजो यावद् विस्तरेणोक्तं। तर्हि न वक्तव्यो नरकप्रेततिर्यग्विपाकानां रागो भावनाहेय एव। स्रोत आपन्नस्याप्रहीणः स रागः ॥

भवन्तोऽप्याहुः—क्लेशपर्यवस्थितत्वाज् जीविताद् व्यवरोपयति मातापितरौ। एष क्लेशो भावनाहेय एव ॥ ननु स्रोतआपन्नस्याप्रहीण एष क्लेशः। प्रतिवचनं। तथा ॥ तव किं विवक्षितं। स्रोत आपन्न एवं क्लेशपर्यवस्थितत्वाज् जीविताद् व्यवरोपयति मातापितरौ। प्रतिवचनं। न तथा ॥ श्रृणु मे वचनं। यदि क्लेशपर्यवस्थितत्वाज् जीविताद् व्यवरोपयति मातापितरौ। एष क्लेशो भावनाहेय एव। स्रोत आपन्नस्याप्रहीण एष क्लेशः। तर्हि वक्तव्यं स्रोत आपन्न एवं क्लेशपर्यवस्थितत्वाज् जीविताद् व्यवरोपयति मातापितराविति। यदि स्रोत आपन्नो नैवं क्लेशपर्यवस्थितत्वाज् जीविताद् व्यवरोपयति मातापितरौ। तर्हि न वक्तव्यं क्लेशपर्यवस्थितत्वाज् जीविताद् व्यवरोपयति मातापितरौ। एष क्लेशो भावनाहेय एव। स्रोत आपन्नस्याप्रहीण एष क्लेशः। इत्येवं वादः सर्वथायुक्तः ॥

अपि च भवतां वादः—भावनाहेयधर्मेषु विभवम् अनु रागः। एष रागो भावनाहेय एव ॥ [ 922b ] ननु स्रोत आपन्नस्याप्रहीण एष रागः। प्रतिवचनं। तथा ॥ तव किं विवक्षितं। स्रोत आपन्नस्यैतत्प्रतीत्यजो भवति रागः। प्रतिवचनं। न तथा ॥ श्रृणु मे वचनं। यदि भावनाहेयधर्मेषु विभवम् अनु रागः। एष रागो भावनाहेय एव। स्रोत आपन्नस्याप्रहीण एष रागः। तर्हि वक्तव्यः स्रोत आपन्नस्यैतत्प्रतीत्यजो भवति रागः। यदि स्रोत आपन्नस्य नैतत्प्रतीत्यजो भवति रागः। तर्हि न वक्तव्यो भावनाहेयधर्मेषु विभवम् अनु रागः। एष रागो भावनाहेय एव। स्रोत आपन्नस्याप्रहीण एष रागः। इत्येवं वादः सर्वथायुक्तः ॥



तच्चेद् युक्तम् इदमपि तथैव ॥

विभवो नाम कतमो धर्मः। प्रतिवचनं। त्रिधात्वनित्यता ॥०॥ [ विभवराग-निर्देशः परिनिष्ठितः ] ॥०॥

## ६. चेतोविमुक्तिः

भगवानाह—चित्तं रागद्वेषमोहविमुक्तं ॥ कतमच्चित्तं प्राप्नोति विमोक्षं। किं सरागद्वेषचित्तं। किं वीतरागचित्तं। प्रतिवचनं। वीतरागद्वेषमोहचित्तं प्राप्नोति विमोक्षं ॥ अपर आह—रागद्वेषमोहसंप्रयुक्तं चित्तं प्राप्नोति विमोक्षं। न स एवं वक्तुमर्हति। तत् कस्य हेतोः। नैतच्चित्तं रागद्वेषमोहैः संयुक्तं संप्रयुक्तं संकीर्णं। प्रत्युताप्रहीणरागद्वेषमोहचित्तम् अविमुक्तं। प्रहीणरागद्वेष-मोहचित्तं तु विमुक्तं ॥

भगवानवोचद्—भिक्षवो ज्ञातव्यमिदं सूर्याचन्द्रमसोर्मंडलं पंचभिरावरणैर् आवृतं न रोचते न प्रकाशते न विपुलीभवति नावदातो भवति। कतमानि पंच। प्रथमं मेघः। द्वितीयं धूमः। तृतीयं रजः। चतुर्थं मिहिका। पंचमं राहोर-सुरस्य ग्रहणं। यथा सूर्याचन्द्रमसोर्मंडलं न पंचभिरावरणैः संयुक्तं संप्रयुक्तं संकीर्णं। तदावरणमप्रहीणमिति सूर्याचन्द्रमसोर्मंडलं न रोचते न प्रकाशते न विपुलीभवति नावदातो भवति। तदावरणे प्रहीणे सूर्याचन्द्रमसोरिदं मंडलं रोचते प्रकाशते विपुलीभवति अवदातो भवति। तथा नैतच्चित्तं रागद्वेषमोहैः संयुक्तं संप्रयुक्तं संकीर्णं। प्रत्युताप्रहीणरागद्वेषमोहचित्तम् अविमुक्तं। प्रहीणरागद्वेष-मोहचित्तं तु विमुक्तं ॥

कतमच्चित्तं विमुक्तं। किमतीतं। किमनागतं। प्रतिवचनं। अनागत-मशैक्षचित्तमुत्पत्तिकाले सर्वावरणविमुक्तं। कथमिदं। प्रतिवचनं। आनन्तर्य-

मार्गे वज्रोपमसमाधौ निरुध्यमाने विमोक्षमार्गे क्षयज्ञानमुत्पद्यमानं । यदानन्तर्य-मार्गे वज्रोपमसमाधिनिरोधो विमोक्षमार्गे क्षयज्ञानोत्पादः । अथ नाम अनागत-मशैक्षचित्तं सर्वावरणविमुक्तं ॥

अविमुक्तस्य चित्तस्य वक्तव्यो विमोक्षो विमुक्तस्य[वा] चित्तस्य वक्तव्यो विमोक्षः । प्रतिवचनं । विमुक्तस्य चित्तस्य वक्तव्यो विमोक्षः ॥

यद् विमुक्तं न [तस्य] वक्तव्यो विमोक्षः । यस्य विमोक्षो न तद् वक्तव्यं विमुक्तं । विमुक्तं चित्तम् अथोच्यते विमोक्ष इत्ययुक्तं ॥

अधुना सोऽनुयोक्तव्यः । यथाह भगवान्— [ 922c ]

योरागमुदच्छिनद् अशेषं बिसपुष्पमिव सरोरुहं विगाह्य ।
स भिक्षुर्जहात्यवारपारम् उरगो जीर्णमिव त्वचं पुराणं ॥[2]

भवान् प्रतिजानाति वचनमिदं कुशलवचनं । प्रतिवचनं । तथा ॥ किं ते विवक्षितं । हीनस्योच्यते हानं । अहीनस्य[वा] उच्यते हानं । प्रतिवचनं । हीनस्योच्यते हानं । शृणु मे वचनं । यद् हीनं न [तस्य] वक्तव्यं हानं । यस्य हानं न तद् वक्तव्यं हीनं । हीनमथोच्यते [तस्य] हानम् इत्ययुक्तं ॥

पुनर्भगवानाह—

उच्छिन्नमान आत्मनि सुसमाहितः कुशलचित्तः सर्वतो विमुक्तः ।
एकाकी रहोगतो ऽप्रमत्तो ऽतिक्रम्य मृत्युमवाप्नोति पारं ॥

भवान् प्रतिजानाति वचनमिदं कुशलवचनं । प्रतिवचनं । तथा ॥ किं ते विवक्षितं । प्राप्तस्योच्यते प्राप्तिः । अप्राप्तस्य[वा] उच्यते प्राप्तिः । प्रतिवचनं । प्राप्तस्योच्यते प्राप्तिः । शृणु मे वचनं । यत् प्राप्तं न [तस्य] उच्यते प्राप्तिः । यस्य प्राप्तिर्न तद् वक्तव्यं प्राप्तं । प्राप्तमथोच्यते [तस्य] प्राप्तिर् इत्ययुक्तं ॥

तच्चेद् युक्तम् । इदमपि तथा । तस्मात्सूत्रेष्वर्थो विवेक्तव्यः । यथाह भगवान्—

मृगा अरण्यशरणा आकाशशरणाः खगाः ।
आर्या निर्वाणशरणा धर्मो विवेकशरणः ॥०॥

[चेत्तोविमुक्तिनिर्देशः परिनिष्ठितः] ॥०॥

2. सु २



## ७. आश्रयः

यथाह भगवान्—भिक्षवो ज्ञातव्यं । निर्वेदाश्रयो विरागः । विरागाश्रयो विमोक्षः । विमोक्षाश्रयं निर्वाणं[3] ॥ निर्वेदः कतमः । प्रतिवचनं । अशैक्षस्य सर्वसंस्कारेषु संवेगो विदूषणा विहेठनं प्रतिकूलता—इति निर्वेदः । निर्वेदाश्रयो विरागः कतमः । निर्वेदसंप्रयुक्तस्यारागो ऽसंरागो ऽद्वेषो ऽसंद्वेषो मोहो ऽसंमोहश्चेति कुशलमूलानीति निर्वेदाश्रयो विरागः । विरागाश्रयो विमोक्षः कतमः । प्रतिवचनं । विरागसंप्रयुक्तस्य चेतसो ऽधिमुक्तिर् अधिमुच्यमानता अधिमोक्ष्यमाणता । इति विरागाश्रयो विमोक्षः । विमोक्षाश्रयं निर्वाणं कतमत् । रागस्यात्यन्तं प्रहाणं । द्वेषस्यात्यन्तं प्रहाणं । मोहस्यात्यन्तं प्रहाणं । सर्वक्लेशस्यात्यन्तं प्रहाणं । इति विमोक्षाश्रयं निर्वाणं ॥०॥ [आश्रयनिर्देशः परिनिष्ठितः] ॥०॥

## ८. धातुः

यथाह भगवान्—त्रयो धातवः । तथा हि । प्रहाणधातुर् विरागधातुर् निरोधधातुः[4] । प्रहाणधातुः कतमः । प्रतिवचनं । स्थापयित्वा रागसंयोजनम् अन्यसंयोजनानामुच्छेदः । इति प्रहाणधातुः । विरागधातुः कतमः । प्रतिवचनं । रागसंयोजनोच्छेदः । इति विरागधातुः । निरोधधातुः कतमः । प्रतिवचनं । सर्वेतरसंयोजनानुगतधर्मसमुच्छेदः । इति निरोधधातुः ॥

सर्वः प्रहाणधातुर् विरागधातुः किं । प्रतिवचनं । तथा ॥ ननु विरागधातुरपि प्रहाणधातुः किं । प्रतिवचनं । तथा ॥ सर्वः प्रहाणधातुर् निरोधधातुः किं । प्रतिवचनं । तथा ॥ ननु निरोधधातुरपि प्रहाणधातुः किं । प्रतिवचनं । तथा ॥ सर्वो विरागधातुर् निरोधधातुः किं । प्रतिवचनं । तथा ॥ [923a] ननु निरोधधातुरपि विरागधातः किं । प्रतिवचनं । तथा ॥०॥ [ धातुनिर्देशः परिनिष्ठितः ] ॥०॥

3. तुलनीयमत्र म ३।२०, सं ३।८३
4. कोश ६।७८ इत्यत्र लक्षिताः ।

## ६. संज्ञा

यथाह भगवान्। तिस्रः संज्ञाः। प्रहाणसंज्ञा। विरागसंज्ञा। निरोधसंज्ञा॥ प्रहाणसंज्ञा कतमा। स्थापयित्वा रागसंयोजनम् अन्यसंयोजनसमुच्छेदसंजाननबुद्धिः। इति प्रहाणसंज्ञा। विरागसंज्ञा कतमा। प्रतिवचनं। रागसंयोजनसमुच्छेदसंजाननबुद्धिः। इति विरागसंज्ञा। निरोधसंज्ञा कतमा। प्रतिवचनं। सर्वेतरसंयोजनानुगतधर्मसमुच्छेदसंजाननबुद्धिः। इति निरोधसंज्ञा॥०॥ [संज्ञानिर्देशः परिनिष्ठितः]॥०॥

इति ज्ञानप्रस्थानस्य प्रथमे संकीर्णस्कन्धे पुद्गलो नाम तृतीयो निःश्वासः॥



प्रथमे संकीर्णस्कन्धे

# चतुर्थो निःश्वासः

## स्नेहगौरवम्

### उद्देशः

१स्नेहपूजनागौरवं २बलं ३निरोधो ४निर्वाणं ५स्कन्धो ६निष्ठा। ७उपादानपरिज्ञा ८त्रिशरणम् इति वर्गविवक्षितं॥

## १. स्नेहपूजनागौरवं

स्नेहः कतमः। प्रतिवचनं। स्नेहः संस्नेहः प्रीतिः संप्रीतिः प्रमोदः संप्रमोद इति स्नेहः। गौरवं कतमत्। प्रतिवचनं। गुरुषु गौरवम् ईश्वरेष्वीश्वरभावो वशिषु भयवृत्तिरिति गौरवं। स्नेहगौरवं कतमत्। प्रतिवचनं। यथा—एकत्यानां बुद्धे धर्म संघ उपाध्याय आचार्ये ऽथवापरे ये केचन प्रज्ञावन्तो गुरुकरणीयाः सब्रह्मचारिणस् तेषु स्नेहो मुदिता आत्तमनस्कता सत्कारः उपस्थानं। एतेषु स्थानेषु यः स्नेहो यच्च गौरवं तत् स्नेहगौरवं नाम॥

पूजना कतमा। प्रतिवचनं। एषा द्विविधा। आमिषपूजना प्रथमा। धर्मपूजना द्वितीया। सत्कारः कतमः। प्रतिवचनं। सत्करणीयेषु सत्कार ईश्वरेष्वैश्वर्यं वशिषु भयवृत्तिरिति सत्कारः। पूजनासत्कारं कतमत्। प्रतिवचनं। यथा—एकत्यानां बुद्धे धर्म संघ उपाध्याय आचार्ये ऽथ चापरे ये केचन प्रज्ञावन्तो गुरुकरणीयाः सब्रह्मचारिणस् तेषु निर्यातनं पूजना सत्कार उपस्थानं। एतेषु स्थानेषु या पूजना यश्च सत्कारस् तत् पूजनासत्कारं नाम॥०॥ [स्नेहपूजनागौरवनिर्देशः परिनिष्ठितः]॥०॥

## २. बलं

कायबलं कतमत्। प्रतिवचनं। कायस्य शौर्यम् आतापित्वं दृढता स्थिरता लघुता पटुता विवेकक्षमता। इति कायबलं। कायदौर्बल्यं कतमत्। कायस्याशौर्यम् अनातापित्वम् अदृढता अस्थिरता [ 923b ] अलघुता अपटुता विवेकाक्षमता। इति कायदौर्बल्यं ॥

कायबलाबलयोः कत्यायतनेषु संग्रहः कतिविज्ञानैर्विजाननं। प्रतिवचनं। एकस्मिन्नायतने संग्रहः। तथा हि। स्पर्शायतने। द्वाभ्यां विज्ञानाभ्यां विजाननं। तथा हि। कायविज्ञानेन मनोविज्ञानेन च। यथा मल्लयोर् मिथोमुष्टिप्रहारकाले मुष्टिसंयोगमात्रकेण परस्परबलाबलविजाननं। यथा वा बलवतो दुर्बलस्य ग्रहणकाले परस्परबलाबलविजाननं। इदमपि तथा ॥०॥ [ बलनिर्देशः परिनिष्ठितः ] ॥०॥

## ३. निरोधः

प्रतिसंख्यानिरोधः कतमः। प्रतिवचनं। सर्वो विसंयोजनो निरोधः[1]। अप्रतिसंख्यानिरोधः कतमः। प्रतिवचनं। सर्वो ऽविसंयोजनो निरोधः[2]। अनित्यनिरोधः कतमः। प्रतिवचनं। सर्वसंस्काराणां विकिरणं क्षयो भंगो विलयो नाशो निवृत्तिः। इत्यनित्यनिरोधः ॥

अप्रतिसंख्यानिरोधानित्यनिरोधयोः को भेदः। प्रतिवचनं। अप्रतिसंख्यानिरोधो न प्रतिसंख्यानबलेन मोचयति व्याधिविपत्तिशोकोपायासविविधमारकर्मलोकचरदुःखेभ्यः। न च कामरागाद् विनयति निष्कामयति। अनित्यनिरोधस्त सर्वसंस्काराणां विकिरणं क्षयो भंगो विलयो नाशो निवृत्तिः। अयमेतयोर्निरोधयोर् भेदः ॥०॥ [ निरोधनिर्देशः परिनिष्ठितः ] ॥०॥

1. कोश १।६ a-b इति तुलनीयं।
2. काश १।६ c-d इति तुलनीयं।



## ४. निर्वाणं

यथोक्तं सूत्रे—निर्वाणधातुर्द्विविधः। तथा हि। सोपादिशेषनिर्वाणधातुर्[3] निरुपादिशेषनिर्वाणधातुश्च[4]। सोपादिशेषनिर्वाणधातुः कतमः। प्रतिवचनं। अर्हतः परिक्षीणसर्वास्रवस्यापि धृतायुषो महाभूतकृतरूपसंतानानुच्छेदः। पंचेन्द्रियकायाश्रयस्य चित्तसंतानस्य प्रवृत्तिः। उपादेः शेषात् सर्वसंयोजनपरिक्षयेऽपि स्पर्शानुभवप्रतिलंभः। इति सोपादिशेषनिर्वाणधातुः। निरुपादिशेषनिर्वाणधातुः कतमः। प्रतिवचनं। अर्हतः परिक्षीणसर्वास्रवस्यायुषो निरोधे महाभूतकृतरूपसंतानोच्छेदः। पंचेन्द्रियकायाश्रयस्य चित्तसंतानस्य न पुनः प्रवृत्तिः। उपादेर्नवशेषात् सर्वसंयोजनक्षयः। इति निरुपादिशेषनिर्वाणधातुः ॥

निर्वाणं वक्तव्यं शैक्षं वा। अशैक्षं वा। नशैक्षनाशैक्षं वा। प्रतिवचनं। निर्वाणं वक्तव्यं नशैक्षनाशैक्षं ॥

केचिदाहुः। निर्वाणमस्ति शैक्षं। निर्वाणमस्त्यशैक्षं। निर्वाणमस्ति नशैक्षनाशैक्षं। शैक्षं कतमत्। तथा हि। शैक्षस्य सर्वसंयोजनक्षयलाभे स्पर्शानुभवप्रतिलंभः। अशैक्षं कतमत्। तथा हि। अशैक्षस्य सर्वसंयोजनक्षयलाभे स्पर्शानुभवप्रतिलंभः। नशैक्षनाशैक्षं कतमत्। तथा हि। सास्रवस्य सर्वसंयोजनक्षयलाभे स्पर्शानुभवप्रतिलंभः ॥

अत्रार्थे निर्वाणं वक्तव्यं केवलं नशैक्षनाशैक्षं ॥

ननु भवानाह। निर्वाणमस्ति शैक्षं। निर्वाणमस्त्यशैक्षं। निर्वाणमस्ति नशैक्षनाशैक्षं। प्रतिवचनं। तथा ॥ कस्ते ऽभिप्रायः। सर्व आदौ लौकिकमार्गेण कामरागप्रतिघप्रहाणप्रतिलंभको नशैक्षनाशैक्षविसंयोजनप्रतिलंभकः। स चतुःसत्येष्वप्राप्ताभिसमयो ऽभिसमयभावनाप्रतिलब्धाभिसमयः साक्षात्कृतानागामिफलो विपरिवर्तितो भवति शैक्षः किं। प्रतिवचनं। तथा ॥ [ 923c ] कस्ते पुनरभिप्रायः। सर्व आदौ लौकिकमार्गेण कामरागप्रतिघप्रहाणप्रतिलंभको नशैक्षनाशैक्षविसंयोजनप्रतिलंभकः। पश्चाद् अनागामिफलसाक्षात्कारकाले केवलः स विसंयोजनो विपरिवर्तितव्यः शैक्षः। यदि स इदानीं विपरिवर्तते शैक्षः

3. वि १६।७३ इत्यत्र विवृतः।
4. वि १६।७३ इत्यत्र विवृतः।

पूर्वं भवितव्यो शैक्षः स्वभावस्य नित्यावस्थानात्। असाक्षात्कृते ऽनागामिफले ऽभूते शैक्षे प्राप्तं शैक्ष इति वचनं न न्याय्यं ॥

कस्तेऽभिप्रायः। अर्हत्वाभिमुखः शैक्षः सर्वसंयोजनप्रहाणे साक्षात्करोत्यर्हत्फलं। स विपरिवर्तितो भवत्यशैक्षः किं। प्रतिवचनं। तथा ॥ कस्ते पुनरभिप्रायः। अर्हत्वाभिमुखः शैक्षः सर्वसंयोजनप्रहाणे ऽर्हत्फलसाक्षात्कारकाले केवलः स प्रहीणसंयोजनः विपरिवर्तितव्यो ऽशैक्षः। यदि स इदानीं भवत्यशैक्षः पूर्वं भवितव्यो ऽशैक्षः स्वभावस्य नित्यावस्थानात्। असाक्षात्कृते ऽर्हत्फले ऽभूते ऽशैक्षे प्राप्तम् अशैक्ष इति वचनं न न्याय्यं ॥

कस्ते ऽभिप्रायः। अर्हन् अशैक्षः क्षीणसंयोजनो ऽर्हत्फलाद् विवतनकाले स विपरिवर्तते शैक्षः किं। प्रतिवचनं। तथा ॥ कस्ते पुनरभिप्रायः। सर्वो ऽर्हन् अशैक्षः क्षीणसंयोजनो ऽर्हत्फलाद्विवर्तनकाले क्षीणसंयोजन एव स विपरिवर्तितव्यः शैक्षः। यदि स इदानीं विपरिवर्तितो भवति शैक्षः पूर्वं भवितव्यः शैक्षः स्वभावस्य नित्यावस्थानात्। अर्हत्फलाद् अविवर्तने ऽभूते शैक्षे प्राप्तं वचनं शैक्ष इति न न्याय्यं ॥

पुनः खलु। निर्वाणं न भवितव्यं पूर्वं नशैक्षनाशैक्षं पश्चाद् विपरिवर्तितं शैक्षं। पूर्वं शैक्षं पश्चाद् विपरिवर्तितम् अशैक्षं। पूर्वम् अशैक्षं पश्चाद् विपरिवर्तितं शैक्षं ॥ पुनः। निर्वाणं न भवितव्यं शैक्षवद् अशैक्षवद् नशैक्षनाशैक्षवत्। यद्येवं द्विभागं भवितव्यं। सर्वधर्माणामनियतत्वाद् भवितव्यो व्याकुलीभावः। न चापि प्रज्ञापयितव्यः सर्वधर्मलक्षणविनिश्चयः। भगवानपि नाह निर्वाणं शैक्षवदशैक्षवत्स्वभावं ॥

यस्माद् निर्वाणं सततं भवति नशैक्षनाशैक्षं। सर्वधर्मा नियता न भवन्ति संकीर्णाः। सदा तिष्ठति स्वभावो न हीयते स्वभावः। निर्वाणस्य नित्यस्थितिर्नान्यथाभावः। इति निर्वाणं केवलं वक्तव्यं नशैक्षनाशैक्षं ॥०॥ [ निर्वाणनिर्देशः परिनिष्ठितः ] ॥०॥



## ५. स्कन्धः

यथोक्तं सूत्रे। स निष्पादयत्यशैक्षं शीलस्कन्धं समाधिस्कन्धं प्रज्ञास्कन्धं विमुक्तिस्कन्धं विमुक्तिज्ञानदर्शनस्कन्धं[5] ॥ अशैक्षशीलस्कन्धः कतमः। प्रतिवचनं। अशैक्षः कायसंवरो वाग्संवरः शुद्धाजीवः। अशैक्षसमाधिस्कन्धः कतमः। प्रतिवचनं। अशैक्षास् त्रयः समाधयः। तथा हि। शून्यतः। अप्रणिहितः। अनिमित्तः। अशैक्षप्रज्ञास्कन्धः कतमः। प्रतिवचनं। अशैक्षं सम्यग्ज्ञानदर्शनं। अशैक्षविमुक्तिस्कन्धः कतमः। प्रतिवचनं। अशैक्षमनस्कारसं[ 924a ]प्रयुक्तं चित्तं विमुक्तं विमुच्यमानं विमोक्ष्यमाणं। अशैक्षविमुक्तिज्ञानदर्शनस्कन्धः कतमः। प्रतिवचनं। क्षयज्ञानम् अनुत्पादज्ञानं ॥

अशैक्षप्रज्ञास्कन्ध—विमुक्तिज्ञानदर्शनस्कन्धयोः को भेदः। प्रतिवचनं। अशैक्षदुःखसमुदयज्ञानम् अशैक्षप्रज्ञास्कन्धः। अशैक्षनिरोधमार्गज्ञानम् अशैक्षविमुक्तिज्ञानदर्शनस्कन्धः। पुनः। अशैक्षदुःखसमुदयनिरोधज्ञानम् अशैक्षप्रज्ञास्कन्धः। अशैक्षमार्गज्ञानम् अशैक्षविमुक्तिज्ञानदर्शनस्कन्धः। पुनः खलु। अशैक्षदुःखसमुदयमार्गज्ञानम् अशैक्षप्रज्ञास्कन्धः। अशैक्षनिरोधज्ञानम् अशैक्षविमुक्तिज्ञानदर्शनस्कन्धः। इति भेदः ॥०॥ [ स्कन्धनिदशः परिनिष्ठितः ] ॥०॥

## ६. निष्ठा

यथाह भगवान्। भिक्षवो ज्ञातव्यम् एकैव निष्ठा न पृथग्निष्ठा[6] ॥ अत्र कतमो धर्मो निष्ठा नाम। प्रतिवचनं। भगवतः कदाचिद् मार्गे निष्ठावचनं कदाचिद् निरोधे निष्ठावचनं। मार्गे निष्ठावचनरुतं। यथाह भगवान्—

कश्चिन्मन्दमतिर्निष्ठां परिज्ञातुमपारगः।
अदान्तः कुरुते कालं मार्गे ऽभिसमयं विना ॥

---

5. सं १।९९, अं १।१६२ इत्येवमादि द्रष्टव्यं।

6. एका हावुसो निट्ठा, न पुथू निट्ठा ति [ म १।६४ ] इति चूलसीहनादसुत्ते।

निरोधे निष्ठावचनरुतं। यथाह भगवान्—

निष्ठां प्राप्तो गतभयो वीतकांक्षानुशोचनः।
चिरायोद्धृतभवशरोऽन्त्येन कायेन तिष्ठति॥
एतदत्यन्तनिष्ठं तत्पदं शान्तेरनुत्तरं।
पदं विशुद्धममृतं सर्वतो लक्षणक्षयात्॥

अपि चोक्तं सूत्रे—गणको मौद्गल्यायनो ब्राह्मणो भगवन्तमेतदवोचत्। किं नु खलु भवतो गौतमस्य श्रावका भवता गौतमेन एवम् अवोद्यमाना अनुशास्यमाना सर्वे एव अत्यन्तनिष्ठं निर्वाणम् आराधयन्ति उताहो एकत्या नाराधयन्ति। (भगवान् प्रत्यवोचत्)। एकत्या......आराधयन्ति। एकत्या नाराधयन्ति[7] ॥०॥ [निष्ठानिर्देशः परिनिष्ठितः] ॥०॥

## ७. उपादानपरिज्ञा

यथोक्तं सूत्रे। भगवानाह। सन्ति भिक्षव एके श्रमणब्राह्मणाः सर्वोपादानपरिज्ञावादाः प्रतिजानानास्ते न सर्वोपादानपरिज्ञां प्रज्ञापयन्ति। (तथा हि)। कामोपादानस्य परिज्ञां प्रज्ञापयन्ति। दृष्ट्युपादानस्य [परिज्ञां प्रज्ञापयन्ति] शीलव्रतोपादानस्य [परिज्ञां प्रज्ञापयन्ति] नत्वात्मवादोपादानस्य [परिज्ञां प्रज्ञापयन्ति][8] ॥

एतस्य कोऽर्थः। कश्चिदाह। एतद्भगवतः प्रतिक्षेपतो[9] धर्मवचनं॥ न स एवं वक्तुमर्हति। तत्कस्य हेतोः। भगवतो धर्मवचनं न सर्वथा भवत्यहेतुकम् अल्पहेतुकं वा॥ पुनरपर आह। एतेन वचनेनाविर्भवति यत्ते स्वल्पप्रहाणांशकाः॥ न स एवं वक्तुमर्हति। तत्कस्य हेतोः। यस्मात् पृथग्जना अपि प्रतिबलाः क्षपयितुमल्पांशत आत्मवादोपादानं॥

बुद्धो हि [924b] भगवान् देवमनुष्यादीनाम् अप्रमेयाणां सत्त्वानां विस्तरेण वदति धर्मसारम् अविपर्यस्तं प्रकाशयति सान्वयाधिगमाय। तीर्थिकाश्चौर्येण

7. गणकमोग्गल्लानसुत्तं १०७ [म ३।१-७] इत्यत्र चतुर्थपृष्ठस्य २१-२८ पंक्तिषु यथारुतम् अस्य संदर्भसाम्यं दृश्यते।

8. म १।६६ इत्यत्र सर्वोऽयं संदर्भो दृश्यते।

9. प्रतिक्षेपतः=त्वरया=नात्यन्तं विचार्य—इति यावत्।



शृण्वन्ति बुद्धभाषितं। स्कन्धधात्वायतननीवरणस्मृत्युपस्थानानां यावद् बोध्यंगादीनां नामानि सकलानि वा विकलानि वा। इति कश्चन तीर्थिकः कामोपादानपदं श्रुत्वा पुनरेवमाह—अहमपि प्रज्ञापयामि कामोपादानपरिज्ञां। कश्चिद् दृष्ट्युपादानपदं श्रुत्वा पुनरेवमाह—अहमपि प्रज्ञापयामि दृष्ट्युपादान परिज्ञां। कश्चित् शीलोपादानपदं श्रुत्वा पुनरेवमाह—अहमपि प्रज्ञापयामि शीलोपादानपरिज्ञां। एवं संबहुलेषु भिक्षुष्वेकत्र संनिपतितेष्वन्यतरस्तीर्थिकः समुपक्रम्याह। यथा गौतमः सर्वशिष्येभ्यो धर्मसारं देशयति। तथा हि। एवमाह—

भिक्षवो युष्माभिः प्रहातव्यानि पंच नीवरणानि। एवम् एतानि पंच नीवरणानि चेतोमलिनीकराणि क्षपयन्ति प्रज्ञाबलं। नाशयन्ति बोध्यंगानि। अन्तरयन्ति निर्वाणं। चतुर्षु स्मृत्युपस्थानेषु कौशल्येन चित्तं स्थापनीयं। सप्त बोध्यंगानि यत्नेन पुनपुनर्भावयितव्यानि॥ वयमपि प्रतिबलाः शिष्येभ्यो देशयितुमेतद्धर्मसारं। तद् गौतमेन देशिते धर्मसारे ऽस्मदीये च को भेदो यदिदानीं यूयं तमेवाश्रयथ। परं ते तीर्थिका न प्रतिबला पंचनीवरणनामलक्षणविज्ञानाय किमुतावबोधाय चतुःस्मृत्युपस्थानेष्ववस्थानाय सप्तबोध्यंगभावनाय। परम् अपहरन्ति बुद्धवचनं यस्माद् वदन्ति तस्मादेवं। उपादानपरिज्ञाप्रज्ञापनमपि तथैव ज्ञातव्यं॥

पुनस्तथाहि। तीर्थिको मागन्दिको[10] ऽनवबुध्यन् स्वकायं रोगराशिसमुदयं क्षणमप्यनवस्थायिनं दुःखं शून्यमनात्मानं भगवन्तमुपसंक्रम्य दुन्दुभिवदुदरं ताडयन्नुवाच। अयमेव मे कायो निरामयो ज्ञातव्यः परमनिर्वाणं[11]। स न जानाति निरामयनामलक्षणं। किं पुनर्नाम प्रतिबलः परिबोद्धुं परमनिर्वाणं। यस्मात्खलु बुद्धवचनमपहरति तस्मादेवं वदति। उपादानपरिज्ञाप्रज्ञापनमपि तथा॥

10. अत्र विस्तरेण मागन्दियसुत्तं ७५ [म १।५०१-५१३] द्रष्टव्यं।

11. अत्र तुलनीयं—यं पन ते एतं मागन्दिय सुतं पुब्बकानं परिब्बाजकानं आचरियपाचरियानं भासमानानं 'आरोग्यपरमा लाभा, निब्बानं परमं सुख' ति, कतमं तं आरोग्यं, कतमं तं निब्बानं ति। एवं वुत्त मागन्दियो परिब्बाजको सकानेव सुदं गत्तानि पाणिना अनोमज्जति—इदं तं भो गोतम आरोग्यं, इदं तं निब्बानं। अहं हि भो गोतम एतरहि अरोगो सुखी, न मं किंचि आबाधतीति [म १।५०९] इति।

कस्मात् तीर्थिकाः केवलं त्रयाणामुपादानानां परिज्ञां प्रज्ञापयन्ति नत्वात्मवादोपादनस्य। प्रतिवचनं। तेषां दीर्घरात्रं भवत्यभिनिवेशः सत्यभूत आत्मा सत्त्वो जीवो जन्तुः पोषः पुद्गलः। तेषां भवति योऽयम् आत्मादिसत्याभिनिवेशो न पुनर् आत्मवादोपादानपरिज्ञाप्रज्ञापनं॥

आह। समानं प्रज्ञापयन्ति सर्वोपादानपरिज्ञां। अस्य कोऽर्थः। प्रतिवचनं। एतद् भगवतो बुद्धस्य परवचनानुवादः। यथाह भगवान्—ते तीर्थिकाः प्रज्ञापयन्ति सत्यभूतस्य सत्त्वस्य समुच्छेदमिति। परं न परमार्थतः सत्यभूतः सत्त्वः। केवलं परवचनमनुसृत्यैवमुच्यते। इदमपि तथा। इति नास्ति कश्चिद्दोषः॥

यथोक्तं सूत्रे। द्वे परिज्ञे। तथा हि। ज्ञातपरिज्ञा[12] प्रहाणपरिज्ञा च[13]॥ ज्ञातपरिज्ञा कतमा। प्रतिवचनं। सर्वं ज्ञानं पश्यति प्रकाशयति बोधयति [924c] साक्षात्करोतीति ज्ञातपरिज्ञा। प्रहाणपरिज्ञा कतमा। सर्वकामविवेकः। क्रोधमोहविवेकः। सर्वक्लेशविवेकः। इति प्रहाणपरिज्ञा॥

भगवतः कदाचिद् ज्ञाने परिज्ञावचनरुतं। कदाचित् प्रहाणे परिज्ञावचनरुतं। ज्ञाने परिज्ञावचनरुतं। यथोक्तं गाथासु—

एष माणवको भद्रः शान्तो लोकहिते क्षमः।
तृष्णाजं दुःखमित्येतत् परिज्ञातुं प्रभुर्बुधः॥
यद् वदेत् तद् बुधः कुर्याद् यन्न कुर्यान्न तद्वदेत्।
प्राज्ञेन च परिज्ञेयः कथको यो न कारकः॥

प्रहाणे परिज्ञावचनरुतं। यथोक्तं सूत्रे। भगवानाह। देशयिष्यामि वो भिक्षवः परिज्ञेयधर्मान् परिज्ञास्वाभावं परिज्ञाप्रतिबलं। परिज्ञेयधर्माः पंचोपादानस्कन्धाः। परिज्ञास्वभावः। कामविवेकः। क्रोधमोहविवेकः। सर्वक्लेशविवेकः। परिज्ञाप्रतिबलो ऽर्हन् सर्वास्रवाणां पर्यादानं गतो ऽनभिनिविष्टस् तथागतो भवति परंमरणादित्याद्यव्याकृतधर्मान्॥०॥ [उपादानपरिज्ञानिर्देशः परिनिष्ठितः]॥०॥

---

12. वि २२।१०६
13. वि २२।१०८



# ८. त्रिशरणं

सर्वो बुद्धशरणं गच्छन् किं शरणं गच्छति। प्रतिवचनं। यो धर्मा वस्तुभूतो विद्यमानभूतस् तं संज्ञायानुसंज्ञाय प्रज्ञाप्य व्यवहारो बुद्ध इति। शरणमसौ गच्छति सर्वाशैक्षनिष्पन्नबोधिधर्मान्। इति बुद्धशरणागमनं[14]॥

सर्वो धर्मशरणं गच्छन् किं शरणं गच्छति। प्रतिवचनं। यो धर्मा वस्तुभूतो विद्यमानभूतस् तं संज्ञायानुसंज्ञाय प्रज्ञाप्य व्यवहारो धर्म इति। शरणं तथा गच्छति विरागं निरोधं निर्वाणं। इति धर्मशरणगमनं॥

सर्वः संघशरणं गच्छन् किं शरणं गच्छति। प्रतिवचनं। यो धर्मा वस्तुभूतो विद्यमानभूतस् तं संज्ञायानुसंज्ञाय प्रज्ञाप्य व्यवहारः संघ इति। शरणम् असौ गच्छति सर्वशैक्षाशैक्षनिष्पन्नसंघधर्मान्। इति संघशरणगमनं॥०॥ [त्रिशरणनिर्देशः परिनिष्ठितः]॥०॥

इति ज्ञानप्रस्थानस्य प्रथमे संकीर्णस्कन्धे स्नेहगौरवं नाम चतुर्थो निःश्वासः॥

---

14. आह शास्त्रे। यो बुद्धं शरणं गच्छति। अशैक्षान् असौ बुद्धकरान् धर्मान् शरणं गच्छति—इत्यशैक्षधर्मान् एवाधारयति। [स्फु ३७८]

प्रथमे संकीर्णस्कन्धे

# पंचमो निःश्वासः

### आह्रीक्यम्

### उद्देशः

१कृष्णशुक्लं २द्वीन्द्रियं ३चित्तं ४औद्धत्यकौकृत्यं ५स्त्यानमिद्धं ६स्वप्नः ।
७नीवरणं ८अविद्या ९आवेणिकम् इति वर्गविवक्षितं ॥

## १. कृष्णशुक्लं

आह्रीक्यं कतमत् । प्रतिवचनं । सर्वाह्रीका । अह्रीका स्वतः । अह्रीका परतः । अह्रेपणं । अह्रेपणं स्वतः । अह्रेपणं परतः । अगौरवं । अगुरुभावः । अनैश्वर्यं । अनीश्वरभावः । ईश्वरेषु न भयवृत्तिः । इत्याह्रीक्यं ॥

अनपत्राप्यं कतमत् । प्रतिवचनं । सर्वानपत्रपा । अनपत्रपा स्वतः । अनपत्रपा परतः । अलज्ज़ा । अलज्ज़ा स्वतः । [ 925a ] अलज्ज़ा परतः । सर्वावद्येषु न भयं न भीतिर्न भयदर्शनं । इत्यनपत्राप्यं ॥

आह्रीक्यानपत्राप्ययोः को भेदः । प्रतिवचनं । ईश्वरेषु न भयवृत्तिरित्याह्रीक्यं । सर्वावद्येषु न भयदर्शनमित्यनपत्राप्यं । इति भेदः ॥

ह्रीः कतमा । प्रतिवचनं । सर्वा ह्रीः । ह्रीः स्वतः । ह्रीः परतः । ह्रेपणं । ह्रेपणं स्वतः । ह्रेपणं परतः । गौरवं । गुरुभावः । ऐश्वर्यं । ईश्वरभावः । ईश्वरेषु भयवृत्तिः । इति ह्रीः ॥

अपत्रपा कतमा । प्रतिवचनं । सर्वापत्रपा । अपत्रपा स्वतः । अपत्रपा परतः । लज्ज़ा । लज्जा स्वतः । लज्जा परतः । सर्वावद्येषु भयं भीतिर् अतीवभयदर्शनं । इत्यपत्रपा ॥

ह्य्‌पत्रपयोः को भेदः । प्रतिवचनं । ईश्वरेषु भयवृत्तिर्ह्रीः । सर्वावद्येष्वतीवभयदर्शनमपत्रपा । इति भेदः ॥०॥ [ कृष्णशुक्लनिर्देशः परिनिष्ठितः ] ॥०॥



## २. द्वीन्द्रियं

अधिमात्रमकुशलेन्द्रियं कतमत् । प्रतिवचनं । सर्वमकुशलेन्द्रियं कुशलेन्द्रियाच्छेदक्षमं कामरागप्रहाणकाले पूर्वं प्रहातव्यं ॥ मृदु[1] सर्वत्रगमकुशलेन्द्रियं कतमत् । प्रतिवचनं । सर्वमकुशलेन्द्रियं कामरागप्रहाणकाले पश्चात्प्रहातव्यं । यस्मात् तत्प्रहाणं नाम कामरागप्रहाणं ॥

कामधातुकमधिमात्रं कुशलेन्द्रियं कतमत् । प्रतिवचनं । बोधिसत्त्वस्य सम्यक्त्वन्यामावक्रान्तिकाले प्राप्तव्यं कामधातुकमभिसमयान्तिकं संवृतिज्ञानं । तथागतस्य च क्षयज्ञानोपलब्धिकाले प्राप्तव्यानि कामधातुकानि कुशलेन्द्रियाणि—अलोभो ऽद्वेषो ऽमोहश्चेति ॥ मृदु सर्वत्रगं कुशलेन्द्रियं कतमत् । प्रतिवचनं । कुशलेन्द्रियप्रहाणकाले पश्चात्प्रहातव्यमिन्द्रियं । यस्मात् तत्प्रहाणं नाम कुशलेन्द्रियप्रहाणं ॥०॥ [ द्वीन्द्रियनिर्देशः परिनिष्ठितः ] ॥०॥

## ३. चित्तं

सर्वं चित्तमतीतं । तच्चित्तं विपरिणतं किं । प्रतिवचनं । सर्वं चित्तमतीतं । तच्चितं विपरिणतं । अस्ति चित्तं विपरिणतं तच्चित्तं नातीतं । तद्यथा । अनागतप्रत्युत्पन्नं रागद्वेषसंप्रयुक्तं चित्तं ॥ यथाह भगवान्[2] —क्रकचेन चेदपि भिक्षवश्चौरा द्वेषिणो युष्माकं कायमंगांगानि वा अवकृन्तेयुर्यूयं तस्मिन् कुरुताविपरिणतं चित्तम् अनुरक्षत वाचं न निःसारयत पापिकां वाचं । चित्तं विपरिणतं वाचा च पापिका विनिःसृता चेद् आत्मार्थस्य भवति महदन्तराय । पुनराह भगवान्—ये उत्तमाश्छन्दास्[3] स्तत्रापि यूयं भिक्षवो नोत्पादयितव्यं विपरिणतं चित्तं ॥

सर्वं चित्तं रक्तं । तच्चितं विपरिणतं किं । प्रतिवचनं । सर्वं चित्तं रक्तं । तच्चित्तं विपरिणतं । अस्ति चित्तं विपरिणतं । तच्चित्तं न रक्तं ।

---

1. सूक्ष्मम् इति यथारुतं ।
2. ककचूपसुत्तं २१ [ म १।१२९ ] इह द्रष्टव्यं
3. छन्दविषया इति यथारुतं ।

तद्यथा। अतीतं रागविप्रयुक्तं चित्तं। अनागतप्रत्युत्पन्नं द्वेषसंप्रयुक्तं चित्तं। यथाह भगवान्—क्रकचेन चेदपि भिक्षवश्चौरा द्वेषिणः [925b] यावत् आत्मार्थस्य भवति महदन्तराय ॥०॥ [ चित्तनिदशः परिनिष्ठितः ] ॥०॥

## ४. औद्धत्यकौकृत्यं

औद्धत्यं कतमत्। प्रतिवचनं। सर्वं चित्तम् अशान्तम् अस्थिरं द्रुतं भ्रान्तम् उद्धतं। चित्तचलभ्रान्तता औद्धत्यमुच्यते। कौकृत्यं कतमत्। प्रतिवचनं। सर्वं चित्तमनुतप्तं क्षुब्धं विपरिणतं कुकृतं। चित्तानुशोचनता कौकृत्यमुच्यते ॥

सर्वम् उद्धतं चित्तं। तच्चित्तं कौकृत्यसंप्रयुक्तं किं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। अस्ति चित्तम् औद्धत्यसहितं न कौकृत्यसंप्रयुक्तं। तद्यथा। कौकृत्यरहितं चित्तं चलभ्रान्ततासहितं। अस्ति चित्तं कौकृत्यसहितं नौद्धत्यसंप्रयुक्तं। तद्यथा। रागरहितं चित्तम् अनुशोचनतासहितं। अस्ति चित्तम् औद्धत्यसहितं कौकृत्यसंप्रयुक्तमपि। तद्यथा। रक्तं चित्तमनुशोचनतासहितं। अस्ति चित्तम् औद्धत्यरहितं न कौकृत्यसंप्रयुक्तमपि। तद्यथा। स्थापयित्वा पूर्वलक्षणं ॥०॥ [ औद्धत्यकौकृत्यनिर्देशः परिनिष्ठितः ] ॥०॥

## ५. स्त्यानमिद्धं

स्त्यानं कतमत्। प्रतिवचनं। सर्वा कायगुरुता चित्तगुरुता कायस्यापटुता कायप्रस्वापः चित्तप्रस्वापः कायस्तब्धता चित्तस्तब्धता चित्तस्य गुरुजडीभाव इति स्त्यानं। मिद्धं कतमत्। सर्वं चित्तं निद्रितं तन्द्रितं स्तिमितं लीनम् अथापि प्रवृत्तं। चित्तस्यैतस्य तमोऽभिसंक्षेपता—इति मिद्धं ॥

सर्वं चित्तं स्त्यानसहितं। तच्चितं मिद्धसंप्रयुक्तं किं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। अस्ति चित्तं स्त्यानसहितं न मिद्धसंप्रयुक्तं। तद्यथा। मिद्धरहितं चित्तं स्त्यानतासहितं। अस्ति चित्तं मिद्धसहितं न स्त्यानसंप्रयुक्तं। तद्यथा। अरक्तं चित्तं मिद्धतासहितं। अस्ति चित्तं स्त्यानसहितं मिद्धसंप्रयुक्तमपि। तद्यथा। रक्तं चित्तं मिद्धतासहितं। अस्ति चित्तं स्त्यानरहितं न मिद्धसंप्रयुक्तं। तद्यथा। स्थापयित्वा पूवलक्षणं ॥



मिद्धं वक्तव्यं कुशलं किं। अकुशलं किं। अव्याकृतं किं। प्रतिवचनं। मिद्धं वक्तव्यं कुशलं वा। अकुशलं वा। अव्याकृतं वा॥ कुशलं कतमत्। तद्यथा। कुशलं चित्तं निद्रितं तन्द्रितं स्तिमितं लीनम् अथापि प्रवृत्तं। चित्तस्यैतस्य तमोऽभिसंक्षेपता। अकुशलं कतमत्। तद्यथा। अकुशलं चित्तं निद्रितं तन्द्रितं स्तिमितं लीनम् अथापि प्रवृत्तं। चित्तस्यैतस्य तमोऽभिसंक्षेपता। अव्याकृतं कतमत्। तद्यथा। अव्याकृतं चित्तं निद्रितं तन्द्रितं स्तिमितं लीनम् अथापि प्रवृत्तं। चित्तस्यैतस्य तमोऽभिसंक्षेपता ॥०॥ [ स्त्यानमिद्धनिर्देशः परिनिष्ठितः ] ॥०॥

## ६. स्वप्नः

स्वप्ने[4] वक्तव्या पुण्यवृद्धिः किं। अपुण्यवृद्धिः किं। नपुण्यनापुण्यवृद्धिः किं। प्रतिवचनं। स्वप्ने वक्तव्या पुण्यवृद्धिर्वा। अपुण्यवृद्धिर्वा। नपुण्यनापुण्यवृद्धिर्वा। पुण्यवृद्धिः। यथा स्वप्ने दानक्रियापुण्यं विरतिशीलसमादानम् अन्यतरपुण्यसंतानप्रवर्तनं वा। अपुण्यवृद्धिः। यथा स्वप्ने प्राणातिपातो ऽदत्तादानं काममिथ्याचारो मृषावादो मद्यपानम् ऽन्यतरस्यापुण्यसंतानस्य प्रवर्तनं वा। नपुण्य[925c]नापुण्यवृद्धिः। यथा स्वप्ने नपुण्यनापुण्यसंतानप्रवर्तनं ॥

स्वप्नो नाम कतमो धर्मः। निद्राकाले चित्तचैतसिकधर्माणामालंबने प्रवृत्तिः। सो ऽवबुद्धो ऽनुस्मरन् प्रतिबलस्तदाख्यातुम् अहमपश्यमेवं वस्तु। इति स्वप्नः ॥०॥ [ स्वप्ननिर्देशः परिनिष्ठितः ] ॥०॥

4. ब्रह्मजालसुत्ते स्वप्नस्य फलाफलविचारस् तिरश्चीनविद्यासु गणितः। तद्यथा। एके...... तिरच्छानविज्जाय...जीवितं कप्पेन्ति। सेय्यथीदं। अंगं, निमित्तं, उप्पातं, सुपिनं, लक्खणं, मूसिकच्छिन्नं, अग्गिहोमं, दब्बिहोमं ति [ दी १।९ ] इति।

## ७. नोवरणं

यथोक्तं सूत्रे। अस्ति पंच नोवरणानि॥ पंचनोवरणसंगृहीतं सर्वं नीवरणं। सर्वनीवरणसंगृहीतानि वा पंच नीवरणानि। प्रतिवचनं। सर्वनीवरणसंगृहीतानि पंच नीवरणानि। न तु पंचनीवरणसंगृहीतं सर्वं नीवरणं॥

असंगृहीतं कतमत्। प्रतिवचनं। अविद्यानीवरणं। यथाह भगवान्—

अविद्यानिवृताः सत्त्वास्तृष्णासंयोजनाश्[5] च ते।
यान्ति विज्ञानकायं तद्यथा मूढास्तथा बुधाः॥

सर्वं नीवरणं तद् निवृतं किं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। संति नीवरणान्यनिवृतानि। तद्यथा। अतीतानागतानि पंच नीवरणानि। सन्ति निवृता अनीवरणाः। तद्यथा। स्थापयित्वा पंच नीवरणानि सर्वेऽन्ये क्लेशोपक्लेशाः प्रत्युत्पन्नाभिमुखाः। संति नीवरणानि निवृतान्यपि। तद्यथा। पंचनीवरणानाम् अन्यतरत् प्रत्युत्पन्नाभिमुखं। अस्त्यनीवरणमनिवृतमपि। तद्यथा। वर्जयित्वा पूर्वलक्षणं॥०॥ [नीवरणनिर्देशः परिनिष्ठितः]॥०॥

## ८. अविद्या

सर्वः कामधातुप्रतिसंयुक्तो ऽविद्यानुशयः। सर्वेण स किमकुशलः। प्रतिवचनं। सर्वोऽकुशलो ऽविद्यानुशयः सर्वेण कामधातुप्रतिसंयुक्तः। अस्ति कामधातुप्रतिसंयुक्तो ऽविद्यानुशयो नाकुशलः। तद्यथा। कामधातुप्रतिसंयुक्ता सत्कायदृष्ट्यन्तग्राहदृष्टिसंप्रयुक्ता ऽविद्या॥

सर्वो रूपारूप्यधातुप्रतिसंयुक्तो ऽविद्यानुशयः। सर्वेण स किमव्याकृतः। प्रतिवचनं। सर्वो रूपारूप्यधातुप्रतिसंयुक्तो ऽविद्यानुशयः सर्वेणाव्याकृतः। अस्त्यव्याकृतो ऽविद्यानुशयो न रूपारूप्यधातुप्रतिसंयुक्तः। तद्यथा। कामधातुप्रतिसंयुक्ता सत्कायदृष्ट्यन्तग्राहदृष्टिसंप्रयुक्ता ऽविद्या॥ दुःखसमुदयदर्शनहेयो ऽविद्यानुशयः स सर्वः सर्वत्रगः किं। प्रतिवचनं। सर्वः सर्वत्रगो ऽविद्यानुशयो दुःखसमुदयदर्शनहेयः। अस्ति दुःखसमुदयदर्शनहेयो ऽविद्यानुशयो न सर्वत्रगः। तद्यथा। दुःखसमुदयदर्शनहेयैर् असर्वत्रगानुशयैः संप्रयुक्ता ऽविद्या॥ सर्वो

5. मा १७।२८, मात्र p. 328



निरोधमार्गदर्शनहेयो ऽविद्यनुशयः स सवणासर्वत्रगः किं। प्रतिवचनं। सर्वो निरोधमार्गदर्शनहेयो ऽविद्यानुशयः सर्वेणासर्वत्रगः। अस्त्यसर्वत्रगा ऽविद्यानुशयो न निरोधमार्गदर्शनहेयः। तद्यथा। दुःखसमुदयदर्शनहेयैर् असर्वत्रगैर् अनुशयैः संप्रयुक्ता ऽविद्या॥०॥ [अविद्यानिर्देशः परिनिष्ठितः]॥

## ९. आवेणिकं

आवेणिको ऽविद्यानुशयः कतमः। प्रतिवचनं। सर्वा ऽविद्या। दुःखे ऽनवबोधः समुदयनिरोधमार्गेष्वनवबोधः॥ आवेणिकम् औद्धत्यपर्यवस्थानं कतमत्। प्रतिवचनं। नास्त्यावेणिकम् औद्धत्यपर्यवस्थानं॥०॥ [आवेणिकनिर्देशः परिनिष्ठितः]॥०॥ [926a]

इति ज्ञानप्रस्थानस्य प्रथमे संकीर्णस्कन्ध आह्रीक्यं नाम पंचमो निःश्वासः॥

प्रथमे संकीर्णस्कन्धे

## षष्ठो निःश्वासः

लक्षणम्

उद्देशः

१(१)द्वि(२)त्रिलक्षणसामान्यविशेषो २जरामरणानित्यताबलं ।
३त्रिलक्षणमेकक्षणम् इति वर्गविवक्षितं ॥

## १. (१) द्विलक्षणसामान्यविशेषः

रूपिणां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं रूपिण्यः किम् अरूपिण्यः। प्रतिवचनं। वक्तव्या अरूपिण्यः। अरूपिणां धर्माणां जातिस्थिति-जराऽनित्यता वक्तव्याः किम् अरूपिण्यः किं रूपिण्यः। प्रतिवचनं। वक्तव्या अरूपिण्यः ॥

सनिदर्शनानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं सनिदर्शनाः किम् अनिदर्शनाः। प्रतिवचनं। वक्तव्या अनिदर्शनाः। अनिदर्शनानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किम् अनिदर्शनाः किं सनिदशनाः। प्रतिवचनं। वक्तव्या अनिदर्शनाः ॥

सप्रतिघानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं सप्रतिघाः किम् अप्रतिघाः। प्रतिवचनं। वक्तव्या अप्रतिघाः। अप्रतिघानां धर्माणां जातिस्थिति-जराऽनित्यता वक्तव्याः किम् अप्रतिघाः किं सप्रतिघाः। प्रतिवचनं। वक्तव्या अप्रतिघाः ॥

सास्रवाणां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं सास्रवाः किम् अनास्रवाः। प्रतिवचनं। वक्तव्याः सास्रवाः। अनास्रवाणां धर्माणां जाति-स्थितिजराऽनित्यता वक्तव्याः किम् अनास्रवाः किं सास्रवाः। प्रतिवचनं। वक्तव्या अनास्रवाः ॥

संस्कृतानां धर्माणां जातिस्थितिजराऽनित्यताः वक्तव्याः किं संस्कृताः



किम् असंस्कृताः। प्रतिवचनं। वक्तव्याः संस्कृताः। असंस्कृतानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किम् असंस्कृताः किं संस्कृताः। प्रतिवचनं। वक्तव्या असंस्कृतधर्माणां न सन्ति जातिस्थितिजराऽनित्यताः ॥

## १. (२) त्रिलक्षणसामान्यविशेषः

अतीतानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किम् अतीताः किम् अनागताः किं प्रत्युत्पन्नाः। प्रतिवचनं। वक्तव्या अतीताः। अनागतानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किम् अनागताः किम् अतीतप्रत्युत्पन्नाः। प्रतिवचनं। वक्तव्या अनागताः। प्रत्युत्पन्नानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं प्रत्युत्पन्नाः किम् अतीतानागताः। प्रतिवचनं। वक्तव्याः प्रत्युत्पन्नाः ॥

कुशलानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं कुशलाः किम् अकुशलाः किम् अव्याकृताः। प्रतिवचनं। वक्तव्याः कुशलाः। अकुशलानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किम् अकुशलाः किं कुशलाव्याकृताः। प्रतिवचनं। वक्तव्या अकुशलाः। अव्याकृतानां धर्माणां जातिस्थितिजरानित्यता वक्तव्याः किम् अव्याकृताः किं कुशलाकुशलाः। प्रतिवचनं। वक्तव्या अव्याकृताः ॥

कामधातुप्रतिसंयुक्तानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं कामधातुप्रतिसंयुक्ताः किं रूपधातुप्रतिसंयुक्ताः किम् आरूप्यधातुप्रतिसंयुक्ताः। प्रतिवचनं। वक्तव्याः कामधातुप्रतिसंयुक्ताः। रूपधातुप्रतिसंयुक्तानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं रूपधातुप्रतिसंयुक्ताः किं कामारूप्यधातु-प्रतिसंयुक्ताः। प्रतिवचनं। वक्तव्या रूपधातुप्रतिसंयुक्ताः। आरूप्यधातुप्रति-संयुक्तानां धर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किम् आरूप्यधातुप्रति-संयुक्ताः किं कामरूपधातुप्रतिसंयुक्ताः। वक्तव्या आरूप्यधातुप्रतिसंयुक्ताः ॥

शैक्षधर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः [926b] किं शैक्षाः किम् अशैक्षाः किं नशैक्षनाशैक्षाः। प्रतिवचनं। वक्तव्याः शैक्षाः। अशैक्षधर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किम् अशैक्षाः किं शैक्ष-नशैक्षनाशैक्षाः। प्रतिवचनं।

वक्तव्या अशैक्षाः। नशैक्षनाशैक्षधर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं नशैक्षनाशैक्षाः किं शैक्षाशैक्षाः। प्रतिवचनं। वक्तव्या नशैक्षनाशैक्षाः॥

दर्शनहेयधर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं दर्शनहेयाः किं भावनाहेयाः किम् अहेयाः। प्रतिवचनं। वक्तव्या दर्शनहेयाः। भावनाहेयधर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किं भावनाहेयाः किं दर्शनहेयाहेयाः। प्रतिवचनं। वक्तव्या भावनाहेयाः। अहेयधर्माणां जातिस्थितिजराऽनित्यता वक्तव्याः किम् अहेयाः किं दर्शनभावनाहेयाः। प्रतिवचनं। वक्तव्या अहेयाः॥०॥ [ द्वित्रिलक्षण-सामान्यविशेषनिर्देशः परिनिष्ठितः ]॥०॥

## २. जरामरणानित्यताबलं

जरा कतमा। प्रतिवचनं। सर्वसंस्काराणां वैमुख्यं परिपाकलक्षणमिति जरा। मरणं कतमत्। प्रतिवचनं। तेषां तेषां सत्त्वानां तत्तत्सत्त्वनिकाय-सभागाद् निवृत्तिश्च्युतिरायुरूष्मणो विगमो जीवितेन्द्रियनिरोधः सर्वस्कन्धनिरासः कायस्य भेद इति मरणं। अनित्यता कतमा। प्रतिवचनं। सर्वसंस्काराणां विकिरणं क्षयो भंगो विलयो नाशो निवृत्तिः। इत्यनित्यता ॥

मरणानित्यतयोः को भेदः। प्रतिवचनं। सर्वं मरणम् अनित्यं। अस्त्यनित्यं न मरणं। तद्यथा। स्थापयित्वा मरणम् अन्यसंस्कारनिरोधः॥

कर्मबलं बलवद् आहोस्विद् अनित्यता बलवती। प्रतिवचनं। कर्मबलं बलवद् नत्वनित्यताबलं॥ कश्चिदाह। अनित्यताबलं बलवद् न कर्मबलं। तत्कस्यहेतोः। यस्मात् कर्माप्यनित्यं॥ अत्रार्थे कर्मबलं बलवद् नत्वनित्यताबलं। तत्कस्य हेतोः। यस्मात् कर्म त्र्यध्वसंस्कारनिरोधाय प्रतिबलं। अनित्यता केवलं प्रत्युत्पन्नसंस्काराणां निरोधिका॥०॥ [ जरामरणानित्यताबलनिर्देशः परिनिष्ठितः ]॥०॥

## ३. त्रिलक्षणमेकक्षणं

यथाह भगवान्—संति त्रीणि संस्कृतस्य संस्कृतलक्षणानि। [ एकस्मिन् क्षणे ] संस्कृतस्योत्पादोऽपि प्रज्ञायते। निरोधोऽपि [ प्रज्ञायते ]। स्थित्यन्यथात्व-



मपि प्रज्ञायते॥ एकस्मिन् क्षणे उत्पादः कतमः। प्रतिवचनं। जातिः। निरोधः कतमः। प्रतिवचनं। अनित्यता। स्थित्यन्यथात्वं कतमत्। प्रतिवचनं। जरा॥०॥ [ त्रिलक्षणैकक्षणनिर्देशः परिनिष्ठितः ]॥०॥

इति ज्ञानप्रस्थानस्य प्रथमे संकीर्णस्कंधे लक्षणं नाम षष्ठो निःश्वासः॥

प्रथमे संकीर्णस्कंधे

# सप्तमो निःश्वासः

अनर्थकम्

उद्देशः

१अनर्थकं २स्मृतिः ३अलक्षणं ४धर्मचक्रज्ञानं ५(१)क्षीणास्रवः [(२)औपपादुकं]। ६कामबहुलतृप्तं ७पूरपोषम् इति वर्गविवक्षितं ॥

## १. अनर्थकं

यथा भगवानाह—

चरितान्यदुष्करचर्या विज्ञेयानर्थसंहिता।
न योगक्षेमलाभाय भूकंपे नौफलकवत् ॥

कस्माद् भगवानेवमाह। चरितान्यदुष्करचर्या ऽनर्थसंहिता—इति। प्रतिवचनं। [ ९२८c ] यस्मात् सा चर्या मरणोपगा मरणान्तिका मरणमापन्ना न तथादुष्करचर्या मरणनिष्क्रमणाय प्रतिबला ॥०॥ [ अनर्थकनिर्देशः परिनिष्ठितः ] ॥०॥

## २. स्मृतिः

यथाह भगवान्। पर्यंकमाभुज्य ऋजुं कायं प्रणिधाय अभिमुखीं स्मृतिं स्थापयति—इति। अभिमुखस्मृतिस्थापना कतमा। प्रतिवचनं। योगावचरः स्मृतिं बध्नाति भ्रुवोरन्तरे पश्यन् विनीलकं वा पश्यन् व्याध्मातकं वा पश्यन् विपूयकं वा पश्यन् विक्षिप्तकं वा पश्यन् विलोहितकं वा पश्यन् विखादितकं वा पश्यन् विच्छिद्रकं वा पश्यन् श्वेतास्थिकं वा पश्यन्न् अस्थिकं वा। इत्यादिरुच्यते ऽभिमुखस्मृतिस्थापना ॥०॥ [ स्मृतिनिर्देशः परिनिष्ठितः ] ॥०॥



## ३. अलक्षणं

पुनराह भगवान्। महामौद्गल्यायन तिष्येण ब्रह्मणा न भाषितं षष्ठमलक्षणं स्थानं ॥ षष्ठमलक्षणं स्थानं कतमत्। प्रतिवचनं। श्रद्धानुसृतं धर्मानुसृतं नाम षष्ठमलक्षणं स्थानं। तत्कस्य हेतोः। द्वयमेतद् अलक्षणं न शक्यं व्यवस्थापयितुं न शक्यं प्रज्ञापयितुम् इहामुत्रेति। या दुःखधर्मज्ञानक्षान्तिर् यद् दुःखधर्मज्ञानं यावद् विस्तरेणोक्तं या मार्गान्वयज्ञानक्षान्तिर् इत्येतेन अलक्षणं न शक्यं व्यवस्थापयितुं न शक्यं प्रज्ञापयितुम् इहामुत्रेति प्रोच्यते षष्ठमलक्षणं स्थानं ॥०॥ [ अलक्षणनिर्देशः परिनिष्ठितः ] ॥०॥

## ४. धर्मचक्रज्ञानं

यथोक्तं सूत्रे। बुद्धेन धर्मचक्रं प्रवर्तितं। कौण्डिन्यादिभिर्भिक्षुभिर् धर्मो दृष्टः। भौमैर् यक्षैर् उद्घोषितं। भगवता वाराणस्याम् ऋषिपतने मृगदावे त्रिःपरिवृत्तं द्वादशाकारं धर्मचक्रं प्रवर्तितमिति ॥

एतेषां भौमानां यक्षाणां सम्यग्ज्ञानदर्शनम् अस्ति न वा ज्ञातुं भगवता धर्मचक्रं प्रवर्तितं भिक्षुभिर्धर्मो दृष्ट इति। प्रतिवचनं। नास्ति॥ तर्हि कथं ते जानन्ति। प्रतिवचनं। भगवति श्रद्धया। तद्यथा। भगवान् जनयति संवृतिचित्तं मया धर्मचक्रं प्रवर्तितं भिक्षुभिर्धर्मो दृष्ट इति। इति ते जानन्ति॥ अथवा। भगवान् दिशति परान् मया धर्मचक्रं प्रवर्तितं भिक्षुभिर्धर्मो दृष्ट इति। इति ते तत् शृण्वन्ति॥ अथवा। महापुण्येभ्यो देवेभ्य ऋषिभ्यः श्रुतं भवति॥ अथवा। ते आर्यकौण्डिन्यादयो जनयन्ति संवृतिचित्तं भगवता धर्मचक्रं प्रवर्तितम् अस्माभिर्धर्मो दृष्ट इति। इति ते जानन्ति॥ अथवा। ते दिशन्ति परान् भौमाः श्रोतुं लभन्ते ॥०॥ [ धर्मचक्रज्ञाननिर्देशः परिनिष्ठितः ] ॥०॥

## ५. (१) क्षीणास्रवः

अपि चोक्तं सूत्रे। सन्ति भिक्षवो ऽर्हत्त्वप्राप्ताः क्षीणास्रवाः। त्रयस्त्रिंशद्देवा परिपरिगणयन्तो मेघस्कंधान् सुधर्मायां सभायाम् उद्घोषयन्ति—अमुकावासे ऽमुको भदन्तस्तस्य श्रावको वा केशश्मश्रूणि अवहार्य काषायं प्रावृत्य सम्यक्श्रद्धया प्रव्रजितः। आरब्धवीर्यो भावयन् आर्यमार्गं परिक्षीणसर्वास्रवः साक्षादधिगम्यानास्रवचित्तं प्रज्ञाविमुक्तः दृष्टे धर्मे स्वयं प्रतिवेद्य साक्षात्कृत्य विहरति। अथ स्वयं जानाति क्षीणा मे जातिः। उषितं ब्रह्मचर्यं। कृतं करणीयं। अनुपादानश्चरमभवः। इति॥

तेषां देवानामस्ति [ 927a ] न वा सम्यग्ज्ञानदर्शनं ज्ञातुं भिक्षवो ऽर्हत्त्वप्राप्ताः क्षीणास्रवा इति। प्रतिवचनं। नास्ति। तर्हि कथं ते जानन्ति। प्रतिवचनं। भगवति श्रद्धया। तथा हि। भगवान् जनयति संवृतिचित्तं भिक्षवो ऽर्हत्त्वप्राप्ताः क्षीणास्रवा इति। इति ते जानन्ति॥ अथवा। भगवान् दिशति परान् भिक्षवो ऽर्हत्त्वप्राप्ताः क्षीणास्रवा इति। इति ते श्रोतुं लभन्ते॥ अथवा। महापुण्येभ्यो देवेभ्य ऋषिभ्यः श्रुतं भवति॥ अथवा। ते भदन्ता जनयन्ति संवृतिचित्तं वयं क्षीणास्रवा अर्हत्त्वप्राप्ता इति। इति ते जानन्ति॥ अथवा। ते दिशन्ति परान् देवाः श्रोतुं लभन्ते॥

## ५. (२) औपपादुकं

यथोक्तं सूत्रे। मगधेषु सचिवामात्या उपपादुकधर्मविनया वा धर्मानुधर्मचरिता वा॥ कतमः स नामोपपादुकधर्मविनयः। कतमः स नाम धर्मानुधर्मचरितः। प्रतिवचनं। यो देवेषु भवन् पश्यति धर्मं स नामोपपादुकधर्मविनयः। यो मनुष्येषु भवन् पश्यति धर्मं स नाम धर्मानुधर्मचरितः। पुनः खलु। यः शीलम् असमाददानः पश्यति धर्मं स नामोपपादुकधर्मविनयः। यः शीलं समाददानः पश्यति धर्मं स नाम धर्मानुधर्मचरितः ॥०॥ [ क्षीणास्रवौपपादुकनिर्देशः परिनिष्ठितः ] ॥०॥



## ६. कामबहुलतृप्तं

कामबाहुल्यकः कतमः। प्रतिवचनं। सर्वः कामयानः कामितः कामयिष्यमाणः। इति कामबाहुल्यकः। अतृप्तः कतमः। प्रतिवचनं। सर्वो ऽतृप्तो ऽसंतृप्तो ऽपरितृप्तो भूते ऽतृप्तो भविष्यत्यतृप्तः। इति अतृप्तः॥ कामबाहुल्यके ऽतृप्ते च को भेदः। प्रतिवचनं। अप्राप्ते प्रिये रूपे शब्दे गन्धे रसे स्प्रष्टव्ये वस्त्रे आहारे शयनासने भैषज्ये ऽन्यस्मिन् परिष्कारे च आशास्ते पर्येषयति गवेषयति अभ्यर्थयति चिन्तयति सोपायो भवति। इति कामबाहुल्यकः। प्राप्ते प्रिये रूपे शब्दे गन्धे रसे स्प्रष्टव्ये वस्त्रे आहारे शयनासने भैषज्ये अन्यस्मिन् परिष्कारे च पुनराशास्ते पुनः कामयते पुनरभिनन्दति पुनः पर्येषयति। इति अतृप्तः। इति भेदः॥

अल्पकामः कतमः। प्रतिवचनं। अकामयानः अकामितः अकामयिष्यमाणः। इति अल्पकामः। तृप्तः कतमः। प्रतिवचनं। तृप्तः संतृप्तः परितृप्तः भूते तृप्तः भविष्यति तृप्तः। इति तृप्तः। अल्पकामे तृप्ते च को भेदः। अप्राप्ते प्रिये रूपे शब्दे गन्धे रसे स्प्रष्टव्ये वस्त्रे आहारे शयनासने अन्यस्मिन् परिष्कारे च नाशास्ते न पर्येषयति न गवेषयति नाभ्यर्थयति न चिन्तयति न सोपायो भवति। इत्यल्पकामः। प्राप्ते प्रिये रूपे शब्दे गन्धे रसे स्प्रष्टव्ये वस्त्रे आहारे शयनासने भैषज्ये अन्यस्मिन् परिष्कारे च न पुनराशास्ते न पुनः कामयते न पुनरभिनन्दति न पुनः पर्येषयति। इति तृप्तः। इति भेदः ॥०॥ [ कामबहुलतृप्तनिर्देशः परिनिष्ठितः ] ॥०॥

## ७. पूरपोषं

दुष्पूरः कतमः। प्रतिवचनं। सर्वो गुर्वाहारः गुरुचर्वणः अनल्पाहारः अनल्पचर्वणः अतिमात्राहारः अतिमात्रचर्वणः अल्पेन न परितोषी। इति दुष्पूरः [ 927b ] दुष्पोषः कतमः। प्रविवचनं। सर्व औदरिकः अत्यौदरिकः गृद्धः

अतिगृद्धः लुब्धः अतिलुब्धः चर्वणरुचिः पानरुचिः गवेष्याभ्यवहारकः गवेष्यचर्वकः अपरितोषोन्मुखः। इति दुष्पोषः। दुष्पूरदुष्पोषयोः को भेदः। प्रतिवचनं। यथोक्तपूर्व एव। इति भेदः॥

सुपूरः कतमः। प्रतिवचनं। सर्वो ऽगुर्वाहारः अगुरुचर्वणः अल्पाहारः अल्पचर्वणः परित्ताहारः परित्तचर्वणः अल्पेन परितोषी। इति सुपूरः। सुपोषः कतमः। सर्वो ऽनौदरिकः नात्यौदरिकः अगृद्धः नातिगृद्धः अलुब्धः नातिलुब्धः न चर्वणरुचिः न पानरुचिः न गवेष्याभ्यवहारकः न गवेष्यचर्वकः परितोषोन्मुखः। इति सुपोषः। सुपूरसुपोषयोः को भेदः। प्रतिवचनं। यथोक्तपूर्व एव। इति भेदः॥०॥ [ पूरपोषनिर्देशः परिनिष्ठितः ] ॥०॥

इति ज्ञानप्रस्थानस्य प्रथमे संकीर्णस्कन्धे ऽनर्थकं नाम सप्तमो निःश्वासः॥



प्रथमे संकीर्णस्कन्धे

# अष्टमो निःश्वासः

## चेतना

### उद्देशः

१चेतनावितर्कौद्धत्यादिभेदो २माह[ासम्यग्]ज्ञानं ३मदमानं ४व्याबाधः।
५अधिकं ६चयन्द्रियं ७स्वभावो ८मिथ्या—इति वर्गविवक्षितं॥

## १. चेतनावितर्कौद्धत्यादिभेदः

### (१) चेतना कल्पना च

चेतना कतमा। प्रतिवचनं। सर्वा चेतना संचेतना अधिचेतना चैतन्यं चेतनान्वयः चित्तक्रिया मनःकर्म। इति चेतना॥ कल्पना कतमा। प्रतिवचनं। सर्वा कल्पना संकल्पना अधिकल्पना मानं गणना विचयः। इति कल्पना॥ चेतनाकल्पनयोः को भेदः। प्रतिवचनं। चेतना कर्म। कल्पना तु मतिः। इति भेदः॥

### (२) वितर्को विचारश्च

वितर्कः कतमः। प्रतिवचनं। सर्वचित्तस्य गवेषणा विवेचना व्यवभासना अनुमानं संधानं प्रविचयः प्रविचयान्वयः। इति वितर्कः॥ विचारः कतमः। प्रतिवचनं। सर्वचित्तस्य विचारः अनुचारः अनुवर्तनम् अनुसरणम् अनुबन्धनं। इति विचारः॥ वितर्कविचारयोः को भेदः। प्रतिवचनं। चित्तौदारिकता नाम वितर्कः। चित्तसूक्ष्मता नाम विचारः। इति भेदः॥

### (३) औद्धत्यं चित्तविक्षेपश्च

औद्धत्यं कतमत् । प्रतिवचनं । सर्वचित्तस्याशान्तिः अविश्रमः क्षोभः उद्धवः चित्तक्षुब्धता । इत्यौद्धत्यं ॥ चित्तविक्षेपः कतमः । प्रतिवचनं । सर्वचित्तस्य विक्षेपः व्याकुलता अस्थितिः अनेकाग्रता । इति चित्तविक्षेपः ॥ औद्धत्यचित्तविक्षेपयोः को भेदः । प्रतिवचनं । अशान्तिलक्षणमुच्यते यदिदम् औद्धत्यं । अनेकाग्रतालक्षणो यश्चायं चित्तविक्षेपः । इति भेदः ॥०॥ [ चेतनावितर्कौद्धत्यादिभेदनिर्देशः परिनिष्ठितः ] ॥०॥

## २. मोहासम्यग्ज्ञानं

अविद्या कतमा । प्रतिवचनं । त्रैधातुकम् अज्ञानं । असम्यग्ज्ञानं कतमत् । प्रतिवचनं । [या] न न्यायनीता मतिः ॥

भवानाह । असम्यग्ज्ञानं न न्यायनीता मतिरिति । प्रतिवचनं । तथा ॥ किं ते विवक्षितं । ननु सम्यग्ज्ञानवानपि यो मृषावादी स सर्वो मुषितस्मृतिरसम्यग्ज्ञानवत्त्वादिति मृषा भाषते । प्रतिवचनं । तथा ॥ किं पुनस्ते विवक्षितं । [ ९२७c ] असम्यग्ज्ञानवान् एव मृषा भाषते । प्रतिवचनं । न तथा ॥ शृणु मे वचनं । यदुच्यते—असम्यग्ज्ञानं न न्यायनीता मतिरिति । सम्यग्ज्ञानवानपि यो मृषावादी स सर्वो मुषितस्मृतिरसम्यग्ज्ञानवत्त्वादिति मृषावादो । एवं तर्हि वक्तव्यम् असम्यग्ज्ञानवानेव मृषा भाषते । अथ चेद् नोच्यते ऽसम्यग्ज्ञानवानेव मृषावादो तर्हि न वक्तव्यम् असम्यग्ज्ञानं न न्यायनीता मतिः । असम्यग्ज्ञानवानपि यो मृषावादी स सर्वो मुषितस्मृतिरसम्यग्ज्ञानवत्त्वादिति मृषा भाषते । इति तथावादः सर्वथा न न्याय्यः ॥

परीक्षितव्यं तद्वचनं । अविद्या सर्वा किं सर्वासम्यग्ज्ञानसंप्रयुक्ता । प्रतिवचनं । तथा ॥ किं ते विवक्षितं । ननु सम्यग्ज्ञानवानपि यो मृषावादी स सर्वो ऽविद्यागतिको ऽविद्याबन्धनो मुषितस्मृतिरसम्यग्ज्ञानवत्त्वादिति मृषा भाषते । प्रतिवचनं । तथा ॥ किं पुनस्ते विवक्षितं । असम्यग्ज्ञानवानेव मृषा भाषते । प्रतिवचनं । न तथा ॥ शृणु मे वचनं । यदुच्यते—अविद्या सर्वा सर्वासम्यग्ज्ञानसंप्रयुक्ता । सम्यग्ज्ञानवानपि यो मृषावादी स सर्वो ऽविद्यागतिको



ऽविद्याबन्धनो मुषितस्मृतिरसम्यग्ज्ञानवत्त्वादिति मृषावादो । एवं तर्हि वक्तव्यम् असम्यग्ज्ञानवानेव मृषा भाषते । अथ चेद् नोच्यते ऽसम्यग्ज्ञानवानेव मृषा भाषते तर्हि न वक्तव्यम् अविद्या सर्वा सर्वासम्यग्ज्ञानसंप्रयुक्ता । सम्यग्ज्ञानवानपि यो मृषा भाषते स सर्वो ऽविद्यागतिको ऽविद्याबन्धनो मुषितस्मृतिरसम्यग्ज्ञानवत्त्वादिति मृषा भाषते । इति तथावादो ऽपि सर्वथा न न्याय्यः ॥०॥ [ मोहासम्यग्ज्ञाननिर्देशः परिनिष्ठितः ] ॥०॥

## ३. मदमानं

मदः कतमः । प्रतिवचनं । सर्वो मदः मादः उन्मादः क्षोभः संक्षोभः चित्तस्तब्धतानुविधायी चित्तात्मग्राहः । इति मदः ॥ मानः कतमः । प्रतिवचनं । सर्वो मानः अतीतो मानः अनागतो मानः चित्तोत्थानाश्रयश्चित्तात्मग्राहः । इति मानः ॥ मदमानयोः को भेदः । प्रतिवचनं । यः परान् अनुद्दिश्य आत्मधर्मानुरक्तस्य चित्तस्तब्धतानुधावनलक्षणः स उच्यते मदः । यः परानुद्दिश्य आत्मोत्थानाश्रयणलक्षणः स उच्यते मानः । इति भेदः ॥

यो जायते ऽधिमानो ऽहं पश्यामि दुःखं दुःखमिति अथवा पश्यामि समुदयं समुदय इति । स एष किमालंबनः । प्रतिवचनं । यथैकत्यः कुशलगुरोरन्तिके श्रुत्वा सम्यग्धर्मं योनिशो मनसि करोति । एतदुपादाय प्राप्नोति सत्यानुगां क्षान्तिं । दुःखाभिसमयान्तिकस्य दुःखक्षान्तिसुखे दुःखमित्युत्तानं भवति । समुदयाभिसमयान्तिकस्य समुदयक्षान्तिसुखे समुदय इत्युत्तानो भवति । तस्यैतया क्षान्त्या मनसिकारधारणात् तदन्तरेऽमनसिकाराद्वा दृष्टिविचिकित्से न चरतः । चरन्त्योरपि वा न बोधः । अथैवं स्मृतिः—अहं दुःखे पश्यामि दुःखमिति अथवा समुदये पश्यामि समुदय इति । एतेन जायते मानो ऽतीतो मानो ऽनागतो मानश् चित्तोत्थानं निश्रितश्चित्तात्मग्राह इत्युच्यते ऽधिमानः । एष दुःखालंबनः समुदयालंबनो वा ॥ [ ९२८a ]

यो जायते ऽधिमानः—अहं पश्यामि निरोधं निरोध इति अथवा पश्यामि मार्गं मार्ग इति । स एष किमालंबनः । प्रतिवचनं । यथैकत्यः कुशलगुरोरन्तिके श्रुत्वा सम्यग्धर्मं योनिशो मनसि करोति । एतदुपादाय प्राप्नोति सत्यानुगां क्षान्तिं । निरोधाभिसमयान्तिकस्य निरोधक्षान्तिसुखे निरोध इत्युत्तानो भवति । मार्गाभि-

समयान्तिकस्य मार्गक्षान्तिसुखे मार्ग इत्युत्तानो भवति । तस्यैतया क्षान्त्या मनसिकारधारणात् तदन्तरे ऽमनसिकाराद्वा दृष्टिविचिकित्से न चरतः। चरन्त्योरपि वा न बोधः। अथैवं स्मृतिः—अहं निरोधे पश्यामि निरोध इति अथवा मार्गे पश्यामि मार्ग इति। एतेन।जायते मानो ऽतीतो मानो ऽनागतो मानश् चित्तोत्थानं निश्रितश्चित्तात्मग्राह इत्युच्यते ऽधिमानः। एष तच्चित्तचैतसिकधर्मालंबनः ॥

यो जायते ऽधिमानः क्षीणा मे जातिरिति । स एष किमालंबनः । प्रतिवचनं । यथैकत्य एवंस्मृतिराह—अयं मार्ग एषा चर्या। मयेमं मार्गमेतां चर्यामाश्रित्य दुःखं परिज्ञातं समुदयश्चिरप्रहातो निरोधः साक्षात्कृतो मार्गो भावितः क्षीणा मे जातिरिति। एतेन जायते मानो ऽतीतो मानो ऽनागतो मानश् चित्तोत्थानं निश्रितश्चित्तात्मग्राह इत्युच्यते ऽधिमानः। एष जात्यालंबनः ॥

यो जायते ऽधिमानो मयोषितं ब्रह्मचर्यमिति। स एष किमालंबनः। प्रतिवचनं। यथैकत्य एवंस्मृतिराह—अयं मार्ग एषा चर्या। मयेमं मार्गमेतां चर्यामाश्रित्य दुःखं परिज्ञातं समुदयश्चिरप्रहातो निरोधः साक्षात्कृतो मार्गो भावितो ब्रह्मचर्यमुषितं। एतेन जायते मानो ऽतीतो मानो ऽनागतो मानश् चित्तोत्थानं निःश्रितश्चित्तात्मग्राह इत्युच्यते ऽधिमानः। एष तच्चित्तचैतसिकधर्मालंबनः ॥

यो जायते ऽधिमानो मया कृतं करणीयमिति। स एष किमालंबनः। प्रतिवचनं। यथैकत्य एवंस्मृतिराह—अयं मार्ग एषा चर्या। मयेमं मार्गमेतां चर्यामाश्रित्य दुःखं परिज्ञातं समुदयश्चिरप्रहातो निरोधः साक्षात्कृतो मार्गो भावितः। प्रहोणो मे ऽनुशयो विहतः क्लेशो वान्तीकृतं संयोजनं परिक्षीण आस्रवः कृतं करणीयमिति। एतेन जायते मानो ऽतीतो मानो ऽनागतो मानश् चित्तोत्थानं निश्रितश्चित्तात्मग्राह इत्युच्यते ऽधिमानः। एष तच्चित्तचैतसिकधर्मालंबनः ॥

यो जायते ऽधिमानो निरुपादानो मे चरमभव इति। स एष किमालंबनः। प्रतिवचनं। यथैकत्य एवंस्मृतिराह—अयं मार्ग एषा चर्या। मयेमं मार्गमेतां चर्यामाश्रित्य दुःखं परिज्ञातं समुदयश्चिरप्रहातो निरोधः साक्षात्कृतो मार्गो भावितः। क्षीणा मे जातिर् उषितं ब्रह्मचर्यं कृतं करणीयं निरुपादानश्चरमभवः। एतेन जायते मानो ऽतीतो मानो ऽनागतो मानश् चित्तोत्थानं निश्रितश्चित्तात्मग्राह इत्युच्यते ऽधिमानः। अयं भवालंबनः ॥

आत्मनि ऊनोक्त्या जनयति मानं [स] कतमः। प्रतिवचनं। [928b] यथैकत्यः पश्यन्नपरं श्रेष्ठं वर्णेन गोत्रेण कुलेन अन्वयेन धनेन अभिजनेन कलया



शिल्पेन क्षेत्रगृहादिना च एवंस्मृतिराह—स मत्तो वरो लेशतः, अहं ततो ऽवरो लेशतः। परं तेषु बहुशतसहस्रांशेनावरतमः। एतेन जायते मानो ऽतीतो मानो ऽनागतो मानश् चित्तोत्थानं निश्रितश्चित्तात्मग्राह इत्युच्यते आत्मनि ऊनोक्त्या जनयति मानं ॥०॥ [मदमाननिदशः परिनिष्ठितः] ॥०॥

## ४. व्याबाधः

यथोक्तं सूत्रे। या जायते कामपर्येषणा क्रोधपर्येषणा विहिंसापर्येषणा [सा] आत्मव्याबाधाय वा परव्याबाधाय वा उभयव्याबाधाय वा ॥

आत्मव्याबाधाय कामपर्येषणा कतमा । प्रतिवचनं । यथैकत्या रागपर्यवस्थानोदयहेतोर्जनयन्ति कायक्लमथं चित्तक्लमथं कायदाहं चित्तदाहं कायतापं चित्ततापं कायसंतापं चित्तसंतापं । अथैतदुपादाय दीर्घरात्रमनुभवन्त्यप्रीतिम् असुखम् अमोदम् अप्रमोदं विविधं विपाकफलं। इत्यात्मव्याबाधः ॥

परव्याबाधाय कामपर्येषणा कतमा । प्रतिवचनं। यथैकत्या रागपर्यवस्थानोदयहेतोरवलोकयन्ति परदारान् तत्पतिं दृष्ट्वा चित्तमुत्पादयन्ति सप्रतिघसंयोजनं सोपनाहक्लेशं। इति परव्याबाधः ॥

उभयव्याबाधायकामपर्येषणा कतमा । प्रतिवचनं । यथैकत्या रागपर्यवस्थानोदयहेतोर्नीचतया हरन्ति परदारान्। तत्पतिर्ज्ञात्वानुधावति स्वदारान्। तं पुरुषं च ताडयंति बध्नंति जीविदादवरोपयंति धनं वा हरंति। इत्युभयव्याबाधः ॥

आत्मव्याबाधाय क्रोधपर्येषणा कतमा । प्रतिवचनं । यथैकत्याः क्रोधपर्यवस्थानोदयहेतोर्जनयन्ति कायक्लमथं चित्तक्लमथं कायदाहं चित्तदाहं कायतापं चित्ततापं कायसंतापं चित्तसंतापं । अथैतदुपादाय दीर्घरात्रमनुभवन्त्यप्रीतिम् असुखम् अमोदम् अप्रमोदं विविधं विपाकफलं। इत्यात्मव्याबाधः ॥

परव्याबाधाय क्रोधपर्येषणा कतमा। प्रतिवचनं। यथैकत्याः क्रोधपर्यवस्थानोदयहेतोघ्नन्ति हिंसंति परजोवितं। इति परव्याबाधः ॥

उभयव्याबाधाय क्रोधपर्येषणा कतमा। प्रतिवचनं। यथैकत्याः क्रोधपर्यवस्थानोदयहेतो घ्नन्ति हिंसन्ति परजोवितं। अन्यैश्च स्वयं हन्यन्ते हिंस्यन्ते च। इत्युभयव्याबाधः ॥

आत्मव्याबाधाय विहिंसापर्येषणा कतमा। प्रतिवचनं। यथैकत्या विहिंसापर्यवस्थानोदयहेतो र्जनयन्ति कायक्लमथं चित्तक्लमथं कायदाहं चित्तदाहं कायतापं चित्ततापं कायसंतापं चित्तसंतापं। अथैतदुपादाय दीर्घरात्रमनुभवन्त्यप्रीतिम् असुखम् अमोदम् अप्रमोदं विविधं विपाकफलं। इत्यात्मव्याबाधः ॥

परव्याबाधाय विहिंसापर्येषणा कतमा। प्रतिवचनं। यथैकत्या विहिंसापर्यवस्थानोदयहेतोस्ताडयन्ति बध्नन्ति परान्। इति परव्याबाधः ॥

उभयव्याबाधाय विहिंसापर्येषणा कतमा। प्रतिवचनं। यथैकत्या विहिंसापर्यवस्थानोदयहेतोस्ताडयन्ति बध्नन्ति परान्। अथान्यैः स्वयमपि भवन्ति ताडिता बद्धाश्च। इत्युभयव्याबाधः ॥०॥ [ व्याबाधनिर्देशः परिनिष्ठितः ] ॥०॥

## ५. अधिकं

ज्ञानमधिकं विषयो वाधिकः। प्रतिवचनं। विषयो ऽधिको न ज्ञानं। तत्कस्य हेतोः। ज्ञानमपि विषय इति हेतोः॥ ज्ञानमधिकं विज्ञानं वाधिकं। प्रतिवचनं। विज्ञानमधिकं न ज्ञानं। तत्कस्य हेतोः। सर्वं ज्ञानं विज्ञानसंप्रयुक्तं न तु सर्वं विज्ञानं ज्ञानसंप्रयुक्तं। क्षान्तिसंप्रयुक्तं [ 928c ] विज्ञानं न ज्ञानसंप्रयुक्तमितिहेतोः ॥

सास्रवाः संस्कारा अधिका अनास्रवाः संस्कारा वाधिकाः। प्रतिवचनं। सास्रवाः संस्कारा अधिका नत्वनास्रवाः संस्काराः। तत्कस्य हेतोः। सास्रवाः संस्कारा दशायतनैर् द्वयोरायतनयोरेकदेशेन च संगृहीताः। अनास्रवाः संस्काराः केवलेन द्वयोरायतनयोरेकदेशेन संगृहीताः ॥०॥ [ अधिकनिर्देशः परिनिष्ठितः ] ॥०॥

## ६. चर्येन्द्रियं

परिपूर्णा चर्या कतमा। प्रतिवचनं। अशैक्षः कायसंवरः, वाक्संवरः, आजीवपरिशुद्धिश्च। परिपूर्णं त्राणं कतमत्। प्रतिवचनं। अशैक्ष इन्द्रियसंवर ॥०॥ [ चर्येन्द्रियनिर्देशः परिनिष्ठितः ] ॥०॥



## ७. [ पृथग्जन- ] स्वभावः

पृथग्जनत्वं कतमत्। प्रतिवचनं। यदार्यधर्मे आर्योष्मगते आर्यदर्शने आर्यक्षान्तौ आर्यच्छन्दे आर्यप्रज्ञायाम् अप्राप्तिर् अप्राप्तता अप्राप्स्यमानता—इति पृथग्जनत्वं ॥

इदं पृथग्जनत्वं वक्तव्यं कुशलं वा अकुशलं वा अव्याकृतं वा। प्रतिवचनं। वक्तव्यम् अव्याकृतं॥ कस्मात् पृथग्जनत्वं न कुशलं। प्रतिवचनं। कुशलधर्मस्य प्रयोगमुपादाय प्राप्तिर् निमित्तान्तरमुपादाय वा प्राप्तिः। न कल्पते प्रयोगः पृथग्जनाभावार्थाय। भूयोऽपि कुशलपरिहाणिकाले कुशलधर्मे सर्वथा विगते कुशलधर्मप्राप्तिर्न पृथग्जनत्वसाधनं। पृथग्जनत्वे कुशलस्वभावे सति उच्छिन्नकुशलेन्द्रियो ऽपृथग्जनो भवितव्यः ॥

कस्मात्पृथग्जनत्वं नाकुशलं। प्रतिवचनं। कामरागपरिहाणिकाले ऽकुशलधर्मे सर्वथा विगते ऽकुशलधर्मप्राप्तिर्न पृथग्जनत्वसाधनं। पृथग्जनत्वे ऽकुशले सति प्रहीणकामरागः पृथग्जनो ऽपृथग्जनो भवितव्यः ॥

इदं पृथग्जनत्वं वक्तव्यं कामधातुप्रतिसंयुक्तं किं रूपधातुप्रतिसंयुक्तं किम् आरूप्यधातुप्रतिसंयुक्तं किं। प्रतिवचनं। वक्तव्यं कामधातुप्रतिसंयुक्तं वा रूपधातुप्रतिसंयुक्तं वा आरूप्यधातुप्रतिसंयुक्तं वा ॥

कस्मात् पृथग्जनत्वं न केवलं कामधातुप्रतिसंयुक्तं। प्रतिवचनं। कामधातुं विहायारूप्यधातूपपत्तिकाले कामधातुको धर्मः सर्वो विगच्छति। इति कामधातुकधर्मप्राप्तिर्न [ पृथग्जन- ] स्वभावसाधनं। पृथग्जनत्वं केवलं कामधातुप्रतिसंयुक्तं चेत् पृथग्जनः कामधातुं विहायारूप्यधातूपपन्नो ऽपृथग्जनो भवितव्यः ॥

कस्मात् पृथग्जनत्वं न केवलं रूपधातुप्रतिसंयुक्तं। प्रतिवचनं। रूपधातुं विहायारूप्यधातूपपत्तिकाले रूपधातुको धर्मः सर्वो विगच्छति। इति रूपधातुधर्मप्राप्तिर्न [ पृथग्जन- ] स्वभावसाधनं। पृथग्जनत्वं केवलं रूपधातुप्रतिसंयुक्तं चेत् पृथग्जनो रूपधातुं विहायारूप्यधातूपपन्नो ऽपृथग्जनो भवितव्यः ॥

कस्मात् पृथग्जनत्वं न केवलम् आरूप्यधातुप्रतिसंयुक्तं। प्रतिवचनं। सम्यक्त्वन्याममवक्रान्तस्य प्रथमं कामधातुदुःखाभिसमयः पश्चात् समासेन रूपारूप्यधातुदुःखाभिसमयः। आर्यमार्गोत्पादे प्रथमं कामधातुवस्तुविभागः पश्चात

समासेन रूपारूप्यधातुवस्तुविभागः। तस्मात् पृथग्जनत्वं न केवलमारूप्यधातु-प्रतिसंयुक्तं ॥

इदं पृथग्जनत्वं किं दर्शनहेयम् आहोस्विद् भावनाहेयं। प्रतिवचनं। वक्तव्यं भावनाहेयं। कस्मात् पृथग्जनत्वं न दर्शनहेयं। प्रतिवचनं। दर्शनहेयः सर्वो धर्मो रागपरिभूतः। पृथग्जनत्वं न रागपरिभूतं। भूयोऽपि। लौकिकाग्र-[ 929a ] धर्मसम्यग्निरोधे दुःखधर्मज्ञानक्षान्तिसमुत्पादः। अथ तस्मिन् काले त्रैधातुकं पृथग्जनत्वं व्यपगच्छति, लभ्यते तत्- [ पृथग्जन- ] स्वभावस्यानिष्पत्तिः। तस्मिन् काले दर्शनहेयधर्मा भवन्तीति न [ति] व्यपगताः ॥

पृथग्जनत्वं नाम को धर्मः। प्रतिवचनं। त्रैधातुका अरागपरिभूताश् चित्तविप्रयुक्ताः संस्काराः ॥०॥ [ पृथग्जनस्वभावनिर्देशः परिनिष्ठितः ] ॥०॥

## ८. मिथ्या

सर्वे धर्मा ये मिथ्यादृष्टिसंप्रयुक्ताः, ते किं मिथ्याभावनासंप्रयुक्ताः। प्रति-वचनं। चतस्रः कोटयः कर्तव्याः ॥ सन्ति धर्मा मिथ्यादृष्टिसंप्रयुक्ता न मिथ्याभावना[संप्रयुक्ताः]। तथा हि। मिथ्यादृष्टिसंप्रयुक्ता मिथ्याभावना, अन्ये च मिथ्याभावनाविप्रयुक्ता मिथ्यादृष्टिसंप्रयुक्ता धर्माः ॥ सन्ति धर्मा मिथ्याभावनया संप्रयुक्ता न मिथ्यादृष्ट्या। तथा हि। मिथ्याभावनासंप्रयुक्ता मिथ्यादृष्टिः, अन्ये च मिथ्यादृष्टिविप्रयुक्ता मिथ्याभावनासंप्रयुक्ता धर्माः ॥ सन्ति धर्मा मिथ्यादृष्ट्या संप्रयुक्ता मिथ्याभावनयापि। तथा हि। वर्जयित्वा मिथ्यादृष्टि-संप्रयुक्तमिथ्याभावनां वर्जयित्वा च मिथ्याभावनासंप्रयुक्तमिथ्यादृष्टिं सर्वेऽन्ये मिथ्यादृष्टिमिथ्याभावनासंप्रयुक्तधर्माः ॥ सन्ति धर्मा न मिथ्यादृष्ट्या संप्रयुक्ता न मिथ्याभावनया च। तथा हि। मिथ्यादृष्टिविप्रयुक्ता मिथ्याभावना मिथ्या-भावनाविप्रयुक्ता मिथ्यादृष्टिः, अन्ये चित्तचैतसिकधर्मा रूपम् असंस्कृतं चित्त-विप्रयुक्तसंस्काराश्च ॥

सर्वे धर्मा ये मिथ्यादृष्टिसंप्रयुक्ताः, किं ते मिथ्यावीर्यसंप्रयुक्ताः। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः ॥ अस्ति धर्मो मिथ्यादृष्ट्या संप्रयुक्तो न मिथ्यावीर्येण। तद्यथा। मिथ्यादृष्टिसंप्रयुक्तं मिथ्यावीर्यं ॥ सन्ति धर्मा मिथ्यावीर्येण संप्रयुक्ता न मिथ्यादृष्ट्या। तद्यथा। मिथ्यादृष्टिः, अन्ये मिथ्यादृष्टिविप्रयुक्ता मिथ्यादृष्टि-संप्रयुक्ताश्च धर्माः ॥ सन्ति धर्मा मिथ्यादृष्ट्या संप्रयुक्ता मिथ्यावीर्येणापि। तद्यथा। वर्जयित्वा मिथ्यादृष्टिसंप्रयुक्तं मिथ्यावीर्यं सर्वे अन्ये मिश्यादृष्टिसंप्रयुक्ता धर्माः ॥ सन्ति धर्मा न मिथ्यादृष्ट्या संप्रयुक्ता नापि मिथ्यावीर्येण। तद्यथा। मिथ्यादृष्टिविप्रयुक्तं मिथ्यावीर्यं सर्वेऽन्ये चित्तचैतसिकधर्मा रूपम् असंस्कृतं चित्तविप्रयुक्तसंस्काराश्च ॥



मिथ्यादृष्टिं प्रति मिथ्यावीर्यं यथा, मिथ्यादृष्टिं प्रति मिथ्यास्मृति-मिथ्यासमाधो अपि तथा। मिथ्यादृष्टिं प्रति मिथ्यावीर्यमिथ्यास्मृतिमिथ्या-समाधयो यथा, मिथ्याभावनां प्रति मिथ्यावीर्यमिथ्यास्मृतिमिथ्यासमाधयोऽपि तथा ॥

सव धर्मा ये मिथ्यावीर्यसंप्रयुक्ताः, किं ते मिथ्यास्मृतिसंप्रयुक्ताः। प्रति-वचनं। चतस्रः कोटयः कर्तव्याः ॥ अस्ति धर्मो मिथ्यावीर्येण संप्रयुक्तो न मिथ्यास्मृत्या। तद्यथा। मिथ्यास्मृतिः ॥ अस्ति धर्मो मिथ्यास्मृत्या संप्रयुक्तो न मिश्यावीर्येण। तद्यथा। मिथ्यावीर्यं ॥ सन्ति धर्मा मिथ्यावीर्येण संप्रयुक्ता मिथ्यास्मृत्यापि। तद्यथा। मिथ्यावीर्यमिथ्यास्मृतिसंप्रयुक्ता धर्माः ॥ सन्ति धर्मा न मिथ्यावीर्येण संप्रयुक्ता नापि मिथ्यास्मृत्या। तद्यथा। सर्वेऽन्ये चित्तचैतसिकधर्मा रूपम् असंस्कृतं चित्तविप्रयुक्ताः संस्काराः ॥

मिथ्यावीर्यं प्रति मिथ्यास्मृतिर्यथा। मिथ्यावीर्यं प्रति मिथ्या- [ 929b ] समाधिरपि तथा। मिथ्यावीर्यं प्रति मिथ्यास्मृतिसमाधो यथा, मिथ्यास्मृतिं प्रति मिथ्यासमाधिरपि तथा ॥०॥ [ मिथ्यानिर्देशः परिनिष्ठितः ] ॥०॥

इति ज्ञानप्रस्थानस्य प्रथमे संकोर्णस्कन्धे चेतना नामाष्टमो निःश्वासः ॥
आर्यकात्यायनीपुत्रप्रणीते ज्ञानप्रस्थाननामाभिधर्मशास्त्रे
शुआन्-चुआङ्कृतचीनभाषान्तरात् संस्कृते शांतिभिक्षुणा प्रत्युनूदिते
प्रथमः संकोर्णस्कंधः परिनिष्ठितः ॥

आर्यकात्यायनीपुत्रकृतिः

# ज्ञानप्रस्थानम्

## द्वितीयः स्कन्धः

आर्यकात्यायनीपुत्रप्रणीतं

# ज्ञानप्रस्थानम्

नामाभिधर्मशास्त्रम्

[ शुआन्-चुआङ्कृतचीनभाषान्तरात् संस्कृते शांतिभिक्षुणा प्रत्यनूदितम् ]

द्वितीये संयोजनस्कंधे

## प्रथमो निःश्वासः

अकुशलम्

### उद्देशः

१त्रिसंयोजनादिस्वभावो २विपाको ३हेयता ४दृष्टिः ५स[वितर्कतादिकं] ६इन्द्रिय-[संप्रयोगः] ७[धातु-]प्रतिसंयोगः। ८अवस्थानं ९समन्वागतो १०निष्पत्तिः ११प्रत्ययः इति वर्गविवक्षितं॥

## १. त्रिसंयोजनादिस्वभावः

### ॥१॥ त्रिसंयोजनादीनां मातृका

#### क—त्रिकमातृका

#### (१) त्रीणि संयोजनानि

संति त्रीणि संयोजनानि[1]। तद्यथा। सत्कायदृष्टिसंयोजनं। शील-व्रतपरामर्शसंयोजनं। विचिकित्सासंयोजनं॥

---

1. सो इदं दुक्खंति योनिसो मनसि करोति, अयं दुक्खसमुदयो...अयं दुक्खनिरोधो...अयं दुक्खनिरोधगामिनी पटिपदा ति योनिसो मनसि करोति, तस्स एवं मनसि करोतो तीणि संयोजनानि प्रहीयन्ति। सक्कायदिट्ठि, विचिकिच्छा, सीलब्बतपरामासो। [ म १।९ ]; कोश तथा भा [ ५।३४ ] अत्र प्रसंगे कोशस्य पंचमं स्थानं विषयावगाहाय संपूर्णं द्रष्टव्यं। उपरिष्टाद् ग्रन्थान्तराणां तु संकेतः करिष्यते।

### (२) त्रीण्यकुशलमूलानि

त्रीण्यकुशलमूलानि[2] । तद्यथा । लोभो ऽकुशलमूलं । द्वेषो ऽकुशलमूलं । मोहो ऽकुशलमूलं ॥

### (३) त्रय आस्रवाः

त्रय आस्रवाः[3] । तद्यथा । कामास्रवः । भवास्रवः । अविद्यास्रवः ॥

## ख—चतुष्कमातृका

### (१) चत्वार ओघाः

चत्वार ओघाः[4] । तद्यथा । कामौघः । भवौघः । दृष्ट्योघः । अविद्यौघः ॥

### (२) चत्वारो योगाः

चत्वारो योगाः[5] । तद्यथा । कामयोगः । भवयोगः । दृष्टियोगः । अविद्यायोगः ॥

### (३) चत्वार्युपादानानि

चत्वार्युपादानानि[6] । तद्यथा । कामोपादानं । दृष्ट्युपादानं । शीलव्रतोपादानं । आत्मवादोपादानं ॥

2. दी ३।२१४ ; तुलनीयमत्र गीता [ १६।२१ ] ; समुच्चय ४८, ४९ इत्यत्र अकुशलमूलानां खिलाद्या विविधाः संज्ञाः ।

3. धम्म § १०९६-११००, १४४८ इत्यत्र आस्रवाणां निर्देशः, तत्र आस्रवत्रयातिरिक्तो दृष्ट्यास्रवो ऽपि दृश्यते संगहे [ ७।३ ] तथैवानूदिताः ; समुच्चय ४८, ४९ ; वि ७५९ ; दीपिका ७५९

4. धम्म § ११५१, १४८४ ; समुच्चय ४७ ; वि ७५९ ; दीपिका ७५९ ; संगह ७।४

5. धम्म § ११५१ अ, १४८५ ; समुच्चय ४७ ; वि ७५९ ; दीपिका ७५९ ; संगह ७।५

6. धम्म § १२१३-१२१७, १५३६ ; समुच्चय ४७ ; वि ७५९ ; दीपिका ७५९ ; संगह ७।७



### (४) चत्वारः कायग्रन्थाः

चत्वारः कायग्रन्थाः[7] । तद्यथा । अभिध्याकायग्रन्थः । व्यापादकायग्रन्थः । शीलव्रतपरामर्शकायग्रन्थः । इदंसत्याभिनिवेशकायग्रन्थः[8] ॥

## ग—पंचकमातृका

### (१) पंचनीवरणानि

पंच नीवरणानि[9] । तद्यथा । कामच्छन्दनीवरणं । व्यापादनीवरणं । स्त्यानमिद्धनीवरणं । औद्धत्यकौकृत्यनीवरणं । विचिकित्सानीवरणं ॥

### (२) पंच संयोजनानि

पंच संयोजनानि[10] । तद्यथा । रागसंयोजनं । प्रतिघसंयोजनं । मानसंयोजनं । ईर्ष्यासंयोजनं । मात्सर्यसंयोजनं ॥

### (३) पंचावरभागीय संयोजनानि

पंचावरभागीयसंयोजनानि[11] । तद्यथा । कामरागावरभागीयसंयोजनं । प्रतिघावरभागीयसंयोजनं । सत्कायदृष्ट्यवरभागीयसंयोजनं । शीलव्रतपरामर्शावरभागीयसंयोजनं । विचिकित्सावरभागीयसंयोजनं ॥

7. धम्म § ११३५-११३९, १४७२ ; समुच्चय ४८ ; वि ७५९ ; दीपिका ७५९ ; संगह ७।६

8. तत्सत्याभिनिवेशोपादानकायग्रन्थः [ समुच्चय ४८ ] इत्यस्य स्थाने इदंसत्याभिनिवेश इत्येव साधुतरं धम्मसंगणिप्रमाणात् ।

9. धम्म § ११५२-११६२, १४८६ इह पंचनीवरणातिरिक्तमविद्यानीवरणमधिकं पठितं तथैव संगहे [ ७।८ ] ; समुच्चय ४८

10. पालिषु नेतादृशं वर्गीकरणं दृष्टिपथमुपगतं ।

11. अं ५।१७ ; सं ५।६१, ६९

### (४) पंचोर्ध्वभागीयसंयोजनानि

पंचोर्ध्वभागीयसंयोजनानि[12] । तद्यथा । रूपरागोर्ध्वभागीयसंयोजनं । आरूप्यरागोर्ध्वभागीयसंयोजनं । औद्धत्योर्ध्वभागीयसंयोजनं । मानोर्ध्वभागीयसंयोजनं । अविद्योर्ध्वभागीयसंयोजनं ॥

### (५) पंच दृष्टयः

पंच दृष्टयः[13] । तद्यथा । सत्कायदृष्टिः । अन्तग्राहदृष्टिः । मिथ्यादृष्टिः । दृष्टिपरामर्शः । शीलव्रतपरामर्शः ॥

## घ—षट्कमातृका

### षट् तृष्णाकायाः

षट् तृष्णाकायाः[14] । तद्यथा । चक्षुःसंस्पर्शजतृष्णाकायः । श्रोत्र० । घ्राण० । जिह्वा० । काय० । मनःसंस्पर्शजतृष्णाकायः[15] ॥

## ङ—सप्तकमातृका

### सप्तानुशयाः

सप्तानुशयाः[16] । तद्यथा । कामरागानुशयः । प्रतिघानुशयः । भवरागानुशयः । मानानुशयः । अविद्यानुशयः । दृष्ट्यनुशयः । विचिकित्सानुशयः ॥

12. अं ५।१७ ; सं ५।६१, ६९

13. कोश ५।३ इत्यत्र तथैवानूदिताः ।

14. वि ७।५९

15. दीपिका ७।५९ इत्यत्र तृष्णाकायानां नामान्येवं पठितानि—“रूपतण्हा, सद्दतण्हा, गन्धतण्हा, रसतण्हा, फोट्टब्बतण्हा, धम्मतण्हा ति छ तण्हाकाया” इति ।

16. विभंगानुसारं संगहे [ ७।९ ] एते पठिताः । कोशे [ ५।१-२ ] ; समुच्चये [ ४६ ] च्चागताः ।



## च—नवकमातृका

### नव संयोजनानि

नव संयोजनानि[17] । [ 929c ] तद्यथा । तृष्णासंयोजनं[18] । प्रतिघसंयोजनं । मानसंयोजनं । अविद्यासंयोजनं । दृष्टिसंयोजनं । परामर्शसंयोजनं । विचिकित्सासंयोजनं । ईर्ष्यासंयोजनं । मात्सर्यसंयोजनं ॥

## छ—अष्टानवतिकमातृका

### अष्टानवतिरनुशयाः

अष्टानवतिरनुशयाः[19] । तद्यथा । कामधातुप्रतिसंयुक्ताः षट्त्रिंशदनुशयाः । रूपारूप्यधातुप्रतिसंयुक्ताः पृथक् पृथग् एकत्रिंशदनुशयाः ॥

## ॥२॥ त्रिसंयोजनादीनां स्वभावः

### क—त्रिकस्वभावः

### (१) त्रिसंयोजनानां स्वभावः

त्रीणि संयोजनानि यावद् अष्टानवतिरनुशयाः । तत्र कत्यकुशलाः कत्यव्याकृताः । प्रतिवचनं । त्रिषु संयोजनेष्वेकमव्याकृतं । द्वे विवेक्तव्ये । तद्यथा । विचिकित्साशीलव्रतपरामर्शसंयोजने अकुशले वा अव्याकृते वा । कामधातावकुशले रूपारूप्यधात्वोरव्याकृते ॥

### (२) त्रयाणामकुशलमूलानां स्वभावः

त्रीण्यकुशलमूलान्यकुशलान्येव ॥

17. समुच्चय ४४

18. अनुनय संयोजनम् इति समुच्चयः [ ४४ ] ; आगमेषु [ दी ३।२५४ ; सं २।१७८ ; अं १।२२३ ] क्वचिदनुनयसंयोजनपदं, क्वचित् तृष्णासंयोजनपदं । तृष्णासंयोजनपदस्य भूयसा प्रयोगात् स्पष्टत्वाच्च तदेवादृतं ॥

19. दर्शनहेयाः ८८, भावनाहेया १०, एवं संभूय ९८ अमृत ४।४ टि ( p. 79 )

(३) त्रयाणामास्रवाणां स्वभावः

त्रिष्वास्रवेष्वेको ऽव्याकृतः । द्वौ विवेक्तव्यौ । तद्यथा । कामास्रवो ऽकुशलो वा अव्याकृतो वा । आह्रीक्यमनपत्राप्यं तत्संप्रयुक्तश्चेत्यकुशलः । अन्यो ऽव्याकृतः । अविद्यास्रवो ऽकुशलो वा अव्याकृतो वा । आह्रीक्यानपत्राप्यसंप्रयुक्तो ऽकुशलः । अन्यो ऽव्याकृतः ॥

ख—चतुष्कस्वभावः

(१) चतुर्णामोघानां स्वभावः

चतुर्ष्वोघेष्वेको ऽव्याकृतः । त्रयो विवेक्तव्याः । तद्यथा । कामौघो ऽकुशलो वा अव्याकृतो वा । आह्रीक्यमनपत्राप्यं तत्संप्रयुक्तश्चेत्यकुशलः । अन्यो ऽव्याकृतः । दृष्ट्योघो ऽकुशलो वा अव्याकृतो वा । कामधातौ तिस्रो दृष्टयो ऽकुशलाः । कामधातौ द्वे दृष्टी रूपारूप्यधात्वोः पंच दृष्टयो ऽव्याकृताः । अविद्यौघो ऽकुशलो वा अव्याकृतो वा । आह्रीक्यानपत्राप्यसंप्रयुक्तो ऽकुशलः । अन्यो ऽव्याकृतः ॥

(२) चतुर्णां योगानां स्वभावः

चत्वार ओघा यथा चत्वारो योगा अपि तथा ॥

(३) चतुर्णामुपादानानां स्वभावः

चतुर्षूपादानेष्वेकमव्याकृतं । त्रीणि विवेक्तव्यानि । तद्यथा । कामोपादानमकुशलं वा अव्याकृतं वा । आह्रीक्यमनपत्राप्यं तत्संप्रयुक्तं चेत्यकुशलं । अन्यदव्याकृतं । दृष्ट्युपादानमकुशलं वा अव्याकृतं वा । कामधातौ द्वे दृष्टी अकुशले । कामधातौ द्वे दृष्टी रूपारूप्यधात्वोश्चतस्रो दृष्टयो ऽव्याकृताः । शीलव्रतोपादानमकुशलं वा अव्याकृतं वा । कामधातावकुशलं । रूपारूप्यधात्वोरव्याकृतं ॥



(४) चतुर्णां कायग्रन्थानां स्वभावः

चतुर्षु कायग्रन्थेषु द्वावकुशलौ । द्वौ विवेक्तव्यौ । तद्यथा । शीलव्रतपरामर्शेदंसत्याभिनिवेशकायग्रन्थौ कामधातावकुशलौ । रूपारूप्यधात्वोरव्याकृतौ ॥

ग—पंचकस्वभावः

(१) पंचनीवरणानां स्वभावः

पंच नीवरणान्यकुशलान्येव ॥

(२) पंचसंयोजनानां स्वभावः

पंचसंयोजनेषु त्रीण्यकुशलानि । द्वे विवेक्तव्ये । तद्यथा । रागमानसंयोजने अकुशले वा अव्याकृते वा । कामधातावकुशले । रूपारूप्यधात्वोरव्याकृते ॥

(३) पंचावरभागीयसंयोजनानां स्वभावः

पंचावरभागीयसंयोजनेषु द्वे अकुशले । एकमव्याकृतं । द्वे विवेक्तव्ये । तद्यथा । शीलव्रतपरामर्शविचिकित्सासंयोजने अकुशले वा अव्याकृते वा । कामधातावकुशले । रूपारूप्यधात्वोरव्याकृते ॥

(४) पंचोर्ध्वभागीयसंयोजनानां स्वभावः

पंचोर्ध्वभागीयसंयोजनान्यव्याकृतान्येव ॥

(५) पंचदृष्टीनां स्वभावः

पंचदृष्टिषु द्वे अव्याकृते । तिस्रो विवेक्तव्याः । तद्यथा । मिथ्यादृष्टिदृष्टिपरामर्शशीलव्रतपरामर्शाः [ 930a ] अकुशला वा अव्याकृता वा । कामधातावकुशलाः । रूपारूप्यधात्वोरव्याकृताः ॥

### घ—षट्कस्वभावः
### षट्तृष्णाकायानां स्वभावः

षट्तृष्णाकायेषु द्वावकुशलौ । चत्वारो विवेक्तव्याः । तद्यथा । चक्षुः-श्रोत्रकायसंस्पर्शजतृष्णाकाया अकुशला वा अव्याकृता वा । कामधातावकुशलाः ब्रह्मलोके ऽव्याकृताः । मनःसंस्पर्शजतृष्णाकायो ऽकुशलो वा अव्याकृतो वा । कामधातावकुशलः । रूपारूप्यधात्वोरव्याकृतः ॥

### ङ—सप्तकस्वभावः
### सप्तानुशयानां स्वभावः

सप्तानुशयेषु द्वावकुशलौ । एको ऽव्याकृतः । चत्वारो विवेक्तव्याः । तद्यथा । मानविचिकित्सानुशयावकुशलौ वा अव्याकृतौ वा । कामधातावकुशलौ । रूपारूप्यधात्वोरव्याकृतौ । अविद्यानुशयो ऽकुशलो वा अव्याकृतो वा । आह्रीक्यान-पत्राप्यसंप्रयुक्तो ऽकुशलः । अन्यो ऽव्याकृतः । दृष्ट्यनुशयो ऽकुशलो वा अव्याकृतो वा । कामधातौ तिस्रो दृष्टयो ऽकुशलाः । कामधातौ द्वे दृष्टी रूपारूप्यधात्वोः पंच दृष्टयो ऽव्याकृताः ॥

### च—नवकस्वभावः
### नवसंयोजनानां स्वभावः

नवसंयोजनेषु त्रीण्यकुशलानि । षड् विवेक्तव्यानि । तद्यथा । तृष्णा-मानपरामर्शविचिकित्सासंयोजनान्यकुशलानि वा अव्याकृतानि वा । कामधाताव-कुशलानि । रूपारूप्यधात्वोरव्याकृतानि । अविद्यासंयोजनमकुशलं वा अव्याकृतं वा । आह्रीक्यानपत्राप्यसंप्रयुक्तमकुशलं । अन्यद् अव्याकृतं । दृष्टिसंयोजनम-कुशलं वा अव्याकृतं वा । कामधातावेका दृष्टिरकुशला । कामधातौ द्वे दृष्टी रूपारूप्यधात्वोस्तिस्रो दृष्टयो ऽव्याकृताः ॥

### छ—अष्टानवतिकस्वभावः
### अष्टानवत्यनुशयानां स्वभावः

अष्टानवत्यनुशयेषु त्रयस्त्रिंशदकुशलाः । षट्चत्वारिंशदव्याकृताः । एकं



विवेक्तव्यं । तद्यथा । कामधातौ दुःखदर्शनहेयो ऽविद्यानुशयो ऽकुशलो वा अव्याकृतो वा । आह्रीक्यानपत्राप्यसंप्रयुक्तो ऽकुशलः । अन्यो ऽव्याकृतः ॥०॥ [ त्रिसंयोजनादिस्वभावनिर्देशः परिनिष्ठितः ] ॥०॥

## २. विपाकः

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः । कति सविपाकाः कत्य-विपाकाः । प्रतिवचनं । सर्वे ऽकुशलाः सविपाकाः । सर्वे ऽव्याकृता अविपाकाः ॥०॥ [ विपाकनिदशः परिनिष्ठितः ] ॥०॥

## ३. हेयता

### (१) दर्शनभावनाहेयता

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः । कति दर्शनहेयाः । कति भावनाहेयाः । प्रतिवचनं । त्रिषु संयोजनेषु सत्कायदृष्टिसंयोजनं दर्शनपूर्वंगमं भवति द्विकोटिकं । दर्शनहेयं वा दर्शनभावनाहेयं वा । सत्कायदृष्टिर्नैवसंज्ञाना-संज्ञायतनप्रतिसंयुक्ता श्रद्धानुसारिधर्मानुसार्यभिसमयान्तिकदुःखक्षान्तिहेया चेद् दर्शनहेया । अन्या पृथग्जनहेया चेद् भावनाहेया । श्रावकहेया चेद् दर्शनहेया ॥

सत्कायदृष्टिसंयोजनं यथा । पंचावरभागीयसंयोजनेषु सत्कायदृष्टिसंयोजनं, पंचदृष्टिषु सत्कायान्तग्राहदृष्टी चापि तथा ॥

शीलव्रतपरामर्शविचिकित्सासंयोजने दर्शनपूर्वंगमे भवतो द्विकोटिके । दर्शनहेये वा दर्शनभावनाहेये वा । शीलव्रतपरामर्शविचिकित्से नैवसंज्ञाना-संज्ञायतनप्रतिसंयुक्त श्रद्धानुसारिधर्मानुसार्यभिसमयान्तिकसर्वक्षान्ति- [ 930b ] हेये चेद् दर्शनहेये । अन्ये पृथग्जनहेये चेद् भावनाहेये । श्रावकहेये चेद् दर्शनहेये ॥

शीलव्रतपरामर्शविचिकित्सासंयोजने यथा । चतुरोघेषु दृष्ट्योघः, चतुर्योगेषु दृष्टियोगः, चतुरुपादानेषु दृष्ट्युपादानं शीलव्रतोपादानं, चतुःकायग्रन्थेषु

शीलव्रतपरामर्शेदंसत्याभिनिवेशकायग्रन्थौ, पंचावरभागीयसंयोजनेषु शीलव्रतपरामर्शविचिकित्सासंयोजने, पंचदृष्टिषु मिथ्यादृष्टि-दृष्टिपरामर्श-शीलव्रतपरामर्शाः, सप्तानुशयेषु दृष्टि-विचिकित्सानुशयौ, नवसंयोजनेषु दृष्टि-परामर्श-विचिकित्सा-संयोजनानि चापि तथा ॥

लोभाकुशलमूलं भावनापूर्वंगमं भवति द्विकोटिकं। भावनाहेयं वा दर्शन-भावनाहेयं वा । लोभाकुशलमूलं शैक्षदर्शनानुगतसर्वज्ञानहेयं चेद् भावनाहेयं। अन्यत् पृथग्जनहेयं चेद् भावनाहेयं। श्रावकहेयं चेद् दर्शनहेयं ॥

लोभाकुशलमूलं यथा । द्वेष-मोहाकुशलमूले, त्रिष्वास्रवेषु कामास्रवः, चतुरोघेषु कामौघः, चतुर्योगेषु कामयोगः, चतुरुपादानेषु कामोपादानं चतुः-कायग्रन्थेषु अभिध्याव्यापादकायग्रन्थौ, पंचनीवरणेषु विहाय कौकृत्यविचिकित्से अन्यानि नीवरणानि, पंचसंयोजनेषु प्रतिघसंयोजनं, पंचावरभागीयसंयोजनेषु कामरागप्रतिघसंयोजने, सप्तानुशयेषु कामरागप्रतिघानुशयौ, नवसंयोजनेषु प्रतिघसंयोजनं चापि तथा ॥

भवास्रवाविद्यास्रवौ दर्शनपूर्वंगमौ त्रिकोटिकौ। दर्शनहेयौ वा भावनाहेयौ वा दर्शनभावनाहेयौ वा । भवास्रवाविद्यास्रवौ नैवसंज्ञानासंज्ञायतनप्रतिसंयुक्तौ श्रद्धानुसारिधर्मानुसार्यभिसमयान्तिकसर्वक्षान्तिहेयौ चेद् दर्शनहेयौ । भवास्रवा-विद्यास्रवौ शैक्षदर्शनानुगतसर्वज्ञानहेयौ चेद् भावनाहेयौ । अन्यौ पृथग्जनहेयौ चेद् भावनाहेयौ। श्रावकहेयौ चेद् दर्शनहेयौ ॥

भवास्रवाविद्यास्रवौ यथा । चतुरोघेष्वविद्यौघः, चतुर्योगेष्वविद्यायोगः, चतुरुपादानेष्वात्मवादोपादानं, पंचसंयोजनेषु रागमानसंयोजने, षट्तृष्णाकायेषु मनःसंस्पर्शजतृष्णाकायः, सप्तानुशयेषु भवरागमानाविद्यानुशयाः, नवसंयोजनेषु तृष्णामानाविद्यासंयोजनानि चापि तथा ॥

कौकृत्यनीवरणं भावनाहेयं ॥

कौकृत्यनीवरणं यथा। पंचसंयोजनेष्वीर्ष्यामात्सर्यसंयोजने, पंचोर्ध्वभागीय-संयोजनानि, षट्तृष्णाकायेषु पौविकाः पंच तृष्णाकायाः, नवसंयोजनेष्वीर्ष्या-मात्सर्यसंयोजने चापि तथा ॥

विचिकित्सानीवरणं पृथग्जनहेयं चेद् भावनाहेयं । श्रावकहेयं चेद् दर्शनहेयं ॥



अष्टानवत्यनुशयेष्वष्टाविंशतिदर्शनहेयाः । दश भावनाहेयाः । अन्ये पृथग्जनहेयाश्चेद् भावनाहेयाः। श्रावकहेयाश्चेद् दर्शनहेयाः ॥

### (२) दुःखसमुदयनिरोधमार्गदर्शनभावनाहेयता

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः। कति दुःखदर्शनहेयाः यावत् कति [ ९३०c ] भावनाहेयाः । प्रतिवचनं । त्रिषु संयोजनेषु सत्कायदृष्टि-संयोजनं दुःखदर्शनहेयं ॥

सत्कायदृष्टिसंयोजनं यथा । पंचावरभागीयसंयोजनेष सत्कायदृष्टि-संयाजनं, पंचदृष्टिषु सत्कायदृष्ट्यन्तग्राहदृष्टी चापि तथा ॥

शीलव्रतपरामर्शसंयोजनं द्विविधं। दुःखदर्शनहेयं वा। मार्गदर्शनहेयं वा ॥

शीलव्रतपरामर्शसंयोजनं यथा । चतुरुपादानेषु शीलव्रतोपादानं, चतुः-कायग्रन्थेषु शीलव्रतपरामर्शकायग्रन्थः, पंचावरभागीयसंयोजनेष शीलव्रतपरामर्श-संयाजनं, पंचदृष्टिषु शीलव्रतपरामर्शश्चापि तथा ॥

विचिकित्सासंयोजनं चतुर्विधं । दुःखदर्शनहेयं वा यावद् मार्ग-दर्शनहेयं वा ॥

विचिकित्सासंयोजनं यथा। चतुरोघेषु दृष्ट्योघः, चतुर्योगेषु दृष्टियोगः, चतुरुपादानेषु दृष्ट्युपादानं, चतुःकायग्रन्थेषु इदंसत्याभिनिवेशकायग्रन्थः, पंच-नीवरणेषु विचिकित्सानीवरणं, पंचावरभागीयसंयोजनेषु विचिकित्सासंयोजनं, पंचदृष्टिषु मिथ्यादृष्टि-दृष्टिपरामर्शौ, सप्तानुशयेषु दृष्टिविचित्कसानुशयौ, नव-संयाजनेषु दृष्टि-परामर्श-विचिकित्सासंयोजनानि चापि तथा ॥

त्रीण्यकुशलमूलानि पंचविधानि। दुःखदर्शनहेयानि यावद् भावनाहेयानि ॥

त्रीण्यकुशलमूलानि यथा। त्रय आस्रवाः, दृष्टिं विहाय चतुरोघानामन्ये ओघाः, चतुर्योगानामन्ये योगाः, चतुरुपादानेषु कामोपादानात्मवादोपादाने, चतुःकायग्रन्थेषु अभिध्याव्यापादकायग्रन्थौ, पंचनीवरणेषु विहाय कौकृत्यविचिकित्से अन्यानि नीवरणानि, पंचसंयोजनेषु रागप्रतिघमानसंयोजनानि, पंचावरभागीय-संयोजनेषु कामरागप्रतिघसंयोजने, षट्तृष्णाकायेषु मनःसंस्पर्शजतृष्णाकायः, सप्तानुशयेषु विहाय दृष्टिविचिकित्से अन्ये ऽनुशयाः, नवसंयोजनेषु तृष्णाप्रतिघ-मानाविद्यासंयोजनानि चापि तथा ॥

कौकृत्यनीवरणं भावनाहेयं ॥

कौकृत्यनीवरणं यथा । पंचसंयोजनेषु ईर्ष्यामात्सर्यसंयोजने, पंचोर्ध्वभागीयसंयोजनानि, षट्तृष्णाकायेषु पौर्विकाः पंच तृष्णाकायाः, नवसंयोजनेषु ईर्ष्यामात्सर्यसंयोजने चापि तथा ॥

अष्टानवत्यनुशयेष अष्टाविंशतिर्दुःखदर्शनहेयाः । एकोनविंशतिः समुदयदर्शनहेयाः । एकोनविंशतिर्निरोधदर्शनहेयाः । द्वाविंशतिर्मार्गदर्शनहेयाः । दश भावनाहेयाः ॥०॥ [ हेयतानिदशः परिनिष्ठितः ] ॥०॥

## ४. दृष्टिः

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः । कति दृष्टयः । कत्यदृष्टयः । प्रतिवचनं । त्रिषु संयोजनेषु द्व दृष्टी । एकमदृष्टिः ॥

त्रीण्यकुशलमूलान्यदृष्टिः ॥

त्रिष्वास्रवेषु एको ऽदृष्टिः । द्वौ विवेक्तव्यौ । तद्यथा । कामास्रवो दृष्टिर्वा अदृष्टिर्वा । कामधातुकपंचदृष्टयो नाम दृष्टयः । अन्यो ऽदृष्टिः । भवास्रवो दृष्टिर्वा अदृष्टिर्वा । रूपारूप्यधातुकपंचदृष्टयो नाम दृष्टयः । अन्यो ऽदृष्टिः ॥

चतुर्षु ओघयोगेषु एको दृष्टिः । त्रयो ऽदृष्टयः ॥

चतुरुपादानेषु चतुःकायग्रन्थेषु चेत्युभयत्र द्वे दृष्टी । द्वे अदृष्टी ॥

पंच नीवरणानि पंच संयोजनानि चेत्युभये ऽदृष्टयः ॥

पंचावरभागीयसंयोजनेषु द्वे दृष्टी त्रीण्यदृष्टयः ॥ [ 931a ]

पंचोर्ध्वभागीयसंयोजनान्यदृष्टयः ॥

पंचदृष्टयो नाम दृष्टयः ॥

षट् तृष्णाकाया अदृष्टयः ॥

सप्तानुशयेष्वेको दृष्टिः, षड् अदृष्टयः ॥

नवसंयोजनेषु द्वे दृष्टी, सप्तादृष्टयः ॥

अष्टानवत्यनुशयेषु षट्त्रिंशद् दृष्टयः । द्वाषष्टिरदृष्टयः ॥०॥ [ दृष्टिनिर्देशः परिनिष्ठितः ] ॥०॥



## ५. स[वितर्कतादिकं]

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः । कति सवितर्कसविचाराः कत्यवितर्कसविचाराः कत्यवितर्काविचाराः । प्रतिवचनं । त्रीणि संयोजनानि त्रिविधानि ॥

त्रीण्यकुशलमूलानि कामास्रवश्च सवितर्कसविचाराणि ॥

भवास्रवो ऽविद्यास्रवो विहाय कामौघयोगोपादानम् अन्यान्योघयोगोपादानानि च त्रिविधानि ॥

कामौघयोगः कामोपादानं च सवितर्कसविचारे ॥

अभिध्याव्यापादौ द्वौ कायग्रन्थौ सवितर्कसविचारौ । अपरौ द्वौ कायग्रन्थौ त्रिविधौ ।

पंच नीवरणानि त्रीणि संयोजनानि च सवितर्कसविचाराणि ॥

अपरे द्वे संयोजने त्रीण्यवरभागीयसंयोजनानि च त्रिविधानि ॥

अपरे द्व अवरभागीयसंयोजने सवितर्कसविचारे ॥

पंचोर्ध्वभागीयसंयोजनेष्वारूप्यरागो ऽवितर्को ऽविचारः । अन्यानि चत्वारि पंच दृष्टयश्च त्रिविधानि ॥

पौर्विकाः पंच तृष्णाकायाः कामरागप्रतिघानुशयौ च सवितर्कसविचाराः । षष्ठस्तृष्णाकायो ऽपरे पंचानुशयाश्च त्रिविधाः ॥

नवसंयोजनेषु प्रतिघेर्ष्यामात्सर्यसंयोजनानि सवितर्कसविचाराणि । अपराणि षट् त्रिविधानि ॥

अष्टानवत्यनुशयेष कामधातुकाः षट्त्रिंशत् सवितर्कसविचाराः । रूपधातुका एकत्रिंशत् त्रिविधाः । आरूप्यधातुका एकत्रिंशद् अवितर्काविचाराः ॥०॥ [ सवितर्कतादिकनिर्देशः परिनिष्ठितः ] ॥०॥

## ६. इन्द्रिय[संप्रयोगः]

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः । कति सुखेन्द्रियसंप्रयुक्ताः

कति दुःख० सौमनस्य० दौर्मनस्य० उपेक्षेन्द्रियसंप्रयुक्ताः। प्रतिवचनं। त्रिषु संयोजनेषु सत्कायदृष्टिशीलव्रतपरामर्शसंयोजने त्रीन्द्रियसंप्रयुक्ते विहाय दुःखदौर्मनस्येन्द्रिये ॥

विचिकित्सासंयोजनं चतुरिन्द्रियसंप्रयुक्तं विहाय दुःखेन्द्रियं ॥

त्रिष्वकुशलमूलेषु लोभाकुशलमूलं त्रीन्द्रियसंप्रयुक्तं विहाय दुःखदौर्मनस्येन्द्रिये ॥

द्वेषाकुशलमूलं त्रीन्द्रियसंप्रयुक्तं विहाय सुखसौमनस्येन्द्रिये ॥

मोहो ऽकुशलमूलं कामास्रवाविद्यास्रवौ च पंचेन्द्रियसंप्रयुक्ताः ॥

भवास्रवस्त्रीन्द्रियसंप्रयुक्तः। विहाय दुःखदौर्मनस्येन्द्रिये ॥

चतुरोघयोगेषु कामाविद्यौघयोगौ पंचेन्द्रियसंप्रयुक्तौ ॥

भवौघयोगस्त्रीन्द्रियसंप्रयुक्तः। विहायदुःखदौर्मनस्येन्द्रिये ॥

दृष्ट्योघयोगश्चतुरिन्द्रियसंप्रयुक्तः। विहाय दुःखेन्द्रियं ॥

चतुरुपादानेषु कामोपादानं पंचेन्द्रियसंप्रयुक्तं ॥

दृष्ट्य पादानं चतुरिन्द्रियसंप्रयुक्तं। विहाय दुःखेन्द्रियं ॥

शीलव्रतात्मवादोपादाने त्रीन्द्रियसंप्रयुक्ते विहाय दुःखदौर्मनस्येन्द्रिये ॥

व्यापादकायग्रन्थस्त्रीन्द्रियसंप्रयुक्तः। विहाय सुखसौमनस्येन्द्रिये ॥

अन्ये त्रयः कायग्रन्थाः कामच्छन्दनीवरणं च त्रीन्द्रियसंप्रयुक्तानि। विहाय दुःखदौर्मनस्येन्द्रिये ॥

व्यापादनीवरणं त्रीन्द्रियसंप्रयुक्तं। विहाय सुखसौमनस्येन्द्रिये ॥

स्त्यानौद्धत्यनीवरणे पंचेन्द्रियसंप्रयुक्ते ॥ [931b]

मिद्धनीवरणं त्रीन्द्रियसंप्रयुक्तं। विहाय सुखदुःखेन्द्रिये ॥

कौकृत्यविचिकित्सानीवरणे द्वाभ्यामिन्द्रियाभ्यां संप्रयुक्ते। तद्यथा। दौर्मनस्योपेक्षेन्द्रियाभ्यां ॥

पंचसंयोजनेषु रागमानसंयोजने त्रीन्द्रियसंप्रयुक्ते। विहाय दुःखदौर्मनस्येन्द्रिये ॥

ईर्ष्यासंयोजनं द्वाभ्यामिन्द्रियाभ्यां संप्रयुक्तं। तद्यथा। दौर्मनस्योपेक्षेन्द्रियाभ्यां ॥

मात्सर्यसंयोजनं द्वाभ्यामिन्द्रियाभ्यां संप्रयुक्तं। तद्यथा। सौमनस्योपेक्षेन्द्रियाभ्यां ॥



पंचावरभागीयसंयोजनेष प्रतिघसंयोजनं त्रीन्द्रियसंप्रयुक्तं। विहाय सुखसौमनस्येन्द्रिये ॥

विचिकित्सासंयोजनं चतुरिन्द्रियसंप्रयुक्तं। विहाय दुःखेन्द्रियं ॥

अपराणि त्रीणि संयोजनानि त्रीन्द्रियसंप्रयुक्तानि। विहाय दुःखदौर्मनस्येन्द्रिये ॥

पंचोर्ध्वभागीयसंयोजनेष्वारूप्यरागसंयोजनमेकेन्द्रियेण संप्रयुक्तं। तद्यथा। उपेक्षेन्द्रियेण ॥

अन्यानि चत्वारि संयोजनानि चतस्रो दृष्टयश्च त्रीन्द्रियसंप्रयुक्तानि। विहाय दुःखदौर्मनस्येन्द्रिये ॥

मिथ्यादृष्टिश्चतुरिन्द्रियसंप्रयुक्ता। विहाय दुःखेन्द्रियं ॥

षट्तृष्णाकायेषु पौर्विकाः पंच तृष्णाकाया द्वाभ्यामिन्द्रियाभ्यां संप्रयुक्ताः। तद्यथा। सुखोपेक्षेन्द्रियाभ्यां ॥

षष्ठस्तृष्णाकायः कामभवरागमानानुशयाश्च त्रीन्द्रियसंप्रयुक्ताः। विहाय दुःखदौर्मनस्येन्द्रिये ॥

प्रतिघानुशयस्त्रीन्द्रियसंप्रयुक्तः। विहाय सुखसौमनस्येन्द्रिये ॥

दृष्टिविचिकित्सानुशयौ चतुरिन्द्रियसंप्रयुक्तौ। विहाय दुःखेन्द्रियं ॥

अविद्यानुशयः पंचेन्द्रियसंप्रयुक्तः ॥

नवसंयोजनेषु तृष्णामानपरामर्शसंयोजनानि त्रीन्द्रियसंप्रयुक्तानि। विहाय दुःखदौर्मनस्येन्द्रिये ॥

प्रतिघसंयोजनं त्रीन्द्रियसंप्रयुक्तं। विहाय सुखसौमनस्येन्द्रिये ॥

अविद्यासंयोजनं पंचेन्द्रियसंप्रयुक्तं ॥

दृष्टिविचिकित्सासंयोजने चतुरिन्द्रियसंप्रयुक्ते। विहाय दुःखेन्द्रियं ॥

ईर्ष्यासंयोजनं द्वाभ्यामिन्द्रियाभ्यां संप्रयुक्तं। तद्यथा। दौर्मनस्योपेक्षेन्द्रियाभ्यां ॥

मात्सर्यसंयोजनं द्वाभ्यामिन्द्रियाभ्यां संप्रयुक्तं। तद्यथा। सौमनस्योपेक्षेन्द्रियाभ्यां ॥

अष्टानवत्यनुशयेषु कामधातुकाश् चतस्रो दृष्टयः, मानः, दर्शनहेयो रागश्च द्वाभ्यामिन्द्रियाभ्यां संप्रयुक्ताः। तद्यथा। सौमनस्योपेक्षेन्द्रियाभ्यां ॥

विचिकित्सा, दर्शनहेयः प्रतिघश्च द्वाभ्यामिन्द्रियाभ्यां संप्रयुक्तौ। तद्यथा। दौर्मनस्योपेक्षेन्द्रियाभ्यां ॥

मिथ्यादृष्टिः, दर्शनहेया ऽविद्या च त्रीन्द्रियसंप्रयुक्ते। विहाय सुख-दुःखेन्द्रिये ॥

भावनाहेयो रागस्त्रीन्द्रियसंप्रयुक्तः। विहाय दुःखदौर्मनस्येन्द्रिये ॥

प्रतिघस्त्रीन्द्रियसंप्रयुक्तः। विहाय सुखसौमनस्येन्द्रिये ॥

अविद्या पंचेन्द्रियसंप्रयुक्ता ॥

रूपधातुका एकत्रिंशदनुशयास्त्रीन्द्रियसंप्रयुक्ताः। विहाय दुःख-दौर्मनस्येन्द्रिये ॥

आरूप्यधातुका एकत्रिंशदनुशया उपेक्षैकेन्द्रियसंप्रयुक्ताः ॥०॥ [ इन्द्रिय-संप्रयोगनिर्देशः परिनिष्ठितः ] ॥०॥

## ७. [धातु-] प्रतिसंयोगः

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः। कति कामधातुप्रतिसंयुक्ताः कति रूपधातुप्रतिसंयुक्ताः। कत्यारूप्यधातुप्रतिसंयुक्ताः। प्रतिवचनं। त्रीणि संयोजनानि त्रिविधानि ॥

त्रीण्यकुशलमूलानि कामास्रवश्च कामधातुप्रतिसंयुक्तानि ॥

भवास्रवो द्विविधः। रूपधातुप्रतिसंयुक्तो वा। आरूप्यधातुप्रतिसंयूक्तो वा ॥

अविद्यास्रवस्त्रिविधः ॥

कामौघयोगः कामोपादानं च कामधातुप्रतिसंयुक्ते ॥

भवौघयोग आत्मवादोपादानं च द्विविधे। रूपधातुप्रतिसंयुक्ते वा। आरूप्यधातुप्रतिसंयुक्ते वा ॥

अन्यावोघयोगौ, अपरे द्वे उपादाने च त्रिविधानि ॥

चतुःकायग्रन्थेषु अभिध्याव्यापादौ [ 931c ] पंच नीवरणानि च कामधातु-प्रतिसंयुक्तानि ॥

अन्यौ द्वौ कायग्रन्थौ त्रिविधौ ॥

पंचसंयोजनेषु रागमानौ, त्रीण्यवरभागीयसंयोजनानि च त्रिविधानि ॥



अन्यानि त्रीणि संयोजनानि, कामरागप्रतिघावरभागीयसंयोजने च कामधातुप्रतिसंयुक्तानि ॥

पंचोर्ध्वभागीयसंयोजनेषु रूपरागो रूपधातुप्रतिसंयुक्तः ॥

आरूप्यराग आरूप्यधातुप्रतिसंयुक्तः ॥

अपराणि त्रीणि संयोजनानि द्विविधानि। रूपधातुप्रतिसंयुक्तानि वा। आरूप्यधातुप्रतिसंयुक्तानि वा ॥

पंच दृष्टयः षष्ठस्तृष्णाकायश्च त्रिविधाः ॥

चक्षुः श्रोत्रकायसंस्पर्शजतृष्णाकाया द्विविधाः। कामधातुप्रतिसंयुक्ता वा। रूपधातुप्रतिसंयुक्ता वा ॥

घ्राणजिह्वासंस्पर्शजतृष्णाकायौ कामधातुप्रतिसंयुक्तौ ॥

सप्तानुशयेष कामरागप्रतिघानुशयौ कामधातुप्रतिसंयुक्तौ ॥

भवरागो द्विविधः। रूपधातुप्रतिसंयुक्तो वा। आरूप्यधातुप्रतिसंयुक्तो वा ॥

अपरे ऽनुशयास्त्रिविधाः ॥

नवसंयोजनेषु प्रतिघेर्ष्यामात्सर्यसंयोजनानि कामधातुप्रतिसंयुक्तानि ॥

अपराणि संयोजनानि त्रिविधानि ॥

अष्टानवत्यनुशयेषु षट्त्रिंशत् कामधातुप्रतिसंयुक्ताः ॥

एकत्रिंशद् रूपधातुप्रतिसंयुक्ताः ॥

एकत्रिंशद् आरूप्यधातुप्रतिसंयुक्ताः ॥०॥ [ धातुप्रतिसंयोगनिर्देशः परिनिष्ठितः ] ॥०॥

## ८. अवस्थानं

॥१॥ त्रिधातुसंयोजनानां पतितावस्थाननयः

(१) कामधातुसंयोजनानां पतितावस्थाननयः

सर्वाणि संयोजनानि कामधातुपतितानि। तानि संयोजनानि किं कामधात्ववस्थानानि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। सन्ति संयोजनानि कामधातुपतितानि। तानि संयोजनानि न कामधात्ववस्थानानि। तद्यथा।

पर्यवस्थानपर्यवस्थितो रूपधातोश्च्युत्वोपपन्नः कामधात्वन्तराभवः। पापीयान् मारश्च ब्रह्मलोकस्थः पर्यवस्थानपर्यवस्थितत्वात् तथागतानुबंधकः ॥

सन्ति संयोजनानि कामधात्ववस्थानानि। तानि संयोजनानि न कामधातुपतितानि। तद्यथा। पर्यवस्थानपर्यवस्थितः कामधातोश्च्युत्वोपपन्नो रूपधात्वन्तराभवः। कामधातुस्थश्च प्रत्युत्पन्नाभिमुखरूपारूप्यधातुसंयोजनः ॥

संति संयोजनानि कामधातुपतितानि। तानि संयोजनानि कामधात्ववस्थानान्यपि। तद्यथा। पर्यवस्थानपर्यवस्थितौ कामधातोश्च्युत्वोपपन्नौ कामधात्वन्तराभवोपपत्तिभवौ। कामधातुस्थश्च प्रत्युत्पन्नाभिमुखकामधातुसंयोजनः ॥

संति संयोजनानि न कामधातुपतितानि। तानि संयोजनानि न कामधात्ववस्थानान्यपि। तद्यथा। पर्यवस्थानपर्यवस्थितौ रूपधातोश्च्युत्वोपपन्नौ रूपधात्वन्तराभवोपपत्तिभवौ। रूपधातोश्च्युत आरूप्यधातूपपन्नः। आरूप्यधातोश्च्युत आरूप्यधातूपपन्नः। आरूप्यधातोश्च्युतो रूपधातूपपन्नः। रूपधातुस्थश्च प्रत्युत्पन्नाभिमुखरूपारूप्यधातुसंयोजनः। आरूप्यधातुस्थश्च प्रत्युत्पन्नाभिमुखारूप्यधातुसंयोजनः ॥

(२) रूपधातुसंयोजनानां पतितावस्थाननयः

सर्वाणि संयोजनानि रूपधातुपतितानि। तानि संयोजनानि किं रूपधात्ववस्थानानि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। संति संयोजनानि कामधातुपतितानि। तानि संयोजनानि न कामधात्ववस्थानानि। तद्यथा। पर्यवस्थानपर्यवस्थितः कामधातोश्च्युत्वोत्थितो रूपधात्वन्तराभवः। कामधातुस्थश्च प्रत्युत्पन्नाभिमुखरूपधातुसंयोजनः ॥

संति संयोजनानि रूपधात्ववस्थानानि तानि संयोजनानि न रूपधातुपतितानि। तद्यथा। पर्यवस्थानपर्यवस्थितो रूपधातोश्च्युत्वोत्थितः कामधात्वन्तराभवः। ब्रह्मलोकस्थश्च पापीयान मारः पर्यवस्थानपर्यवस्थितत्वात् तथागतानुबन्धकः। रूपधातुस्थश्च प्रत्युत्पन्नाभिमुखारूप्यधातुसंयोजनः ॥

संति संयोजनानि रूपधातुपतितानि तानि संयोजनानि रूपधात्वस्थानान्यपि। तद्यथा। पर्यवस्थान[ 932a ]पर्यवस्थितौ रूपधातोश्च्युत्वोपपन्नौ रूपधात्वन्तराभवोपपत्तिभवौ। रूपधातुस्थश्च प्रत्युत्पन्नाभिमुखरूपधातुसंयोजनः ॥



संति संयोजनानि न रूपधातुपतितानि नापि रूपधात्ववस्थानानि। तद्यथा। पर्यवस्थानपर्यवस्थितौ कामधातोश्च्युत्वा कामधात्वन्तराभवोपपत्तिभवौ। कामधातोश्च्युत आरूप्यधातूपपन्नः। आरूप्यधातोश्च्युत आरूप्यधातूपपन्नः। आरूप्यधातोश्च्युतः कामधातूपपन्नः। कामधातुस्थश्च प्रत्युत्पन्नाभिमुखकामारूप्यधातुसंयोजनः। आरूप्यधातुस्थश्च प्रत्युत्पन्नाभिमुखारूप्यधातुसंयोजनः ॥

(३) आरूप्यधातुसंयोजनानां पतितावस्थाननयः

सर्वाणि संयोजनान्यारूप्यधातुपतितानि। तानि संयोजनानि किम् आरूप्यधात्ववस्थानानि। प्रतिवचनं। सर्वाणि संयोजनानि आरूप्यधात्ववस्थानानि तानि संयोजनानि आरूप्यधातुपतितानि ॥

संति संयोजनानि आरूप्यधातुपतितानि तानि संयोजनानि नारूप्यधात्ववस्थानानि। तद्यथा। कामरूपधातुस्थः प्रत्युत्पन्नाभिमुखारूप्यधातुसंयोजनः ॥

॥२॥ त्रिधातुसंयोजनानां नपतितनावस्थाननयः

(१) कामधातुसंयोजनानां नपतितनावस्थाननयः

सर्वाणि संयोजनानि न कामधातुपतितानि तानि संयोजनानि किं न कामधात्ववस्थानानि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। विपरिवर्तितं पूर्वं ज्ञातव्यं ॥

(२) रूपधातुसंयोजनानां नपतितनावस्थाननयः

सर्वाणि संयोजनानि न रूपधातुपतितानि तानि संयोजनानि किं न रूपधात्ववस्थानानि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। विपरिवर्तितं पूर्वं ज्ञातव्यं ॥

(३) आरूप्यधातुसंयोजनानां नपतितनावस्थाननयः

सर्वाणि संयोजनानि नारूप्यधातुपतितानि तानि संयोजनानि किं नारूप्यधात्ववस्थानानि। प्रतिवचनं। तथा ॥

संति संयोजनानि नारूप्यधात्ववस्थानानि तानि संयोजनानि नारूप्यधात्वपतितानि। तद्यथा। कामरूपधातुस्थः प्रत्युत्पन्नाभिमुखारूप्यधातुसंयोजनः ॥०॥ [ अवस्थाननिर्देशः परिनिष्ठितः ] ॥०॥

## ९. समन्वागतः

### (१) अप्रहीणप्रतिसंयुक्तनयः

दर्शनसमन्वागतः श्रावकः। [ तस्य ] सर्वं रूपम् अप्रहीणं तद् रूपं प्रतिसंयुक्तं किं। प्रतिवचनं। तथा॥

यद् रूपं प्रतिसंयुक्तं तद् रूपम् अप्रहीणं किं। प्रतिवचनं। तथा॥

सर्वाणि वेदना-संज्ञा-संस्कार-विज्ञानानि अप्रहीणानि तानि वेदना-संज्ञा-संस्कार-विज्ञानानि प्रतिसंयुक्तानि किं। प्रतिवचनं। तथा॥

संति वेदना-संज्ञा-संस्कार-विज्ञानानि प्रतिसंयुक्तानि तानि वेदना-संज्ञा-संस्कार विज्ञानानि न—अप्रहीणानि। तद्यथा। कुलंकुलस्य वा सकृदागामिनो वा एकवीचिकस्य वा कामधातुकभावनाहेयानि ऊर्ध्वमध्यभागीयानि संयोजनानि प्रहीणानि परिज्ञातानि। तत्संप्रयुक्तानि वेदना-संज्ञा-संस्कारविज्ञानानि अवरभागीयसंयोजनप्रतिसंयुक्तानि॥

### (२) प्रहीणविसंयुक्तनयः

दर्शनसमन्वागतः श्रावकः। [ तस्य ] सर्वं रूपं प्रहीणं तद् रूपं विसंयुक्तं किं। प्रतिवचनं। तथा॥

यद् रूपं विसंयुक्तं तद् रूपं प्रहीणं किं। प्रतिवचनं। तथा॥

सर्वाणि वेदनासंज्ञासंस्कारविज्ञानानि प्रहीणानि तानि वेदनासंज्ञासंस्कारविज्ञानानि विसंयुक्तानि किं। प्रतिवचनं। सर्वाणि वेदनासंज्ञासंस्कारविज्ञानानि विसंयुक्तानि तानि वेदनासंज्ञासंस्कारविज्ञानानि प्रहीणानि॥

सन्ति वेदनासंज्ञासंस्कारविज्ञानानि प्रहीणानि अविसंयुक्तानि। तद्यथा। कुलंकुलस्य वा सकृदागामिनो वा एकवीचिकस्य वा कामधातुकभावनाहेयानि ऊर्ध्वमध्यभागीयानि संयोजनानि प्रहीणानि परिज्ञातानि। तत्संप्रयुक्तानि वेदनासंज्ञासंस्कारविज्ञानानि अवरभागीयसंयोजनप्रतिसंयुक्तानि॥



## १०. निष्पत्तिः

### (१) पंचपुद्गलोद्देशः

सन्ति पंच पुद्गलाः। तद्यथा। श्रद्धानुसारो, धर्मानुसारो, श्रद्धाधिमुक्तः, दृष्टिप्राप्तः, कायसाक्षी॥

### (२) श्रद्धानुसारिणः संयोजनादिनिष्पत्तिः

एतेषां पंचपुद्गलानां त्रिषु संयोजनेषु यावद् अष्टानवति—[ 932b ] अनुशयेषु कति निष्पन्नाः कत्यनिष्पन्नाः। प्रतिवचनं। श्रद्धानुसारिणस् त्रिषु संयोजनेषु दुःखान्वयज्ञाने ऽनुत्पन्ने सर्वाणि निष्पन्नानि। उत्पन्ने दुःखान्वयज्ञाने द्वे निष्पन्न, एकमनिष्पन्नं॥

त्रिष्वकुशलमूलेषु अप्रहीणकामरागस्य सर्वाणि निष्पन्नानि। प्रहीणकामरागस्य सर्वाणि अनिष्पन्नानि॥

त्रिष्वास्रवेषु अप्रहीणकामरागस्य सर्वे निष्पन्नाः। प्रहीणकामरागस्य द्वौ निष्पन्नौ, एको ऽनिष्पन्नः॥

ओघयोगोपादानानां चतुष्के ऽप्रहीणकामरागस्य सर्वाणि निष्पन्नानि। प्रहीणकामरागस्य त्रीणि निष्पन्नानि, एकमनिष्पन्नं॥

चतुषु कायग्रन्थेषु अप्रहीणकामरागस्य सर्वे निष्पन्नाः। प्रहीणकामरागस्य द्वौ निष्पन्नौ, द्वावनिष्पन्नौ॥

पंचसु नोवरणषु अप्रहीणकामरागस्य मार्गधर्मज्ञाने ऽनुत्पन्ने सर्वाणि निष्पन्नानि। उत्पन्ने मार्गधर्मज्ञाने चत्वारि निष्पन्नानि, एकम् अनिष्पन्नं। प्रहीणकामरागस्य सर्वाणि अनिष्पन्नानि॥

पंचसु संयोजनेषु अप्रहीणकामरागस्य सर्वाणि निष्पन्नानि। प्रहीणकामरागस्य द्वे निष्पन्ने, त्रीण्यनिष्पन्नानि॥

पंचस्ववरभागीयसंयोजनेषु अप्रहीणकामरागस्य दुःखान्वयज्ञाने ऽनुत्पन्ने सर्वाणि निष्पन्नानि। उत्पन्ने दुःखान्वयज्ञाने चत्वारि निष्पन्नानि, एकम् अनिष्पन्नं।

प्रहीणकामरागस्य दुःखान्वयज्ञाने ऽनुत्पन्ने त्रीणि निष्पन्नानि, द्वे अनिष्पन्ने। उत्पन्ने दुःखान्वयज्ञाने द्वे निष्पन्ने, त्रीण्यनिष्पन्नानि ॥

पंचसूर्ध्वभागीयसंयोजनेषु अप्रहीणरूपरागस्य सर्वाणि निष्पन्नानि। प्रहीण-रूपरागस्य चत्वारि निष्पन्नानि, एकम् अनिष्पन्नं ॥

पंचसु दृष्टिषु दुःखान्वयज्ञाने ऽनुत्पन्ने सर्वा निष्पन्नाः। उत्पन्ने दुःखान्वय-ज्ञाने तिस्रो निष्पन्नाः, द्वे अनिष्पन्ने ॥

षट्सु तृष्णाकायेषु अप्रहीणकामरागस्य सर्वे निष्पन्नाः। प्रहीणकामरागस्य अप्रहीणब्रह्मलोकरागस्य चत्वारो निष्पन्ना, द्वावनिष्पन्नौ। प्रहीणब्रह्मलोकरागस्य एको निष्पन्नः, पंचानिष्पन्नाः ॥

सप्तस्वनुशयेषु अप्रहीणकामरागस्य सर्वे निष्पन्नाः। प्रहीणकामरागस्य पंच निष्पन्नाः, द्वावनिष्पन्नौ ॥

नवसु संयोजनेषु अप्रहीणकामरागस्य सर्वाणि निष्पन्नानि। प्रहीणकाम-रागस्य षट् निष्पन्नानि, त्रीण्यनिष्पन्नानि ॥

अष्टानवत्यनुशयेषु अप्रहीणकामरागस्य दुःखधर्मज्ञाने ऽनुत्पन्ने सर्वे निष्पन्नाः ॥

उत्पन्ने दुःखधर्मज्ञाने ऽनुत्पन्ने दुःखान्वयज्ञाने दुःखदर्शनहेयाः कामधातुकाः सर्वे ऽनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

उत्पन्ने दुःखान्वयज्ञाने ऽनुत्पन्ने समुदयधर्मज्ञाने दुःखदर्शनहेयास्त्रैधातुकाः सर्वे ऽनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

समुदयधर्मज्ञाने उत्पन्ने समुदयान्वयज्ञाने ऽनुत्पन्ने दुःखदर्शनहेयास् त्रैधातुकाः समुदयदर्शनहेयाः कामधातुकाः सर्वे ऽनिष्पन्नाः। अन्ये सव निष्पन्नाः ॥

उत्पन्ने समुदयान्वयज्ञाने ऽनुत्पन्ने निरोधधर्मज्ञाने [ 932c ] दुःखसमुदय-दर्शनहेयास् त्रैधातुकाः सर्वे ऽनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

उत्पन्ने निरोधधर्मज्ञाने ऽनुत्पन्ने निरोधान्वयज्ञाने दुःखसमुदयदर्शनहेयास् त्रैधातुका निरोधदर्शनहेयाः कामधातुकाश्च सर्वे ऽनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

उत्पन्ने निरोधान्वयज्ञाने ऽनुत्पन्ने मार्गधर्मज्ञाने दुःखसमुदयनिरोधदर्शनहेयास् त्रैधातुकाः सर्वे ऽनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥



उत्पन्ने मार्गधर्मज्ञाने दुःखसमुदयनिरोधदर्शनहेयास् त्रैधातुका मार्गदर्शन-हेयाः कामधातुकाश्च सर्वे ऽनिष्पन्नाः, अन्ये सर्वे निष्पन्नाः ॥

प्रहीणकामरागस्य, अप्रहीणरूपरागस्य, दुःखान्वयज्ञाने ऽनुत्पन्ने कामधातुकाः सर्वे ऽनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

उत्पन्ने दुःखान्वयज्ञाने ऽनुत्पन्ने समुदयान्वयज्ञाने कामधातुकाः सर्वे, दुःखदर्शनहेया रूपारूप्यधातुकाश्च अनिष्पन्नाः। अन्य सर्वे निष्पन्नाः ॥

उत्पन्ने समुदयान्वयज्ञाने ऽनुत्पन्ने निरोधान्वयज्ञाने कामधातुकाः सव, दुःखसमुदयदर्शनहेया रूपारूप्यधातुकाश्च अनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

उत्पन्ने निरोधान्वयज्ञाने कामधातुकाः सर्वे, दुःखसमुदयनिरोधदर्शनहेया रूपारूप्यधातुकाश्च अनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

प्रहीणरूपरागस्य दुःखान्वयज्ञाने ऽनुत्पन्ने कामरूपधातुकाः सर्वे ऽनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

उत्पन्ने दुःखान्वयज्ञाने ऽनुत्पन्ने समुदयान्वयज्ञाने कामरूपधातुकाः सव, दुःखदर्शनहेया आरूप्यधातुकाश्च अनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

उत्पन्ने समुदयान्वयज्ञाने ऽनुत्पन्ने निरोधान्वयज्ञाने कामरूपधातुकाः सर्वे, दुःखसमुदयदर्शनहेया आरूप्यधातुकाश्च अनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥

उत्पन्ने निरोधान्वयज्ञाने कामरूपधातुकाः सर्वे, दुःखसमुदयनिरोधदर्शनहेया आरूप्यधातुकाश्च अनिष्पन्नाः। अन्ये सर्वे निष्पन्नाः ॥०॥

### (३) धर्मानुसारिणः संयोजनादिनिष्पत्तिः

श्रद्धानुसारी यथा, धर्मानुसार्यपि तथा ॥०॥

### (४) श्रद्धाधिमुक्तस्य संयोजनादिनिष्पत्तिः

श्रद्धाधिमुक्तस्य त्रिषु संयोजनेषु सर्वाण्यनिष्पन्नानि ॥

त्रिष्वकुशलमूलेषु अप्रहीणकामरागस्य सर्वाणि निष्पन्नानि। प्रहीणकाम-रागस्य सर्वाण्यनिष्पन्नानि ॥

त्रिष्वास्रवेषु अप्रहीणकामरागस्य सव निष्पन्नाः। प्रहीणकामरागस्य द्वौ निष्पन्नौ, एको ऽनिष्पन्नः ॥

चतुर्ष्वोघयोगेषु अप्रहीणकामरागस्य त्रयो निष्पन्नाः, एको ऽनिष्पन्नः। प्रहीणकामरागस्य द्वौ निष्पन्नौ, द्वावनिष्पन्नौ ॥

चतुर्षूपादानेषु अप्रहीणकामरागस्य द्वे निष्पन्ने, द्वे अनिष्पन्ने। प्रहीण-कामरागस्य एकं निष्पन्नं, त्रीण्यनिष्पन्नानि ॥

चतुर्षु कायग्रन्थेषु अप्रहीणकामरागस्य द्वौ निष्पन्नौ, द्वावनिष्पन्नौ। प्रहीणकामरागस्य सर्वाण्यनिष्पन्नानि ॥

पंचसु नीवरणेषु अप्रहीणकामरागस्य चत्वारि निष्पन्नानि, एकमनिष्पन्नं। प्रहीणकामरागस्य सर्वाण्यनिष्पन्नानि ॥ [ 933a ]

पंचसु संयोजनेषु अप्रहीणकामरागस्य सर्वाणि निष्पन्नानि। प्रहीणकाम-रागस्य द्वे निष्पन्ने, त्रीण्यनिष्पन्नानि ॥

पंचसु अवरभागीयसंयोजनेषु अप्रहीणकामरागस्य द्वे निष्पन्ने, त्रीण्य-निष्पन्नानि। प्रहीणकामरागस्य सर्वाण्यनिष्पन्नानि ॥

पंचसूर्ध्वभागीयसंयोजनेषु अप्रहीणरूपरागस्य सर्वाणि निष्पन्नानि। प्रहीण-रूपरागस्य चत्वारि निष्पन्नानि, एकमनिष्पन्नं ॥

पंचसु दृष्टिषु सर्वा अनिष्पन्नाः ॥

षट्सु तृष्णाकायेषु अप्रहीणकामरागस्य सर्वे निष्पन्नाः। प्रहीणकामरागस्य, अप्रहीणब्रह्मलोकरागस्य चत्वारो निष्पन्नाः, द्वावनिष्पन्नौ। प्रहीणब्रह्मलोकरागस्य एको निष्पन्नः, पंच अनिष्पन्नाः ॥

सप्तस्वनुशयेषु अप्रहीणकामरागस्य पंच निष्पन्नाः, द्वावनिष्पन्नौ। प्रहीण-कामरागस्य त्रयो निष्पम्नाः, चत्वारो ऽनिष्पन्नाः ॥

नवसु संयोजनेषु अप्रहीणकामरागस्य षड् निष्पन्नानि, त्रीण्यनिष्पन्नानि। प्रहीणकामरागस्य त्रीणि निष्पन्नानि, षड् अनिष्पन्नानि ॥

अष्टानवत्यनुशयेषु अप्रहीणकामरागस्य दश निष्पन्नाः, अष्टाशीतिरनिष्पन्नाः। प्रहीणकामरागस्य, अप्रहीणरूपरागस्य षड् निष्पन्नाः, द्वानवतिरनिष्पन्नाः। प्रहीण-रूपरागस्य त्रयो निष्पन्नाः, पंचनवतिरनिष्पन्नाः ॥०॥

(५) दृष्टिप्राप्तस्य संयोजनादिनिष्पत्तिः

श्रद्धाधिमुक्तो यथा, दृष्टिप्राप्तोऽपि तथा ॥०॥



(६) कायसाक्षिणः संयोजनादिनिष्पत्तिः

कायसाक्षिणस् त्रिषु संयोजनेषु त्रिष्वकुशलमूलेषु सर्वाण्यनिष्पन्नानि ॥

त्रिष्वास्रवेषु द्वौ निष्पन्नौ, एको ऽनिष्पन्नः ॥

चतुर्ष्वोघयोगेषु द्वौ निष्पन्नौ, द्वावनिष्पन्नौ ॥

चतुर्षूपादानेषु एकं निष्पन्नं, त्रीण्यनिष्पन्नानि ॥

चतुर्षु कायग्रन्थेषु, पंचसु नीवरणेषु च सर्वाण्यनिष्पन्नानि ॥

पंचसु संयोजनेषु द्वे निष्पन्ने, त्रीण्यनिष्पन्नानि ॥

पंचसु अवरभागीयसंयोजनेषु सर्वाण्यनिष्पन्नानि ॥

पंचसूर्ध्वभागीयसंयोजनेषु चत्वारि निष्पन्नानि, एकमनिष्पन्नं ॥

पंचसु दृष्टिषु सर्वा अनिष्पन्नाः ॥

षट्सु तृष्णाकायेषु एको निष्पन्नः, पंच अनिष्पन्नाः ॥

सप्तस्वनुशयेषु त्रयो निष्पन्नाः, चत्वारो ऽनिष्पन्नाः ॥

नवसु संयोजनेषु त्रीणि निष्पन्नानि, षड् अनिष्पन्नानि ॥

अष्टानवत्यनुशयेषु त्रयो निष्पन्नाः, पंचनवतिरनिष्पन्नाः ॥०॥ [ निष्पत्ति-निर्देशः परिनिष्ठितः ] ॥०॥

## ११. प्रत्ययः

सत्कायदृष्टिः सत्कायदृष्टिं प्रति कतिप्रत्यया ॥[१]

सत्कायदृष्टिः शीलव्रतपरामर्शं प्रति ॥[२]—यावत्—आरूप्यधातुकं भावनाहेयम् अविद्यानुशयं प्रति कतिप्रत्यया ॥[३]

—यावत्—आरूप्यधातुको भावनाहेयाविद्यानुशय आरूप्यधातुकं भावना-हेयाविद्यानुशयं प्रति कतिप्रत्ययः ॥[४]

आरूप्यधातुको भावनाहेयाविद्यानुशयः सत्कायदृष्टिं प्रति ॥[५]—यावत्—आरूप्यधातुकं भावनाहेयमानानुशयं प्रति कतिप्रत्ययः ॥[६]

प्रतिवचनं। सत्कायदृष्टिः सत्कायदृष्टिं प्रति चत्वारः, त्रयः, द्वौ, एको वा प्रत्ययः ॥

चत्वारः कतमे । [933b] तथा हि । सत्कायदृष्टेरनन्तरं जाता सत्कायदृष्टिः, भाव्यमाना, तत्पूर्वजाता पश्चाज्जातां प्रति चत्वारः प्रत्ययाः ॥

त्रयः कतमे । तथा हि । सत्कायदृष्टेरनन्तरं जाता सत्कायदृष्टिः, अभाव्यमाना, तत्पूर्वजाता पश्चाज्जातां प्रति त्रयः प्रत्ययाः । विहायालंबनं ॥ अथवा । सत्कायदृष्टेरन्तरम् उत्थितस्यान्यचित्तस्य पश्चाज्जाता सत्कायदृष्टिः, भाव्यमाना, तत्पूर्वजाता पश्चाज्जातां प्रति त्रयः प्रत्ययाः । विहाय समनन्तरं ॥

द्वौ कतमौ । तथा हि । सत्कायदृष्टेरनन्तरम् उत्थितस्यान्यचित्तस्य पश्चाज्जाता सत्कायदृष्टिः, अभाव्यमाना, तत्पूर्वजाता पश्चाज्जातां प्रति द्वौ प्रत्ययौ । तद्यथा । हेतुरधिपतिश्च ॥

एकः कतमः । पश्चाज्जाता सत्कायदृष्टिः पूर्वजातां सत्कायदृष्टिं प्रति, आलंबनकृता चेद्, भवत्यालंबनम् अधिपतिश्च । नालंबनकृता चेत्, केवलमधिपतिः ॥

अनागता सत्कायदृष्टिर् अतीतप्रत्युत्पन्नां सत्कायदृष्टिं प्रति, आलंबनकृता चेद्, भवत्यालंबनम् अधिपतिश्च । नालंबनकृता चेत्, केवलमधिपतिः ॥

अनागतप्रत्युत्पन्ना सत्कायदृष्टिर् अतीतां सत्कायदृष्टिं प्रति, आलंबनकृता चेद्, भवत्यालंबनम् अधिपतिश्च । नालंबनकृता चेत् केवलमधिपतिः ॥

कामधातुका सत्कायदृष्टिः रूपारूप्यधातुकां सत्कायदृष्टिं प्रति भवति केवलमधिपतिः ॥

रूपारूप्यधातुका सत्कायदृष्टिः कामधातुकां सत्कायदृष्टिं प्रति, समनन्तरकृता चेद्, भवति समनन्तरम् अधिपतिश्च । न समनन्तरकृता चेत् केवलमधिपतिः ॥

रूपधातुका सत्कायदृष्टिर् आरूप्यधातुकां सत्कायदृष्टिं प्रति भवति केवलमधिपतिः ॥

आरूप्यधातुका सत्कायदृष्टिः रूपधातुकां सत्कायदृष्टिं प्रति, समनन्तरकृता चेद्, भवति समनन्तरम् अधिपतिश्च । न समनन्तरकृता चेत्, केवलमधिपतिः ॥०॥

सत्कायदृष्टिः सत्कायदृष्टिं प्रति यथा, सत्कायदृष्टिः सर्वान् अन्यान् असर्वत्रगसंस्कारान् प्रति, सर्वे ऽन्ये ऽसर्वत्रगसंस्काराः सर्वान् असर्वत्रगसंस्कारान् प्रति, सर्वे सर्वत्रगसंस्काराः सर्वान् असर्वत्रगसंस्कारान् प्रत्यपि तथा विज्ञातव्याः ॥०॥

सत्कायदृष्टिः शीलव्रतपरामर्शं प्रति चत्वारः, त्रयः, द्वौ, एको वा प्रत्ययः ॥



चत्वारः कतमे । तथा हि । सत्कायदृष्टेरनन्तरं जातः शीलव्रतपरामर्शः, भाव्यमानश्चेत्, तत्पूर्वजाता पश्चाज्जातं प्रति चत्वारः प्रत्ययाः ॥

त्रयः कतमे । तथा हि । सत्कायदृष्टेरनन्तरं जातः शीलव्रतपरामर्शः, अभाव्यमानश्चेत्, तत्पूर्वजाता पश्चाज्जातं प्रति त्रयः प्रत्ययाः, विहायालंबनं । अथवा । सत्कायदृष्टेरनन्तरम् उत्थितस्यान्यचित्तस्य पश्चाज्जातः शीलव्रतपरामर्शः, भाव्यमानश्चेत्, तत्पूर्वजाता पश्चाज्जातं प्रति त्रयः प्रत्ययाः, विहाय समनन्तरं ॥

द्वौ कतमौ । तथा हि । सत्कायदृष्टेरनन्तरम् उत्थितस्यान्यचित्तस्य पश्चाज्जातः शीलव्रतपरामर्शः, अभाव्यमानश्चेत्, तत्पूर्वजाता पश्चाज्जातं प्रति द्वौ प्रत्ययौ । तद्यथा । हेतुरधिपतिश्च ॥

एकः कतमः । पश्चाज्जाता सत्कायदृष्टिः पूर्वजातं शीलव्रतपरामर्शं प्रति, आलंबनकृता चेद्, [933c] भवत्यालंबनम् अधिपतिश्च । नालंबनकृता चेत्, केवलमधिपतिः ॥

अनागता सत्कायदृष्टिर् अतीतप्रत्युत्पन्नं शीलव्रतपरामर्शं प्रति, आलंबनकृता चेद्, भवत्यालंबनम् अधिपतिश्च । नालंबनकृता चेत्, केवलमधिपतिः ॥

अनागतप्रत्युत्पन्ना सत्कायदृष्टिर् अतीतं शीलव्रतपरामर्शं प्रति, आलंबनकृता चेद्, भवत्यालंबनम् अधिपतिश्च । नालंबनकृता चेत्, केवलमधिपतिः ॥

कामधातुका सत्कायदृष्टिः रूपारूप्यधातुकं शीलव्रतपरामर्शं प्रति भवति केवलमधिपतिः ॥

रूपारूप्यधातुका सत्कायदृष्टिः कामधातुकशीलव्रतपरामर्शं प्रति, कृता चेद् आलंबनेन न समनन्तरेण, भवत्यालंबनम् अधिपतिश्च । कृता चेत् समनन्तरेण नालंबनेन, भवति समनन्तरम् अधिपतिश्च । कृता चेत् समनन्तरेणालंबनेन च, भवति समनन्तरम् आलंबनम् अधिपतिश्च । न कृता चेत् समनन्तरेणालंबनेन च, भवति केवलमधिपतिः ॥

रूपधातुका सत्कायदृष्टिर् आरूप्यधातुकं शीलव्रतपरामर्शं प्रति भवति केवलमधिपतिः ॥

आरूप्यधातुका सत्कायदृष्टिः रूपधातुकं शीलव्रतपरामर्शं प्रति, कृता चेद् आलंबनेन न समनन्तरेण, भवति आलंबनम् अधिपतिश्च । कृता चेत् समनन्तरेण नालंबनेन, भवति समनन्तरमधिपतिश्च । कृता चेत् समनन्तरेणालंबनेन च भवति

समनन्तरम् आलंबनम् अधिपतिश्च। न कृता चेत् समनन्तरेणालंबनेन च भवति केवलमधिपतिः ॥०॥

सत्कायदृष्टिः शीलव्रतपरामर्शं प्रति यथा, सत्कायदृष्टिः सर्वान् अन्यान् सर्वत्रगसंस्कारान् प्रति, सर्वे सर्वत्रगसंस्काराः सर्वान् सर्वत्रगसंस्कारान् प्रति, सर्वे ऽन्ये ऽसर्वत्रगसंस्काराः सर्वत्रगसंस्कारान् प्रत्यपि तथा ज्ञातव्याः ॥०॥ [ प्रत्ययनिर्देशः परिनिष्ठितः ] ॥०॥

इति ज्ञानप्रस्थानस्य द्वितीये संयोजनस्कंधे ऽकुशलं नाम प्रथमो निःश्वासः ॥



द्वितीये संयोजनस्कंधे

# द्वितीयो निःश्वासः

## सहचरितम्

### उद्देशः

१संयोजनसहचरितं २परिगणनषट्कं ३क्षुद्रमहत्सप्तकं ४संग्रहो ५भवः। ६निश्चयः ७प्रतिसंयोगः ८मार्गः ९परिज्ञा—इति वर्गविवक्षितं ॥

## १. संयोजनसहचरितं

### (१) तृष्णा-प्रतिघसंयोजनसहचरितं

सन्ति नव संयोजनानि। तद्यथा। तृष्णासंयोजनं यावत् मात्सर्यसंयोजनं ॥

अत्र विषये तृष्णासंयोजनप्रतिसंयोगे किं प्रतिघसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये प्रतिघसंयोजनप्रतिसंयोगे तृष्णासंयोजनप्रतिसंयोगा भवितव्यः। तृष्णासंयोजनप्रतिसंयोगे न वा प्रतिघसंयोजनप्रतिसंयोगः। तद्यथा। रूपारूप्यधर्मेषु भवति तृष्णासंयोजनमप्रहीणं ॥

### (२) तृष्णा-मानसंयोजनसहचरितं

अत्र विषये तृष्णासंयोजनप्रतिसंयोगे किं मानसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। तथा ॥ नन्वस्ति मानसंयोजनप्रतिसंयोगः, अथ भवति किं तृष्णासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। तथा ॥

### (३) तृष्णा-अविद्यासंयोजनसहचरितं

अत्र विषये तृष्णासंयोजनप्रतिसंयोगे किम् अविद्यासंयोजनप्रतिसंयोगो

ऽपि । प्रतिवचनं । अत्र विषये तृष्णासंयोजनप्रतिसंयोगे ऽविद्यासंयोजनप्रतिसंयोगो भवितव्यः । अविद्यासंयोजनप्रतिसंयोगे न वा तृष्णासंयोजनप्रतिसंयोगः । तद्यथा । दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने दुःखदर्शनहेयधर्मेषु भवति समुदयदर्शनहेयम् अविद्यासंयोजनम् [ 934a ] अप्रहीणं ॥

### (४) तृष्णा-दृष्टिसंयोजनसहचरितं

अत्र विषये तृष्णासंयोजनप्रतिसंयोगे किं दृष्टिसंयोजनप्रतिसंयोगो ऽपि । प्रतिवचनं । चतस्रः कोटयः कर्तव्याः ॥ भवति वा तृष्णासंयोजनप्रतिसंयोगो न दृष्टिसंयोजनप्रतिसंयोगः । तद्यथा । समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने निरोधमार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तेषु धर्मेषु भावनाहेयधर्मेषु च भवति तृष्णासंयोजनमप्रहीणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने मार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तेषु धर्मेषु भावनाहेयधर्मेषु च भवति तृष्णासंयोजनमप्रहीणं ॥—दृष्टिप्राप्तस्य श्रावकस्य भावनाहेयधर्मेषु भवति तृष्णासंयोजनमप्रहीणं ॥

भवति वा दृष्टिसंयोजनप्रतिसंयोगो न तृष्णासंयोजनप्रतिसंयोगः । तद्यथा । दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने दुःखदर्शनहेयधर्मेषु भवति समुदयदशनहेयदृष्टिसंयोजनमप्रहीणं ॥

भवति वा सहोभाभ्यां प्रतिसंयोगः । तद्यथा । उभयथा बद्धस्य दर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने समुदयनिरोधमार्गदर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने निरोधमार्गदर्शनहेयदृष्टिसंयोजनसंप्रयुक्तधर्मेषु भवत्युभयसंयोजन प्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने मार्गदर्शनहेयदृष्टिसंयोजनसंप्रयुक्तधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥

भवति वा नोभाभ्यां प्रतिसंयोगः । तद्यथा । समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने दुःखसमुदयदर्शनहेयधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने दुःखसमुदयनिरोधदर्शनहेयधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—दृष्टिप्राप्तस्य श्रावकस्य दर्शनहेयधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ।—प्रहीणे कामरागे कामधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ।—प्रहीणे रूपरागे कामरूपधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ।—प्रहीणे आरूप्यरागे त्रिधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥



### (५) तृष्णा-विचिकित्सासंयोजनसहचरितं

दृष्टिसंयोजनं प्रति यथा, विचिकित्सासंयोजनं प्रत्यपि तथा ॥

### (६) तृष्णा-परामर्शसंयोजनसहचरितं

अत्र विषये तृष्णासंयोजनप्रतिसंयोगे किं परामर्शसंयोजनप्रतिसंयोगो ऽपि । प्रतिवचनं । चतस्रः कोटयः कर्तव्याः । भवति वा तृष्णासंयोजनप्रतिसंयोगो न परामर्शसंयोजनप्रतिसंयोगः । तद्यथा । समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने भावनाहेयधर्मेषु भवति तृष्णासंयोजनमप्रहीणं ।—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने भावनाहेयधर्मेषु भवति तृष्णासंयोजनमप्रहीणं ।—दृष्टिप्राप्तस्य श्रावकस्य भावनाहेयधर्मेषु भवति तृष्णासंयोजनमप्रहीणं ॥

भवति वा परामर्शसंयोजनप्रतिसंयोगो न तृष्णासंयोजनप्रतिसंयोगः । तद्यथा । दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने दुःखदर्शनहेयधर्मेषु भवति समुदयदर्शनहेयपरामर्शसंयोजनमप्रहीणं ॥

भवति वा सहोभाभ्यां प्रतिसंयोगः । तद्यथा । उभयथा बद्धस्य दर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने समुदयनिरोधमार्गदर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—समुदयज्ञाने उत्पन्ने निरोध- [934b] ज्ञाने ऽनुत्पन्ने निरोधमार्गदर्शनहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने मार्गदर्शनहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥

भवति वा नोभाभ्यां प्रतिसंयोगः । तद्यथा । समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने दुःखसमुदयदर्शनहेयधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने दुःखसमुदयनिरोधदर्शनहेयधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—दृष्टिप्राप्तस्य श्रावकस्य दर्शनहेयधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे कामरागे कामधातुधर्मेषु भवति

नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे रूपरागे कामरूपधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे आरूप्यरागे त्रिधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥

(७) तृष्णा-ईर्ष्यासंयोजनसहचरितं

अत्र विषये तृष्णासंयोजनप्रतिसंयोगे किम् ईर्ष्यासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये ईर्ष्यासंयोजनप्रतिसंयोगे तृष्णासंयोजनप्रतिसंयोगो भवितव्यः। तृष्णासंयोजनप्रतिसंयोगे न वा ईर्ष्यासंयोजनप्रतिसंयोगः। तद्यथा। कामधातुदर्शनहेयधर्मेषु रूपारूप्यधातुधर्मेषु च भवति तृष्णासंयोजनमप्रहीणं ॥

(८) तृष्णा-मात्सर्यसंयोजनसहचरितं

ईर्ष्यासंयोजनं प्रति यथा मात्सर्यसंयोजनं प्रत्यपि तथा ॥

(९) मान-तदितरसंयोजनसहचरितं

यथा तृष्णासंयोजनं परं प्रति कृतसहचरितं मानसंयोजनं परं प्रति कृतसहचरितम् अपि तथा ॥

(१०) प्रतिघ-मानसंयोजनसहचरितं

अत्र विषये प्रतिघसंयोजनप्रतिसंयोगे किं मानसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये प्रतिघसंयोजनप्रतिसंयोगे मानसंयोजनप्रतिसंयोगो भवितव्यः। मानसंयोजनप्रतिसंयोगे न वा प्रतिघसंयोजनप्रतिसंयोगः। तद्यथा। रूपारूप्यधर्मेषु भवति मानसंयोजनमप्रहीणं ॥

(११) प्रतिघ-अविद्यासंयोजनसहचरितं

अत्र विषये प्रतिघसंयोजनप्रतिसंयोगे किम् अविद्यासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये प्रतिघसंयोजनप्रतिसंयोगे ऽविद्यासंयोजनप्रतिसंयोगो भवितव्यः। अविद्यासंयोजनप्रतिसंयोगे न वा प्रतिघसंयोजनप्रतिसंयोगः। तद्यथा। अप्रहीणकामरागस्य दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने कामधातुदुःखदर्शनहेयधर्मेषु भवति समुदयदर्शनहेयमविद्यासंयोजनमप्रहीणं। रूपारूप्यधातुधर्मेषु भवति अविद्यासंयोजनमप्रहीणं ॥



(१२) प्रतिघ-दृष्टिसंयोजनसहचरितं

अत्र विषये प्रतिघसंयोजनप्रतिसंयोगे किं दृष्टिसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। भवति वा प्रतिघसंयोजनप्रतिसंयोगो न दृष्टिसंयोजनप्रतिसंयोगः। तद्यथा। अप्रहीणकामरागस्य समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने कामधातुनिरोधमार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तेषु धर्मेषु कामधातुभावनाहेयधर्मेषु च भवति प्रतिघसंयोजनमप्रहीणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने कामधातुमार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तेषु धर्मेषु कामधातुभावनाहेयधर्मेषु च भवति प्रतिघसंयोजनमप्रहीणं ॥—दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणे कामरागे कामधातुभावनाहेयधर्मेषु भवति प्रतिघसंयोजनमप्रहीणं ॥

भवति वा दृष्टिसंयोजनप्रतिसंयोगो न प्रतिघसंयोजनप्रतिसंयोगः। तद्यथा। अप्रहीणकामरागस्य दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने [934c] कामधातुदुःखदर्शनहेयधर्मेषु भवति समुदयदर्शनहेयं दृष्टिसंयोजनमप्रहीणं। रूपारूप्यधातुधर्मेषु भवति दृष्टिसंयोजनमप्रहीणं ॥

भवति वा सहोभाभ्यां प्रतिसंयोगः। तद्यथा। उभयथा बद्धस्य कामधातुदर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—अप्रहीणकामरागस्य दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने कामधातुसमुदयनिरोधमार्गदर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने कामधातुनिरोधमार्गदर्शनहेयेषु दृष्टिसंयोजनसंप्रयुक्तेषु धर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने कामधातुमार्गदर्शनहेयेषु दृष्टिसंयोजनसंप्रयुक्तेषु धर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥

भवति वा नोभाभ्यां प्रतिसंयोगः। तद्यथा। समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने दुःखसमुदयदर्शनहेयधर्मेषु रूपारूप्यधातुनिरोधमार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च भवति नोभयसंयोजन-

प्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने दुःखसमुदयनिरोधदर्शनहेयधर्मेषु रूपारूप्यधातुमार्गदर्शनहेयदृष्टिसंयोजनविप्रयुक्तधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च भवति नोभयसंयोजनप्रतिसंयोगः ॥—दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणकामरागस्य दर्शनहेयधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे कामरागे कामधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे रूपरागे कामरूपधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे आरूप्यरागे त्रिधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥

## (१३) प्रतिघ-विचिकित्सासंयोजनसहचरितं

दृष्टिसंयोजनं प्रति यथा, विचिकित्सासंयोजनं प्रति तथा ॥

## (१४) प्रतिघ-परामर्शसंयोजनसहचरितं

अत्र विषये प्रतिघसंयोजनप्रतिसंयोगे किं परामर्शसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। भवति वा प्रतिघसंयोजनप्रतिसंयोगो न परामर्शसंयोजनप्रतिसंयोगः। तद्यथा। अप्रहीणकामरागस्य समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने कामधातुभावनाहेयधर्मेषु भवति प्रतिघसंयोजनमप्रहीणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने कामधातुभावनाहेयधर्मेषु भवति प्रतिघसंयोजनमप्रहीणं ॥—दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणकामरागस्य कामधातुभावनाहेयधर्मेषु भवति प्रतिघसंयोजनमप्रहीणं ॥

भवति वा परामर्शसंयोजनप्रतिसंयोगो न प्रतिघसंयोजनप्रतिसंयोगः। तद्यथा। अप्रहीणकामरागस्य दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने कामधातुदुःखदर्शनहेयधर्मेषु समुदयदर्शनहेयपरामर्शसंयोजनं भवत्यप्रहीणं। रूपारूप्यधातुधर्मेषु भवति परामर्शसंयोजनमप्रहीणं ॥

भवति वा सहोभाभ्यां प्रतिसंयोगः। तद्यथा। उभयथा बद्धस्य कामधातुदर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—अप्रहीणकामरागस्य दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने कामधातुसमुदयनिरोधमार्गदर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—समुदय [ 935a ] ज्ञाने उत्पन्ने निरोधज्ञाने



ऽनुत्पन्ने कामधातुनिरोधमार्गदर्शनहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने कामधातुमार्गदर्शनहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥

भवति वा नोभाभ्यां प्रतिसंयोगः। तद्यथा। अप्रहीणकामरागस्य समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने दुःखसमुदयदर्शनहेयधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च भवति नोभयसंयोजनप्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने दुःखसमुदयनिरोधदर्शनहेयधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च भवति नोभयसंयोजनप्रतिसंयोगः ॥—दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणकामरागस्य दर्शनहेयधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे कामरागे कामधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे रूपरागे कामरूपधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे आरूप्यरागे त्रिधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥

## (१५) प्रतिघ-ईर्ष्यासंयोजनसहचरितं

अत्र विषये प्रतिघसंयोजनप्रतिसंयोगे किम् ईर्ष्यासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये ईर्ष्यासंयोजनप्रतिसंयोगे प्रतिघसंयोजनप्रतिसंयोगो भवितव्यः। प्रतिघसंयोजनप्रतिसंयोगे न वा ईर्ष्यासंयोजनप्रतिसंयोगः। तद्यथा। कामधातुदर्शनहेयधर्मेषु भवति प्रतिघसंयोजनमप्रहीणं ॥

## (१६) प्रतिघ-मात्सर्यसंयोजनसहचरितं

ईर्ष्यासंयोजनं प्रति यथा, मात्सर्यसंयोजनं प्रत्यपि तथा ॥

## (१७) अविद्या-दृष्टिसंयोजनसहचरितं

अत्र विषये ऽविद्यासंयोजनप्रतिसंयोगे किं दृष्टिसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये दृष्टिसंयोजनप्रतिसंयोगे ऽविद्यासंयोजनप्रतिसंयोगो भवितव्यः। अविद्यासंयोजनप्रतिसंयोगे न वा दृष्टिसंयोजनप्रतिसंयोगः। तद्यथा।

समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने निरोधमार्गदर्शनहेयदृष्टिसंयोजनविप्रयुक्तधर्मेषु भावनाहेयधर्मेषु च भवत्यविद्यासंयोजनमप्रहोणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने मार्गदर्शनहेयदृष्टिसंयोजनविप्रयुक्तधर्मेषु भावनाहेयधर्मेषु च भवत्यविद्यासंयोजनम [ 935b ] प्रहीणं ॥—दृष्टिप्राप्तस्य श्रावकस्य भावनाहेयधर्मेषु भवत्यविद्यासंयोजनमप्रहीणं ॥

(१८) अविद्या-विचिकित्सासंयोजनसहचरितं

दृष्टिसंयोजनं प्रति यथा, विचिकित्सासंयोजनं प्रत्यपि तथा ॥

(१९) अविद्या-परामर्शसंयोजनसहचरितं

अत्र विषये ऽविद्यासंयोजनप्रतिसंयोगे किं परामर्शसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये परामर्शसंयोजनप्रतिसंयोगे ऽविद्यासंयोजनप्रतिसंयोगो भवितव्यः। अविद्यासंयोजनप्रतिसंयोगे न वा परामर्शसंयोजनप्रतिसंयोगः। तद्यथा। समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने भावनाहेयधर्मेषु भवत्यविद्यासंयोजनमप्रहीणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने भावनाहेयधर्मेषु भवत्यविद्यासंयोजनमप्रहीणं ॥—दृष्टिप्राप्तस्य श्रावकस्य भावनाहेयधर्मेषु भवत्यविद्यासंयोजनमप्रहीणं ॥

(२०) अविद्या-ईर्ष्यासंयोजनसहचरितं

अत्र विषये ऽविद्यासंयोजनप्रतिसंयोगे किम् ईर्ष्यासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये ईर्ष्यासंयोजनप्रतिसंयोगे ऽविद्यासंयोजनप्रतिसंयोगो भवितव्यः। अविद्यासंयोजनप्रतिसंयोगे न वा ईर्ष्यासंयोजनप्रतिसंयोगः। तद्यथा। कामधातुदर्शनहेयधर्मेषु रूपारूप्यधातुधर्मेषु च भवत्यविद्यासंयोजनमप्रहीणं ॥



(२१) अविद्या-मात्सर्यसंयोजनसहचरितं

ईर्ष्यासंयोजनं प्रति यथा, मात्सर्यसंयोजनं प्रत्यपि तथा ॥

(२२) दृष्टि-परामर्शसंयोजनसहचरितं

अत्र विषये दृष्टिसंयोजनप्रतिसंयोगे किं परामर्शसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये दृष्टिसंयोजनप्रतिसंयोगे परामर्शसंयोजनप्रतिसंयोगो भवितव्यः। परामर्शसंयोजनप्रतिसंयोगे न वा दृष्टिसंयोजनप्रतिसंयोगः। तद्यथा। समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने निरोधमार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तेषु धर्मेषु भवति परामर्शसंयोजनमप्रहीणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने मार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तेषु धर्मेषु भवति परामर्शसंयोजनमप्रहीणं ॥

(२३) दृष्टि-विचिकित्सासंयोजनसहचरितं

अत्र विषये दृष्टिसंयोजनप्रतिसंयोगे किं विचिकित्सासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। भवति वा दृष्टिसंयोजनप्रतिसंयोगो न विचिकित्सासंयोजनप्रतिसंयोगः। तद्यथा। समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने निरोधमार्गदर्शनहेयेषु दृष्टिसंयोजनसंप्रयुक्तेषु धर्मेषु भवति दृष्टिसंयोजनमप्रहीणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने मार्गदर्शनहेयेषु दृष्टिसंयोजनसंप्रयुक्तेषु धर्मेषु भवति दृष्टिसंयोजनमप्रहीणं ॥

भवति वा विचिकित्सासंयोजनप्रतिसंयोगो न दृष्टिसंयोजनप्रतिसंयोगः। तद्यथा। समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने निरोधमार्गदर्शनहेयेषु विचिकित्सासंयोजनसंप्रयुक्तधर्मेषु भवति विचिकित्सासंयोजनमप्रहीणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने मार्गदर्शनहेयेषु विचिकित्सासंयोजनसंप्रयुक्तेषु धर्मेषु भवति विचिकित्सासंयोजनमप्रहीणं ॥

भवति वा सहोभाभ्यां प्रतिसंयोगः। तद्यथा। उभयथा प्रतिबद्धस्य दर्शनभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः।—दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने दुःखसमुदयनिरोधमार्गभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥

भवति वा नोभाभ्यां प्रतिसंयोगः। तद्यथा। समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने दुःखसमुदयदर्शनहेयधर्मेषु निरोधमार्गहेयेषु दृष्टिविचिकित्सोभयसंयोजनविप्रयुक्तेषु धर्मेषु भावनाहेयधर्मसहितेषु च नोभयसंयोजनप्रतिसंयोगः॥ निरोधज्ञाने उत्पन्ने मार्गज्ञाने [935c] ऽनुत्पन्ने दुःखसमुदयनिरोधदर्शनहेयधर्मेषु मार्गदर्शनहेयेषु दृष्टिविचिकित्सोभयसंयोजनविप्रयुक्तेषु धर्मेषु भावनाहेयधर्मसहितेषु च नोभयसंयोजनप्रतिसंयोगः॥—दृष्टिप्राप्तस्य श्रावकस्य दर्शनभावनाहेयधर्मेषु नोभयसंयोजनप्रतिसंयोगः॥—प्रहीणे कामरागे कामधातुहेयधर्मेषु नोभयसंयोजनप्रतिसंयोगः॥—प्रहीणे रूपरागे कामरूपधातुधर्मेषु नोभयसंयोजनप्रतिसंयोगः॥—प्रहीणे आरूप्यरागे त्रिधातुधर्मेषु नोभयसंयोजनप्रतिसंयोगः॥

## (२४) दृष्टि-ईर्ष्यासंयोजनसहचरितं

अत्र विषये दृष्टिसंयोजनप्रतिसंयोगे किम् ईर्ष्यासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। भवति वा दृष्टिसंयोजनप्रतिसंयोगो नेर्ष्यासंयोजनप्रतिसंयोगः। तद्यथा। कामधातुदर्शनहेयधर्मेषु रूपारूप्यधातुधर्मेषु च भवति दृष्टिसंयोजनमप्रहीणं॥

भवति वा ईर्ष्यासंयोजनप्रतिसंयोगो न दृष्टिसंयोजनप्रतिसंयोगः। तद्यथा। अप्रहीणकामरागस्य समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने कामधातुभावनाहेयधर्मेषु भवतीर्ष्यासंयोजनमप्रहीणं॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने कामधातुभावनाहेयधर्मेषु भवतीर्ष्यासंयोजनमप्रहीणं॥—दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणे कामरागे कामधातुभावनाहेयधर्मेषु भवतीर्ष्यासंयोजनमप्रहीणं॥

भवति वा सहोभाभ्यां प्रतिसंयोगः। तद्यथा। उभयथा प्रतिबद्धस्य कामधातुभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः॥—अप्रहीणकामरागस्य दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने कामधातुभावनाहेयधर्मेषु भवत्युभयसंयोजन प्रतिसंयोगः॥

भवति वा नोभाभ्यां प्रतिसंयोगः। तद्यथा। अप्रहीणकामरागस्य समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने दुःखसमुदयदर्शनहेयधर्मेषु निरोधमार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तेषु धर्मेषु रूपारूप्यधातुभावनाहेयधर्मसहितेषु च नोभयसंयोजनप्रतिसंयोगः॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने दुःखसमुदयनिरोधदर्शनहेयधर्मेषु मार्गदर्शनहेयेषु दृष्टिसंयोजनविप्रयुक्तेषु धर्मेषु रूपारूप्यधातुभावनाहेयधर्मसहितेषु च नोभयसंयोजनप्रतिसंयोगः॥—दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणे कामरागे दर्शनहेयधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च नोभयसंयोजनप्रतिसंयोगः॥—प्रहीणे कामरागे कामधातुधर्मेषु नोभयसंयोजनप्रतिसंयोगः॥—प्रहीणे रूपरागे कामरूपधातुधर्मेषु नोभयसंयोजनप्रतिसंयोगः॥—प्रहीणे आरूप्यरागे त्रिधातुधर्मेषु नोभयसंयोजनप्रतिसंयोगः॥



## (२५) दृष्टि-मात्सर्यसंयोजनसहचरितं

ईर्ष्यासंयोजनं प्रति यथा, मात्सर्यसंयोजनं प्रति तथा॥

## (२६) विचिकित्सा-तदितरसंयोजनसहचरितं

यथा दृष्टिसंयोजनं प्रति —पेयालं— विचिकित्सासंयोजनं प्रति —पेयालं— अपि तथा॥

## (२७) परामर्श-विचिकित्सासंयोजनसहचरितं

अत्र विषये परामर्शसंयोजनप्रतिसंयोगे किं विचिकित्सासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। अत्र विषये विचिकित्सासंयोजनप्रतिसंयोगे परामर्शसंयोजनप्रतिसंयोगो भवितव्यः। परामर्शसंयोजनप्रतिसंयोगे न वा विचिकित्सासंयोजनप्रतिसंयोगः। तद्यथा। समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने निरोधमार्गदर्शनहेयेषु [936a] विचिकित्सासंयोजनविप्रयुक्तेषु धर्मेषु भवति परामर्शसंयोजनमप्रहीणं॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने मार्गदर्शनहेयेषु विचिकित्सासंयोजनविप्रयुक्तेषु धर्मेषु भवति परामर्शसंयोजनमप्रहीणं॥

## (२८) परामर्श-ईर्ष्यासंयोजनसहचरितं

अत्र विषये परामर्शसंयोजनप्रतिसंयोगे किम् ईर्ष्यासंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। भवति वा परामर्शसंयोजन-

प्रतिसंयोगो नेर्ष्यासंयोजनप्रतिसंयोगः । तद्यथा । कामधातुदर्शनहेयधर्मेषु रूपारूप्यधातुधर्मेषु च भवति परामर्शसंयोजनमप्रहीणं ॥

भवति वा ईर्ष्यासंयोजनप्रतिसंयोगो न परामर्शसंयोजनप्रतिसंयोगः । तद्यथा । अप्रहीणकामरागस्य समुदयज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने कामधातुभावनाहेय-धर्मेषु भवतीर्ष्यासंयोजनमप्रहीणं ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने कामधातुभावनाहेयधर्मेषु भवतीर्ष्यासंयोजनमप्रहीणं ॥—दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणे कामरागे कामधातुभावनाहेयधर्मेषु भवतीर्ष्यासंयोजनमप्रहीणं ॥

भवति वा सहोभाभ्यां प्रतिसंयोगः । तद्यथा । उभयथा प्रतिबद्धस्य कामधातुभावनाहेयधर्मेषु भवत्युभयसंयोजनप्रतिसंयोगः ॥—अप्रहीणकामरागस्य दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने कामधातुभावनाहेयधर्मेषु भवत्युभयसंयोजन-प्रतिसंयोगः ॥

भवति वा नोभाभ्यां प्रतिसंयोगः । तद्यथा । अप्रहीणकामरागस्य समुदय-ज्ञाने उत्पन्ने निरोधज्ञाने ऽनुत्पन्ने दुःखसमुदयदर्शनहेयधर्मेषु रूपारूप्यधातुभावनाहेय-धर्मेषु च भवति नोभयसंयोजनप्रतिसंयोगः ॥—निरोधज्ञाने उत्पन्ने मार्गज्ञाने ऽनुत्पन्ने दुःखसमुदयनिरोधदर्शनहेयधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च भवति नोभयसंयोजनप्रतिसंयोगः ॥—दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणे कामरागे दर्शन-हेयधर्मेषु रूपारूप्यधातुभावनाहेयधर्मेषु च भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे कामरागे कामधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥—प्रहीणे रूपरागे कामरूपधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोग ॥—प्रहीणे आरूप्यरागे त्रिधातुधर्मेषु भवति नोभयसंयोजनप्रतिसंयोगः ॥

(२९) परामर्श-मात्सर्यसंयोजनसहचरितं

ईर्ष्यासंयोजनं प्रति यथा, मात्सर्यसंयोजनंप्रत्यपि तथा ॥

(३०) ईर्ष्या-मात्सर्यसंयोजनसहचरितं

अत्र विषये ईर्ष्यासंयोजनप्रतिसंयोगे किं मात्सर्यसंयोजनप्रतिसंयोगो ऽपि। प्रतिवचनं । तथा ॥ ननु मात्सर्यसंयोजनप्रतिसंयोगो भवति, अथ किम् ईर्ष्यासंयोजनप्रतिसंयोगो ऽपि । प्रतिवचनं । तथा ॥०॥ [ संयोजनसहचरितनिर्देशः परिनिष्ठितः ] ॥०॥



# २. परिगणनषट्कं

## क—प्रथमतृष्णासंयोजनाधिकारः

### (१) अतीत—अनागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागतस्यापि । प्रतिवचनं । तथा ॥ नन्वनागतस्य चेत्, अथ किमतीतस्यापि । प्रतिवचनं । पूर्वोत्पन्नस्याप्रहाणं चेत् प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (२) अतीत-प्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किं प्रत्युपन्न-स्यापि । प्रतिवचनं । यदि प्रत्युपन्नम् अभिमुखं ॥ ननु प्रत्युत्पन्नस्य चेत्, अथ किमतीतस्यापि । प्रतिवचनं । पूर्वोत्पन्नस्याप्रहाणं चेत् प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु वा प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (३) अनागत-प्रत्युत्पन्ननयः

अत्र विषये ऽनागतस्य यदि तृष्णा[936b]संयोजनस्य प्रतिसंयोगस्तर्हि किं प्रत्युत्पन्नस्यापि । प्रतिवचनं । यदि प्रत्युत्पन्नम् अभिमुखं ॥ ननु प्रत्युत्पन्नस्य चेत्, अथ किमनागतस्यापि । प्रतिवचनं । तथा ॥

### (४) अतीत-अनागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागत-प्रत्युत्पन्नस्यापि । प्रतिवचनं । अनागतस्य भवितव्यः प्रतिसंयोगः । प्रत्युत्पन्न-स्यापि, यदि प्रत्युत्पन्नम् अभिमुखं ॥ नन्वनागतप्रत्युत्पन्नस्य चेत्, अथ किम्

अतीतस्यापि । प्रतिवचनं । यदि पूर्वोत्पन्नस्याप्रहाणं तर्हि प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु वा प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (५) अनागत-अतीतप्रत्युत्पन्ननयः

अत्र विषये ऽनागतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीत-प्रत्युत्पन्नस्यापि । प्रतिवचनं । भवति वा अनागतस्य, नातीतप्रत्युत्पन्नस्य । तद्यथा । अत्र विषये भवति चेत् तृष्णासंयोजनम् अप्रहीणम्, अथ पूर्वम् अनुत्पन्नम्, उत्पन्नं नु प्रहीणं, न प्रत्युत्पन्नाभिमुखं ॥

भवति वा अनागतस्य, अतीतस्य च, न प्रत्युत्पन्नस्य । तद्यथा । अत्र विषये भवति चेत् तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, न प्रत्युत्पन्नाभिमुखं ॥

भवति वा अनागतस्य, प्रत्युत्पन्नस्य च नातीतस्य । तद्यथा । अत्र विषये भवति चेत् तृष्णासंयोजनं प्रत्युत्पन्नाभिमुखम्, अथ पूर्वम् अनुत्पन्नम्, उत्पन्नं नु प्रहीणं ॥

भवति वा अनागतस्य, अतीतप्रत्युत्पन्नस्य च । तद्यथा । अत्र विषये भवति चेत् तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, अपि च प्रत्युत्पन्नाभिमुखं ॥

नन्वतीतप्रत्युत्पन्नस्य चेत्, अथ किम् अनागतस्यापि । प्रतिवचनं । तथा ॥

### (६) प्रत्युत्पन्न-अतीतानागतनयः

अत्र विषये प्रत्युत्पन्नस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतानागतस्यापि । प्रतिवचनं । अनागतस्य भवितव्यः प्रतिसंयोगः । पूर्वं चेद् उत्पन्नमप्रहीणं, तर्हि, अतीतस्य प्रतिसंयोगः । पूर्वं चेद् अनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥ नन्वतीतानागतस्य चेद्, अथ किं प्रत्युत्पन्न-स्यापि । प्रतिवचनं । प्रत्युत्पन्नं चेद् अभिमुखं ॥



## ख—द्वितीयतृतीयचतुर्थपंचमसंयोजनाधिकारः

यथा तृष्णासंयोजनपरिगणनषट्कं । प्रतिघस्य, मानस्य, ईर्ष्यायाः, मात्सर्यस्य, असर्वत्रगाया अविद्यायाश्चापि संयोजनानां परिगणनषट्कं तथा विज्ञातव्यं ॥

## ग—षष्ठदृष्टिसंयोजनाधिकारः

### (१) अतीत-अनागतनयः

अत्र विषये ऽतीतस्य यदि दृष्टिसंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागत-स्यापि । प्रतिवचनं । तथा ॥ नन्वनागतस्य चेत्, अथ किमतीतस्यापि । प्रतिवचनं । तथा ॥

### (२) अतीत-प्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि दृष्टिसंयोजनस्य प्रतिसंयोगस्तर्हि किं प्रत्युत्पन्न-स्यापि । प्रतिवचनं । प्रत्युत्पन्नं चेदभिमुखं ॥ ननु प्रत्युत्पन्नस्य चेत्, अथ किमतीतस्यापि । प्रतिवचनं । तथा ॥

### (३) अनागत-प्रत्युत्पन्ननयः

अत्र विषये ऽनागतस्य यदि दृष्टिसंयोजनस्य प्रतिसंयोगस्तर्हि किं प्रत्युत्पन्न-स्यापि । प्रतिवचनं । प्रत्युत्पन्नं चेदभिमुखं ॥ ननु प्रत्युत्पन्नस्य चेत्, अथ किमनागतस्यापि । प्रतिवचनं । तथा ॥

### (४) अतीत-अनागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि दृष्टिसंयोजनस्य प्रतिसंयोगः तर्हि किम् अनागत-

प्रत्युत्पन्नस्यापि। प्रतिवचनं। अनागतस्य भवितव्यः प्रतिसंयोगः। प्रत्युत्पन्नस्यापि यदि प्रत्युत्पन्नमभिमुखं॥ नन्वनागतप्रत्युत्पन्नस्य चेत्, अथ किमतीतस्यापि। प्रतिवचनं। तथा॥

(५) अनागत—अतीतप्रत्युत्पन्ननयः

अत्र विषये ऽनागतस्य यदि दृष्टिसंयोजनस्य प्रतिसंयोगस्तर्हि किमतीत-प्रत्युत्पन्नस्यपि। प्रतिवचनं। अतीतस्य भवितव्यः प्रतिसंयोगः। प्रत्युत्पन्नस्यापि, यदि प्रत्युत्पन्नमभिमुखं॥ ननु अतीतप्रत्युत्पन्नस्य चेत्, अथ किमनागतस्यापि। प्रतिवचनं। तथा॥

(६) प्रत्युत्पन्न—अतीतानागतनयः

अत्र विषये प्रत्युत्पन्नस्य यदि दृष्टिसंयोजनप्रतिसंयोगस्तर्हि किमतीत-[936c]नागतस्यापि। प्रतिवचनं। तथा॥ नन्वतीतानागतस्य चेत्, अथ किं प्रत्युत्पन्नस्यापि। प्रतिवचनं। प्रत्युत्पन्नं चेदभिमुखं॥

घ—सप्तमाष्टमनवमसंयोजनाधिकारः

यथा दृष्टिसंयोजनपरिगणनषट्कं। परामर्शस्य, विचिकित्सायाः, सर्वत्रगाया अविद्यायाश्चापि संयोजनानां परिगणनषट्कं तथा विज्ञातव्यं॥०॥ [परिगणनषट्क-निर्देशः परिनिष्ठितः]॥०॥



# ३. क्षुद्रमहत्सप्तकं

## क—क्षुद्रसप्तकविकल्पाः

### [१] तृष्णा-प्रतिघसंयोजनाधिकारः

(१) अतीत-अतीतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किमतीतस्य प्रतिघसंयोजनस्यापि प्रतिसंयोगः। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

नन्वतीतस्य प्रतिघसंयोजनस्य प्रतिसंयोगे किमतीतस्य तृष्णासंयोजनस्य प्रति-संयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

(२) अतीत-अनागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किमनागतस्य प्रतिघसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। अप्रहीणं चेत् [प्रतिसंयोगः]। नन्वनागतस्य प्रतिघसंयोजनस्य प्रतिसंयोगे किमतीतस्य तृष्णासंयोजनस्य प्रति-संयोग ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

(३) अतीत-प्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किं प्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। प्रत्युत्पन्नं चेदभिमुखं। ननु प्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगे किमतीतस्य तृष्णासंयोजनस्य प्रतिसंयागो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

### (४) अतीत-अतीतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किमतीत-प्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो नातीतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगः । तद्यथा । अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नम् अप्रहीणं । न भवति प्रतिघसंयोजनं पूर्वमुत्पन्नम्, उत्पन्नं नु भवति प्रहीणं । न प्रत्युत्पन्नं भवत्यभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतस्य प्रतिघ-संयोजनस्य प्रतिसंयोगः, न प्रत्युत्पन्नस्य । तद्यथा । अत्र विषये भवतस्तृष्णा-संयोजनप्रतिघसंयोजने पूर्वोत्पन्ने अप्रहीणे । न भवति प्रतिघसंयोजनं प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, प्रत्युत्पन्नस्य प्रतिघ-संयोजनस्य च प्रतिसंयोगः, नातीतस्य । तद्यथा । अत्र विषये भवति तृष्णा-संयोजनं पूर्वोत्पन्नम् अप्रहीणं । प्रतिघसंयोजनं भवति प्रत्युत्पन्नाभिमुखं । अथ भवति पूर्वमनुत्पन्नम् उत्पन्नं नु भवति प्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य च प्रतिसंयोगः । तद्यथा । अत्र विषये भवतस्तृष्णासंयोजन-प्रतिघसंयोजने पूर्वोत्पन्ने अप्रहीणे । प्रतिघसंयोजनं च भवति प्रत्युत्पन्नाभिमुखं ॥

नन्वतीतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगे किमतीतस्य तृष्णा-संयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (५) अतीत-अनागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किमनागत-प्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो न अनागतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रति-



संयोगः । तद्यथा । रूपारूप्यधातुधर्मेषु भवति तृष्णासंयोजनं [ 937a ] पूर्वोत्पन्नमप्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतस्य प्रतिघ-संयोजनस्य च प्रतिसंयोगः, न प्रत्युत्पन्नस्य । तद्यथा । अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नम् अप्रहीणं । भवति च प्रतिघसंयोजनम् अप्रहीणं न प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगो ऽपि । तद्यथा । अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नम् अप्रहीणं भवति च प्रतिघसंयोजनं प्रत्युत्पन्नाभिमुखं ॥

नन्वनागतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । पूर्वोत्पन्नम् अप्रहीणं चेत् प्रति-संयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ।

### (६) अतीत-अतीतानागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतानागतस्य प्रतिघसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, न अतीतानागतस्य प्रतिघसंयोजनस्य प्रतिसंयोगः । तद्यथा । रूपारूप्यधातुधर्मेषु भवति तृष्णासंयोजनमप्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतस्य प्रतिघ-संयोजनस्य च प्रतिसंयोगः, नातीतस्य । तद्यथा । अत्र विषये भवति तृष्णा-संयोजनं पूर्वोत्पन्नमप्रहीणं, भवति च प्रतिघसंयोजनमप्रहीणं, अथ न भवति प्रतिघसंयोजनं पूर्वोत्पन्नम् उत्पन्नं नु भवति प्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतानागतस्य प्रतिघसंयोजनस्य प्रतिसंयोगो ऽपि । तद्यथा । अत्र विषये भवतस्तृष्णासंयोजन-प्रतिघसंयोजने पूर्वोत्पन्ने अप्रहीणे ॥

नन्वतीतानागतस्य प्रतिघसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णा-

संयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नम् अप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

(७) अतीत—अतीतानागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोग स्तर्हि किम् अतीतानागतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, न अतीतानागतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगः। तद्यथा। रूपारूप्यधातुधर्मेषु भवति तृष्णा-संयोजनं पूर्वोत्पन्नमप्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतस्य प्रतिघ-संयोजनस्य च प्रतिसंयोगः, न अतीतप्रत्युत्पन्नस्य। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नम् अप्रहीणं। भवति च प्रतिघसंयोजनमप्रहीणं। अथ भवति प्रतिघसंयोजनं पूर्वमनुत्पन्नं, उत्पन्नं नु भवति प्रहीणं, न भवति प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य च प्रतिसंयोगः, नातीतस्य। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नम् अप्रहीणं, भवति च प्रतिघसंयोजनं प्रत्युत्पन्नाभिमुखं अथ न भवति पूर्वमुत्पन्नम् उत्पन्नं नु भवति प्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतानागतस्य प्रतिघसंयोजनस्य च प्रतिसंयोगः, न प्रत्युत्पन्नस्य। तद्यथा। अत्र विषये भवतस्तृष्णासंयोजनप्रतिघसंयोजने पूर्वोत्पन्ने अप्रहीणे। अथ न भवति प्रतिघ-संयोजनं प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतानागत-प्रत्युत्पन्नस्य प्रतिघसंयोजनस्य च प्रतिसंयोगः। तद्यथा। अत्र विषये भवत-स्तृष्णासंयोजनप्रतिघसंयोजने पूर्वोत्पन्ने अप्रहीणे। भवति च प्रतिघसंयोजनं प्रत्युत्पन्नाभिमुखं ॥



नन्वतीतानागतप्रत्युत्पन्नस्य प्रतिघसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य [937b] तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

[२] तृष्णा-ईर्ष्यासंयोजनाधिकारः

[३] तृष्णा-मात्सर्यसंयोजनाधिकारश्चातिदेशविधया

प्रतिघसंयोजनं प्रति यथा, ईर्ष्यासंयोजनं प्रति, मात्सर्यसंयोजनं प्रति चापि तथा। भेदस्त्वयं। कामधातुदर्शनहेयधर्मेषु रूपारूप्यधातुधर्मेषु च भवति तृष्णा-संयोजनं पूर्वोत्पन्नमप्रहीणं, न अतीतानागतप्रत्युत्पन्ने ईर्ष्यामात्सर्यसंयोजने ॥

[४] तृष्णा-मानसंयोजनाधिकारः

(१) अतीत-अतीतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतस्य मानसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रति-संयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥ नन्वतीतस्य मानसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

(२) अतीत-अनागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागतस्य मानसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। तथा॥ नन्वनागतस्य मानसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (३) अतीत-प्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किं प्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । प्रत्युत्पन्नं चेदभिमुखं ॥ ननु प्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयागः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (४) अतीत-अतीतप्रत्युत्पन्ननयः

अत्र विषये अतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतप्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, न अतीतप्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगः । तद्यथा । अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं । न भवति मानसंयोजनं पूर्वमुत्पन्नं, उत्पन्नं नु भवति प्रहीणं, नं च भवति प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतस्य मानसंयोजनस्य च प्रतिसंयोगः, न प्रत्युत्पन्नस्य । तद्यथा । अत्र विषये भवतस्तृष्णासंयोजनमानसंयोजने पूर्वोत्पन्ने अप्रहीणे । न भवति मानसंयोजनं प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, प्रत्युत्पन्नस्य मानसंयोजनस्य च प्रतिसंयोगः, नातीतस्य । तद्यथा । अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहोणं । भवति मानसंयोजनं प्रत्युत्पन्नाभिमुखं, अथ न भवति पूर्वमुत्पन्नम् उत्पन्नं नु भवति प्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतप्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगो ऽपि । तद्यथा । अत्र विषये भवतस्तृष्णासंयोजनमानसंयोजने पूर्वोत्पन्ने अप्रहीणे । भवति च मानसंयोजनं प्रत्युत्पन्नाभिमुखं ॥



नन्वतीतप्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगे किमतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (५) अतीत-अनागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागतप्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । अनागतस्य भवितव्यः प्रतिसंयोगः । प्रत्युत्पन्नस्यापि प्रत्युत्पन्नं चेद् अभिमुखं ॥ नन्वनागतप्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि । [937c] प्रतिवचनं । पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (६) अतीत-अतीतानागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतानागतस्य मानसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । अनागतस्य भवितव्यः प्रतिसंयोगः । पूर्वोत्पन्नमप्रहीणं चेद् अतीतस्य प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥ नन्वतीतानागतस्य मानसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (७) अतीत-अतीतानागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम अतीतानागतप्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतस्य मानसंयोजनस्य च प्रतिसंयोगः, नातीतप्रत्युत्पन्नस्य । तद्यथा । अत्र विषये भवति तृष्णासंयोजनं

पूर्वोत्पन्नमप्रहीणं, न भवति मानसंयोजनं पूर्वमुत्पन्नं, उत्पन्नं नु भवति प्रहीणं, न प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः। अतीतानागतस्य मानसंयोजनस्य च प्रतिसंयोगः, न प्रत्युत्पन्नस्य। तद्यथा। अत्र विषये भवतस्तृष्णासंयोजनमानसंयोजने पूर्वोत्पन्ने अ हीणे। न भवति मानसंयोजनं प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतप्रत्युत्पन्नस्य च मानसंयोजनस्य प्रतिसंयोगः, नातीतस्य। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, भवति च मानसंयोजनं प्रत्युत्पन्नाभिमुखं, अथ न भवति पूर्वमुत्पन्नम् उत्पन्नं नु भवति प्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतानागतप्रत्युत्पन्नस्य मानसंयोजनस्य च प्रतिसंयोगः। तद्यथा। अत्र विषये भवतस्तृष्णासंयोजनमानसंयोजने पूर्वोत्पन्ने अप्रहीणे। भवति च मानसंयोजनं प्रत्युत्पन्नाभिमुखं ॥

नन्वतीतानागतप्रत्युत्पन्नस्य मानसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### [५] तृष्णा-अविद्याधिकारः

#### (१) अतीत-अतीतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतस्य अविद्यासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। तथा॥ नन्वतीतस्य अविद्यासंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥



#### (२) अतीत-अनागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागतस्य अविद्यासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। तथा॥ नन्वनागतस्य अविद्यासंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

#### (३) अतीत-प्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किं प्रत्युत्पन्नस्य अविद्यासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। प्रत्युत्पन्नं चेद् अभिमुखं॥ ननु प्रत्युत्पन्नस्य अविद्यासंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

#### (४) अतीत-अतीतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगः [९३४a] तर्हि किम् अतीतप्रत्युत्पन्नस्य अविद्यासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। अतीतस्य भवितव्यः प्रतिसंयोगः। प्रत्युत्पन्नस्यापि प्रत्युत्पन्नं चेद् अभिमुखं॥ नन्वतीतप्रत्युत्पन्नस्य अविद्यासंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

#### (५) अतीत-अनागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागतप्रत्युत्पन्नस्य अविद्यासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। अनागतस्य

भवितव्यः प्रतिसंयोगः। प्रत्युत्पन्नस्यापि प्रत्युत्पन्नं चेद् अभिमुखं॥ ननु अनागत-प्रत्युत्पन्नस्य अविद्यासंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेद् प्रतिसंयोगः। यदि पूर्व-मनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

(६) अतीत-अतीतानागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीता-नागतस्य अविद्यासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। तथा॥ ननु अतीतानागतस्य अविद्यासंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्व-मनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

(७) अतीत-अतीतानागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीता-नागतप्रत्युत्पन्नस्य अविद्यासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। अतीता-नागतस्य भवितव्यः प्रतिसंयोगः। प्रत्युत्पन्नस्यापि प्रत्युत्पन्नं चेदभिमुखं॥ ननु अतीतानागतप्रत्युत्पन्नस्य अविद्यासंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णा-संयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

[६] तृष्णा-दृष्टिसंयोजनाधिकारः

(१) अतीत-अतीतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। अप्रहीणं चेत्॥ ननु अतीतस्य दृष्टिसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि अप्रतिसंयोगः॥



(२) अतीत-अनागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागतस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। अप्रहीणं चेत्॥ ननु अनागतस्य दृष्टिसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रति-संयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

(३) अतीत-प्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किं प्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। प्रत्युत्पन्नं चेद् अभिमुखं॥ ननु प्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत्प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः॥

(४) अतीत-अतीतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीत-प्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, न अतीतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगः। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, अत्र भवति दृष्टिसंयोजनं प्रहीणं॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतस्य [ 938b ] च दृष्टिसंयोजनस्य प्रतिसंयोगः, न प्रत्युत्पन्नस्य। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, दृष्टिसंयोजनं च अप्रहीणं, न प्रत्युत्पन्नाभिमुखं॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि । तद्यथा । अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, दृष्टिसंयोजनमपि भवति प्रत्युत्पन्नाभिमुखं ॥

ननु अतीतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (५) अतीत-अनागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अनागतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, न अनागतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगः। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, अथ दृष्टिसंयोजनं भवति प्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतस्य च दृष्टिसंयोजनस्य प्रतिसंयोगः, न प्रत्युत्पन्नस्य । तद्यथा । अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, दृष्टिसंयोजनं च भवति अप्रहीणं, अथ न भवति प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अनागतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि। तद्यथा । अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं दृष्टिसंयोजनं च भवति प्रत्युत्पन्नाभिमुखं ॥

ननु अनागतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥



### (६) अतीत-अतीतानागतनयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतानागतस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि । प्रतिवचनं । अप्रहीणं चेत् ॥ ननु अतीतानागतस्य दृष्टिसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः । प्रतिवचनं । पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः । यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

### (७) अतीत-अतीतानागतप्रत्युत्पन्ननयः

अत्र विषये ऽतीतस्य यदि तृष्णासंयोजनस्य प्रतिसंयोगस्तर्हि किम् अतीतानागतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि। प्रतिवचनं। भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, न अतीतानागतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगः। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, अथ दृष्टिसंयोजनं भवति प्रहीणं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतानागतस्य च दृष्टिसंयोजनस्य प्रतिसंयोगः, न प्रत्युत्पन्नस्य। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, दृष्टिसंयोजनं च भवति अप्रहीणं, अथ न भवति प्रत्युत्पन्नाभिमुखं ॥

भवति वा अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगः, अतीतानागतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगो ऽपि। तद्यथा। अत्र विषये भवति तृष्णासंयोजनं पूर्वोत्पन्नमप्रहीणं, दृष्टिसंयोजनमपि भवति प्रत्युत्पन्नाभिमुखं ॥

ननु अतीतानागतप्रत्युत्पन्नस्य दृष्टिसंयोजनस्य प्रतिसंयोगे किम् अतीतस्य तृष्णासंयोजनस्य प्रतिसंयोगो ऽपि। पूर्वोत्पन्नमप्रहीणं चेत् प्रतिसंयोगः। यदि पूर्वमनुत्पन्नम् उत्पन्नं नु प्रहीणं, तर्हि, अप्रतिसंयोगः ॥

[७] तृष्णा-परामर्शसंयोजनाधिकारः

[८] तृष्णा-विचिकित्सासंयोजनाधिकारश्चातिदेशविधया

यथा [938c] दृष्टिसंयोजनं प्रति, परामर्शसंयोजनं प्रति, विचिकित्सासंयोजनं प्रत्यपि तथा ॥

ख—क्षुद्रसप्तकविकल्पानामन्यत्रातिदेशः

यथा तृष्णासंयोजनस्य तदुत्तराणि प्रति कृतं क्षुद्रसप्तकं यावद् ईर्ष्यासंयोजनस्य [ तदुत्तरं ] मात्सर्यसंयोजनं प्रति कृतं क्षुद्रसप्तकमपि तथा ॥ क्षुद्रसप्तकं यथा, महासप्तकमपि तथा। अयं भेदः। द्वाभ्याम् एकं प्राप्ति यावद् अष्टाभिरेकं प्रति ॥ यथातीततृष्णादीनि पुरस्कृत्य सप्त यावद् अतीतानागतप्रत्युत्पन्नतृष्णादीनि पुरस्कृत्यापि प्रत्येकं सप्त ॥ एवं विज्ञातव्याः सप्त सप्त कोटयः ॥०॥ [ क्षुद्रमहत्सप्तकनिर्देशः परिनिष्ठितः ] ॥०॥

## ४. संग्रहः

क—अष्टानवत्यनुशयानां स्वैस्तत्पूर्वैश्च संग्रहः

त्रीणि संयोजनानि यावदष्टानवतिरनुशयाः। अष्टानवत्यनुशयेषु एकैकेन कत्यनुशयानां संग्रहः। प्रतिवचनं। सर्वं विवेक्तव्यं। तद्यथा। त्रिषु संयोजनेषु सत्कायदृष्टिसंयोजनेन त्रयाणां संग्रहः। शीलव्रतपरामर्शसंयोजनेन षण्णां संग्रहः। विचिकित्सासंयोजनेन द्वादशानां संग्रहः ॥

त्रिष्वकुशलमूलेषु लोभद्वेषयोरकुशलमूलयोः प्रत्येकेन पंचानां संग्रहः। मोहेनाकुशलमूलेन चतुर्णां संग्रहः, एकस्यैकदेशस्य च ॥

त्रिष्वास्रवेषु कामास्रवेण एकत्रिंशतः संग्रहः। भवास्रवेण द्वापंचाशतः संग्रहः। अविद्यास्रवेण पंचदशानां संग्रहः ॥



चतुर्ष्वोघेषु कामौघेन एकोनविंशतेः संग्रहः। भवौघेन अष्टाविंशतेः संग्रहः। दृष्ट्योघेन षट्त्रिंशतः संग्रहः। अविद्यौघेन पंचदशानां संग्रहः ॥

चत्वार ओघा यथा, चत्वारो योगा अपि तथा ॥

चतुर्षूपादानेषु कामोपादानेन चतुर्विंशतेः संग्रहः। दृष्ट्युपादानेन त्रिंशतः संग्रहः। शीलव्रतोपादानेन षण्णां संग्रहः। आत्मवादोपादानेन अष्टत्रिंशतः संग्रहः ॥

चतुर्षु कायग्रन्थेषु अभिध्याव्यापादयोः कायग्रन्थयोः प्रत्येकेन पंचानां संग्रहः। शीलव्रतपरामर्शकायग्रन्थेन षण्णां संग्रहः। इदंसत्याभिनिवेशकायग्रन्थेन द्वादशानां संग्रहः ॥

पंचसु नीवरणेषु कामच्छन्दव्यापादनीवरणयोः प्रत्येकेन पंचानां संग्रहः। विचिकित्सानीवरणेन चतुर्णां संग्रहः। अपराभ्यां नीवरणाभ्यां न संग्रहः।

पंचसु संयोजनेषु रागमानसंयोजनयोः प्रत्येकेन पंचदशानां संग्रहः। प्रतिघसंयोजनेन पंचानां संग्रहः। ईर्ष्यामात्सर्यसंयोजनाभ्यां न संग्रहः ॥

पंचस्ववरभागीयेषु संयोजनेषु कामरागप्रतिघसंयोजनयोः प्रत्येकेन पंचानां संग्रहः। सत्कायदृष्टिसंयोजनेन त्रयाणां संग्रहः। शीलव्रतपरामर्शसंयोजनेन षण्णां संग्रहः। विचिकित्सासंयोजनेन द्वादशानां संग्रहः ॥

पंचसूर्ध्वभागीयेषु संयोजनेषु रूपरागसंयोजनेन एकस्यैकदेशस्य संग्रहः। आरूप्यरागसंयोजनेन एकस्यैकदेशस्य संग्रहः। औद्धत्यसंयोजनेन न संग्रहः। मानसंयोजनेन द्वयोरेकदेशस्य संग्रहः। अविद्यासंयोजनेन द्वयोरेकदेशस्य संग्रहः ॥

पंचसु दृष्टिषु सत्कायदृष्ट्यन्तग्राहदृष्ट्योः प्रत्येकया त्रयाणां संग्रहः। मिथ्यादृष्टि दृष्टिपरामर्शयोः प्रत्येकेन द्वादशानां संग्रहः। शीलव्रतपरामर्शेन षण्णां संग्रहः ॥

षट्सु तृष्णाकायेषु चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकायानां प्रत्येकेन द्वयोरेकदेशस्य संग्रहः। घ्राणजिह्वासंस्पर्शजतृष्णाकाययोः प्रत्येकेन एकस्यैकदेशस्य संग्रहः। मनःसंस्पर्शजतृष्णाकायेन त्रयोदशानां संग्रहः, द्वयोरेकदेशस्य च ॥

सप्तस्वनुशयेषु कामरागप्रतिघानुशययोः प्रत्येकेन पंचानां संग्रहः। भवरागानुशयेन दशानां संग्रहः। मानाविद्यानुशययोः प्रत्येकेन पंचदशानां संग्रहः। [939a] दृष्ट्यनुशयेन षट्त्रिंशतः संग्रहः। विचिकित्सानुशयेन द्वादशानां संग्रहः ॥

नवसु संयोजनेषु तृष्णामानाविद्यासंयोजनानां प्रत्येकेन पंचदशानां संग्रहः। प्रतिघसंयोजनेन पंचानां संग्रहः। दृष्टिपरामर्शसंयोजनयोः प्रत्येकेन अष्टादशानां संग्रहः। विचिकित्सासंयोजनेन द्वादशानां संग्रहः। ईर्ष्यामात्सर्यसंयोजनाभ्यां न संग्रहः ॥

अष्टानवत्यनुशयेषु कामधातुकया सत्कायदृष्ट्या कामधातुकायाः सत्कायदृष्टेः संग्रहः —यावत्— आरूप्यधातुकया भावनाहेयया अविद्यया आरूप्यधातुकाया भावनाहेयाया अविद्यायाः संग्रहः ॥

### ख—पूर्वापरमिथःसंग्रहः

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः। तत्र किं पूर्वेण परसंग्रहः। परेर्वा पूर्वसंग्रहः। प्रतिवचनं। त्रीणि संयोजनानि, त्रीणि अकुशलमूलानि। एषां मिथो न संग्रहः ॥

त्रीणि संयोजनानि, त्रय आस्रवाः। त्रयाणां संयोजनानां द्वयोरास्रवयोरेकदेशस्य च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥

त्रीणि संयोजनानि, चत्वार ओघाः। त्रयाणां संयोजनानां त्रयाणामोघानामेकदेशस्य च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥

चतुरोघान् प्रति यथा, चतुर्योगान्प्रत्यपि तथा ॥

त्रीणि संयोजनानि, चत्वारि उपादानानि। त्रयाणां संयोजनानाम् एकस्योपादानस्य त्रयाणाम् एकदेशस्य च मिथः संग्रहः। अन्येषां न संग्रहः ॥

त्रीणि संयोजनानि, चत्वारः कायग्रन्थाः। एकस्य संयोजनस्य एकस्य कायग्रन्थस्य च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥

त्रीणि संयोजनानि, पंच नीवरणानि। एकस्य संयोजनस्यैकदेशस्य एकस्य नीवरणस्य च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥

त्रीणि संयोजनानि, पंच संयोजनानि। [एषां] न मिथः संग्रहः ॥

त्रीणि संयोजनानि, पंचावरभागीयसंयोजनानि। त्रयाणां संयोजनानां त्रयाणामवरभागीयसंयोजनानां च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥

त्रीणि संयोजनानि, पंचोर्ध्वभागीयसंयोजनानि। [एषां] न मिथः संग्रहः ॥



त्रीणि संयोजनानि, षट् तृष्णाकायाः। [एषां] न मिथः संग्रहः ॥

त्रीणि संयोजनानि, सप्तानुशयाः। त्रयाणां संयोजनानाम् एकस्यानुशयस्यैकदेशस्य च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥

त्रीणि संयोजनानि, नव संयोजनानि। त्रयाणां संयोजनानाम् एकस्य संयोजनस्य द्वयोरेकदेशस्य च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥

त्रीणि संयोजनानि, अष्टानवतिरनुशयाः। त्रयाणां संयोजनानाम् अनुशयानाम् एकविंशतेश्च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥ एवं यावद् नवसंयोजनानाम् अनुशयानामष्टानवतेश्च, सप्तसंयोजनानाम् अनुशयानामष्टानवतेश्च मिथः संग्रहः। अन्येषां न मिथः संग्रहः ॥०॥ [संग्रहनिर्देशः परिनिष्ठितः] ॥०॥

## ५. भव[संतानप्रवर्तनं]

त्रीणि संयोजनानि यावद् अष्टानवतिरनुशयाः। [एषां] कति कामभवसंतानं प्रवर्तयन्ति। कति रूपभवसंतानं प्रवर्तयन्ति। कत्यारूप्यभवसंतानं प्रवर्तयन्ति। प्रतिवचनं। सर्वं विवेक्तव्यं। तद्यथा। त्रीणि संयोजनानि त्रिभवसंतानं प्रवर्तयन्ति ॥

त्रीण्यकुशलमूलानि कामास्रवश्च कामभवसंतानं प्रवर्तयन्ति। भवास्रवो रूपारूप्यभवसंतानं प्रवर्तयति। अविद्यास्रवस् त्रिभवसंतानं प्रवर्तयति ॥

चतुषु ओघयोगेषु कामौघयोगः कामभवसंतानं प्रवर्तयति। भवौघयोगो रूपारूप्यभवसंतानं प्रवर्तयति। दृष्ट्यविद्यौघयोगौ त्रिभवसंतानं प्रवर्तयतः ॥

चतुर्षूपादानेषु कामोपादानं कामभवसंतानं प्रवर्तयति। दृष्टिशील [939b] व्रतोपादाने त्रिभवसंतानं प्रवर्तयतः। आत्मवादोपादानं रूपारूप्यभवसंतानं प्रवर्तयति।

चतुषु कायग्रन्थेषु पूर्वौ द्वौ कामभवसंतानं प्रवर्तयतः। पश्चिमौ द्वौ त्रिभवसंतानं प्रवर्तयतः ॥

पंच नीवरणानि कामभवसंतानं प्रवर्तयन्ति ॥

पंचसु संयोजनेषु रागमानसंयोजने त्रिभवसंतानं प्रवर्तयतः। अन्यानि त्रीणि संयोजनानि कामभवसंतानं प्रवर्तयन्ति ॥

पंचस्ववरभागीयसंयोजनेषु पूर्वे द्वे कामभवसंतानं प्रवर्तयत। पश्चिमानि त्रीणि त्रिभवसंतानं प्रवर्तयन्ति ॥

पंचसूर्ध्वभागीयेषु संयोजनेषु रूपरागो रूपभवसंतानं प्रवर्तयति। आरूप्यराग आरूप्यभवसंतानं प्रवर्तयति। अन्यानि त्रीणि रूपारूप्यभवसंतानं प्रवर्तयन्ति॥

पंच दृष्टयस् त्रिभवसंतानं प्रवर्तयन्ति॥

षट्सु तृष्णाकायेषु चक्षुःश्रोत्रकायसंस्पर्शजास्तृष्णाकायाः कामरूपभवसंतानं प्रवर्तयन्ति। घ्राणजिह्वासंस्पर्शजतृष्णाकायौ कामभवसंतानं प्रवर्तयतः। मनःसंस्पर्शजतृष्णाकायस् त्रिभवसंतानं प्रवर्तयति॥

सप्तस्वनुशयेषु कामरागप्रतिघौ कामभवसंतानं प्रवर्तयतः। भवरागो रूपारूप्यभवसंतानं प्रवर्तयति। अन्ये चत्वारस्त्रिभवसंतानं प्रवर्तयन्ति॥

नवसु संयोजनेषु प्रतिघेर्ष्यामात्सर्यसंयोजनानि कामभवसंतानं प्रवर्तयन्ति। अन्यानि षट् संयोजनानि त्रिभवसंतानं प्रवर्तयन्ति॥

अष्टानवत्यनुशयेषु कामधातुकाः षट्त्रिंशत् कामभवसंतानं प्रवर्तयन्ति। रूपधातुका एकत्रिंशद् रूपभवसंतानं प्रवर्तयन्ति। आरूप्यधातुका एकत्रिंशद् आरूप्यभवसंतानं प्रवर्तयन्ति॥०॥ [ भव(-संतानप्रवर्तन-) निर्देशः परिनिष्ठितः ]॥०॥

## ६. [ समापत्ति- ] निश्रयो [ निरोधः ]

त्रीणि संयोजनानि यावद् अष्टानवतिरनुशयाः। [ एतेषां ] कां समापत्तिं निश्रित्य निरोधः। प्रतिवचनं। त्रयाणां संयोजनानां चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

त्रयाणाम् अकुशलमूलानां कामास्रवस्य च अनागम्यं निश्रित्य निरोधः। भवास्रवाविद्यास्रवयोः सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

चतुर्षु ओघयोगेषु कामौघयोगस्य अनागम्यं निश्रित्य निरोधः। भवाविद्यौघयोगयोः सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः। दृष्ट्योघयोगस्य चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

चतुर्षूपादानेषु कामोपादानस्य अनागम्यं निश्रित्य निरोधः। दृष्ट्युपादानशीलव्रतोपादानयोश चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

आत्मवादोपादानस्य सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

चतुर्षु कायग्रन्थेषु पूर्वयोः द्वयोर् अनागम्यं निश्रित्य निरोधः। पश्चिमयोर्द्वयोश् चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥



पंचानां नीवरणानाम् अनागम्यं निश्रित्य निरोधः॥

पंचसु संयोजनेषु रागमानसंयोजनयोः सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः। अन्येषां त्रयाणां संयोजनानाम् अनागम्यं निश्रित्य निरोधः॥

पंचस्ववरभागीयेषु संयोजनेषु पूर्वयोर् द्वयोर् अनागम्यं निश्रित्य निरोधः। पश्चिमानां त्रयाणां चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

पंचसु ऊर्ध्वभागीयेषु संयोजनेषु रूपरागस्य चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः। अन्येषां चतुर्णां सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

पंचानां दृष्टीनां चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

षट्सु तृष्णाकायेषु घ्राणजिह्वासंस्पर्शजतृष्णाकाययोर् अनागम्यं निश्रित्य [ 939c ] निरोधः। चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकायानां प्रथमं निश्रित्य, अनागम्यं निश्रित्य वा निरोधः। मनःसंस्पर्शजतृष्णाकायस्य सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

सप्तसु अनुशयेषु कामरागप्रतिघयोर् अनागम्यं निश्रित्य निरोधः। भवरागमानाविद्यानां सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः। दृष्टिविचिकित्सयोश् चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

नवसु संयोजनेषु तृष्णामानाविद्यानां सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः। प्रतिघेर्ष्यामात्सर्याणाम् अनागम्यं निश्रित्य निरोधः। दृष्टि-परामर्शविचिकित्सानां चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥

अष्टानवत्यनुशयेषु कामधातुकानां षट्त्रिंशतोऽनागम्यं निश्रित्य निरोधः। रूपधातुकानाम् एकत्रिंशतः, आरूप्यधातुकानां दर्शनहेयानां च चत्वारि निश्रित्य, अनागम्यं निश्रित्य वा निरोधः। आरूप्यधातुकानां भावनाहेयानां सप्त निश्रित्य, अनागम्यं निश्रित्य वा निरोधः॥०॥ [ ( समापत्ति ) निश्रय ( -निरोध- ) निर्देशः परिनिष्ठितः ]॥०॥

## ७. प्रतिसंयोगः

### (१) अतीत-प्रतिसंयुक्तनयः

सर्वाणि संयोजनानि अतीतानि, तानि संयोजनानि प्रतिसंयुक्तानि किं। प्रतिवचनं। सर्वाणि संयोजनानि अतीतानि तानि संयोजनानि प्रतिसंयुक्तानि। सन्ति संयोजनानि प्रतिसंयुक्तानि तानि संयोजनानि नातीतानि। तद्यथा। संयोजनानि अनागतप्रत्युत्पन्नानि प्रतिसंयुक्तानि ॥

### (२) अनागत-प्रतिसंयोक्ष्यमाणनयः

सर्वाणि संयोजनानि अनागतानि, तानि संयोजनानि प्रतिसंयोक्ष्यमाणानि किं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। संति संयोजनानि अनागतानि, तानि संयोजनानि न प्रतिसंयोक्ष्यमाणानि। तद्यथा। संयोजनानि अनागतानि प्रहीणानि परिज्ञातानि निरुद्धानि उद्वान्तानि नियतम् अविवर्तिष्यमाणानि ॥

सन्ति संयोजनानि प्रतिसंयोक्ष्यमाणानि, तानि संयोजनानि न अनागतानि। तद्यथा। संयोजनानि अतीतानि प्रहीणानि परिज्ञातानि निरुद्धानि उद्वान्तानि नियतम् अविवर्तिष्यमाणानि ॥

सन्ति संयोजनानि अनागतानि, तानि संयोजनानि प्रतिसंयोक्ष्यमाणान्यपि। तद्यथा। संयोजनानि अनागतानि प्रहीणानि परिज्ञातानि निरुद्धानि उद्वान्तानि प्रतिनिवर्तिष्यमाणानि ॥

सन्ति संयोजनानि न अनागतानि, तानि संयोजनानि अप्रतिसंयोक्ष्यमाणान्यपि। तद्यथा। संयोजनानि अतीतानि प्रहीणानि परिज्ञातानि निरुद्धानि उद्वान्तानि नियतम् अविवर्तिष्यमाणानि प्रत्युत्पन्नानि च संयोजनानि ॥

### (३) प्रत्युत्पन्न-प्रतिसंयुज्यमाननयः

सर्वाणि संयोजनानि प्रत्युत्पन्नानि, तानि संयोजनानि प्रतिसंयुज्यमानानि किं। प्रतिवचनं। सर्वाणि संयोजनानि प्रत्युत्पन्नानि तानि संयोजनानि प्रतिसंयुज्यमानानि। संति संयोजनानि प्रतिसंयुज्यमानानि तानि संयोजनानि न प्रत्युत्पन्नानि। तद्यथा। संयोजनानि अतीतानि अनागतानि प्रतिसंयुज्यमानानि ॥०॥ [प्रतिसंयोगनिर्देशः परिनिष्ठितः] ॥०॥



## ८. मार्ग [विवर्तने प्रतिसंयोग]ः

सर्वस्य एतन्मार्गप्रयोगेण छिन्नकामधातुसंयोजनस्य एतस्माद् मार्गाद् विवर्तनकाले पुनस् तत्संयोजनप्रतिसंयोगस्य प्राप्तिः किं। प्रतिवचनं। पुनस् तत्संयोजनप्रतिसंयोगस्य प्राप्तिः ॥

सर्वस्य एतन्मार्गप्रयोगेण छिन्नरूपारूप्यधातुसंयोजनस्य एतस्माद् मार्गाद् विवर्तनकाले पुनस् तत्संयोजनप्रतिसंयोगस्य प्राप्तिः किं। प्रतिवचनं। पुनस् तत्संयोजनप्रतिसंयोगस्य प्राप्तिः ॥०॥ [मार्गविवर्तनप्रतिसंयोगनिर्देशःपरिनिष्ठितः] ॥०॥

## ९. परिज्ञा

### (१) नवपरिज्ञोद्देशः

नव परिज्ञाः। तद्यथा। कामधातुकानां दुःखसमुदयदर्शनहेयानां संयोजनानां प्रहाणमिति प्रथमा परिज्ञा।१। रूपारूप्यधातुकानां दुःखसमुदयदर्शनहेयानां संयोजनानां प्रहाणमिति द्वितीया परिज्ञा।२। कामधातुकानां निरोधदर्शनहेयानां संयोजनानां प्रहाणमिति तृतीया परिज्ञा।३। रूपारूप्यधातुकानां निरोधदर्शनहेयानां संयोजनानां प्रहाणमिति चतुर्थी परिज्ञा।४। कामधातुकानां मार्गदर्शनहेयानां संयोजनानां प्रहाणमिति पंचमी परिज्ञा।५। रूपारूप्यधातुकानां मार्गदर्शनहेयानां संयोजनानां प्रहाणमिति षष्ठी परिज्ञा।६। पंचानाम् [940a] अवरभागीयानां संयोजनानां प्रहाणमिति सप्तमी परिज्ञा।७। रूपरागसंयोजनप्रहाणमिति अष्टमी परिज्ञा।८। सर्वसंयोजनप्रहाणमिति नवमी परिज्ञा।९॥

### (२) नवपरिज्ञाभिः सर्वपरिज्ञानामसंग्रहः

नवभिः परिज्ञाभिः सर्वपरिज्ञासंग्रहः, अथवा, सर्वाभिः परिज्ञाभिर् नवपरिज्ञासंग्रहः। प्रतिवचनं। सर्वाभिर् नवानां संग्रहः। न तु नवभिः सर्वासां संग्रहः ॥

असंग्रहः कासां। तद्यथा। दुःखज्ञाने उत्पन्ने समुदयज्ञाने ऽनुत्पन्ने त्रैधातुकानां दुःखदर्शनहेयानां संयोजनानां प्रहाणस्य न नवभिः संग्रहः॥ दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणे कामरागे कामधातुकानां भावनाहेयसंयोजनानां प्रहाणस्य न नवभिः संग्रहः॥ प्रहीणे कामरागे ऽअप्रहीणे रूपरागे रूपधातुकानां भावनाहेयसंयोजनानां प्रहाणस्य न नवभिः संग्रह॥ प्रहीणे रूपरागे अप्रहीणे आरूप्यरागे आरूप्यधातुकानां भावनाहेयसंयोजनानां न नवभिः संग्रहः॥

### (३) पुद्गलैः परिज्ञानिष्पत्यनिष्पत्ती

अष्टौ पुद्गलाः। १ स्रोतआपत्तिमार्गप्रतिपन्नकः, २ स्रोतआपत्तिफलप्रतिपन्नकः, ३ सकृदागामिमार्गप्रतिपन्नकः, ४ सकृदागामिफलप्रतिपन्नकः, ५ अनागामिमार्गप्रतिपन्नकः, ६ अनागामिफलप्रतिपन्नकः, ७ अर्हन्मार्गप्रतिपन्नकः, ८ अर्हत्फलप्रतिपन्नकश्च॥

एते ऽष्टौ पुद्गला नवसु परिज्ञासु कति निष्पादयन्ति कति न निष्पादयन्ति। प्रतिवचनं। स्रोतआपत्तिमार्गप्रतिपन्नको न निष्पादयति। निष्पादयति वा एकां, द्वे, तिस्रः, चतस्रः, पंच वा। तद्यथा। दुःखेधर्मज्ञानक्षान्ति —यावत्— समुदयेधर्मज्ञानक्षान्तिपुद्गलाः [१-५] न निष्पादयन्ति। समुदयेधर्मज्ञान-समुदये ऽन्वयज्ञानक्षान्तिपुद्गलौ [६, ७] निष्पादयत एकां। समुदये ऽन्वयज्ञान-निरोधे-धर्मज्ञानक्षान्तिपुद्गलौ [८, ९] निष्पादयतो द्वे। निरोधेधर्मज्ञान-निरोधे ऽन्वयज्ञानक्षान्तिपुद्गलौ [१०, ११] निष्पादयतस् तिस्रः। निरोधेऽन्वयज्ञान-मार्गेधर्मज्ञानक्षान्तिपुद्गलौ [१२, १३] निष्पादयश् चतस्रः। मार्गेधर्मज्ञान-मार्गे ऽन्वयज्ञानक्षान्तिपुद्गलौ [१४, १५] निष्पादयतः पंच॥

---

षोड़शचित्तक्षणभेदेन परिज्ञाप्राप्त्यप्राप्ती इह वर्णिते। त इमे षोडशचित्तक्षणाकाराः—

| | | | |
|---|---|---|---|
| [१] दुःखे धर्मज्ञानक्षान्तिः | [२] दुःखे धर्मज्ञानं | [३] दुःखे ऽन्वयज्ञानक्षान्तिः | [४] दुःखे ऽन्वयज्ञानं |
| [५] समुदये „ | [६] समुदये „ | [७] समुदये „ | [८] समुदये „ |
| [९] निरोधे „ | [१०] निरोधे „ | [११] निरोधे „ | [१२] निरोधे „ |
| [१३] मार्गे „ | [१४] मार्गे „ | [१५] मार्गे „ | [१६] मार्गे „ |



स्रोतआपत्तिफलप्रतिपन्नको निष्पादयति षट्। सकृदागामिमार्गप्रतिपन्नको युगपत् कामरागप्रहीणः सम्यक्त्वन्यामावक्रांतश्चेत् स्रोतआपतिमार्गप्रतिपन्नकवत्। स्रोतआपत्तिफलात् सकृदागामिफलानुसारी सकृदागामिफलप्रतिपन्नकश्च निष्पादयतः षट्। अनागामिमार्गप्रतिपन्नकः प्रहीणकामरागः सम्यक्त्वन्यामावक्रान्तश्चेत् स्रोतआपत्तिमार्गप्रतिपन्नकवत्। सकृदागामिफलाद् अनागामिफलानुसारी निष्पादयति षट्। अनागामिफलप्रतिपन्नको निष्पादयति एकाम्। तद्यथा। पंचवरभागोयसंयोजनप्रहाणं। अर्हन्मार्गप्रतिपन्नको निष्पादयति एकां। निष्पादयति द्वे वा। तद्यथा। अप्रहोणरूपरागो निष्पादयति एकां। प्रहोणरूपरागो निष्पादयति द्वे। अर्हत्फलप्रतिपन्नको निष्पादयति एकां। तद्यथा। सर्वसंयोजनप्रहाणं ॥०॥ [ 940b ] [ परिज्ञानिर्देशः परिनिष्ठितः ] ॥०॥

इति ज्ञानप्रस्थानस्य द्वितीये संयोजनस्कंधे सहचरितं नाम द्वितीयो निःश्वासः॥

द्वितीये संयोजनस्कन्धे

# तृतीयो निःश्वासः

सत्त्वाः

उद्देशः

१युगपत्क्रमेण च प्रतिसंयोगविप्रतिसंयोगौ २फलसंग्रहसप्तकं ३निष्पत्तित्रिकं।
४च्युतोपपादषडाकाराः—इति वर्गे विवक्षितं॥

## १. युगपत्क्रमेण च प्रतिसंयोगविप्रतिसंयोगौ

### (१) कामधातुकसंयोजनप्रतिसंयोगविप्रतिसंयोगौ

त्रिषु धातुषु प्रत्येकं द्विवर्गीयाणि संयोजनानि। तद्यथा। दर्शनहेयानि भावनाहेयानि॥ कामधातौ दर्शनभावनाहेयानां द्विवर्गीयाणां संयोजनानां युगपत् प्रतिसंयोगलाभः कस्यचिद् भवति किं। प्रतिवचनं। भवति। तद्यथा। प्रहीणकामरागस्य पृथग्जनस्य कामविरागाद् विवर्तनकाले, रूपारूप्यधातुभ्यां च्युतस्य कामधातावुपपत्तिकाले॥

युगपद् विप्रतिसंयोगः कस्यचिद् भवति किं। प्रतिवचनं। भवति। तद्यथा। पृथग्जनस्य कामविरागकाले॥

क्रमेण प्रतिसंयोगलाभः कस्यचिद् भवति किं। प्रतिवचनं। न भवति॥

क्रमेण विप्रतिसंयोगः कस्यचिद् भवति किं। प्रतिवचनं। भवति। तद्यथा। श्रावकस्य पूर्वं दर्शनहेयसंयोजनप्रहाणं। पश्चाद् भावनाहेयसंयोजन प्रहाणं॥

### (२) रूपधातुकसंयोजनप्रतिसंयोगविप्रतिसंयोगौ

रूपधातौ दर्शनभावनाहेयानां द्विवर्गीयाणां संयोजनानां युगपत् प्रतिसंयोगलाभः कस्यचिद् भवति किं। प्रतिवचनं। भवति। तद्यथा। प्रहीणरूपरागस्य



पृथग्जनस्य रूपविरागाद् विवर्तनकाले, आरूप्यधातोश् च्युतस्य कामधातौ रूपधातौ वा उपपत्तिकाले॥

युगपद् विप्रतिसंयोगः कस्यचिद् भवति किं। प्रतिवचनं। भवति। तद्यथा। पृथग्जनस्य रूपविरागकाले॥

क्रमेण प्रतिसंयोगलाभः कस्यचिद् भवति किं। प्रतिवचनं। न भवति॥

क्रमेण विप्रतिसंयोगः कस्यचिद् भवति किं। प्रतिवचनं। भवति। तद्यथा। श्रावकस्य पूर्वं दर्शनहेयसंयोजनप्रहाणं, पश्चाद् भावनाहेयसंयोजन-प्रहाणं॥

### (३) आरूप्यधातुकसंयोजनप्रतिसंयोगविप्रतिसंयोगौ

आरूप्यधातौ दर्शनभावनाहेयानां द्विवर्गीयाणां संयोजनानां युगपत् प्रतिसंयोगलाभः कस्यचिद् भवति किं। प्रतिवचनं। न भवति॥

युगपद् विप्रतिसंयोगः कस्यचिद् भवति किं। प्रतिवचनं। न भवति॥

क्रमेण प्रतिसंयोगलाभः कस्यचिद् भवति किं। प्रतिवचनं। न भवति॥

क्रमेण विप्रतिसंयोगः कस्यचिद् भवति किं। प्रतिवचनं। भवति। तद्यथा। श्रावकस्य पूर्वं दर्शनहेयसंयोजनप्रहाणं, पश्चाद् भावनाहेयसंयोजन-प्रहाणं॥०॥ [युगपत्क्रमेण च प्रतिसंयोगविप्रतिसंयोगयोर्निर्देशः परिनिष्ठितः] ॥०॥

## २. फलसंग्रहसप्तकं

### (१) द्विविधत्रैधातुकसंयोजनक्षयाधिकारः

कामधातुकदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं। चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा॥

कामधातुकभावनाहेयसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं। अनागाम्यर्हत्फलसंगृहीतः, असंगृहीतो वा॥

रूपधातुकदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं। चतुः-श्रामण्यफलसंगृहीतः, असंगृहीतो वा॥

रूपधातुकभावनाहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । अर्हत्फलसंगृहीतः, असंगृहीतो वा ॥

आरूप्यधातुकदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । चतुः श्रामण्यफलसंगृहीतः ॥

आरूप्यधातुकभावनाहेयसंयोजनक्षयः कतमत्फल [ 940c ] संगृहीतः। प्रतिवचनं । अर्हत्फल [ संगृहीतः ] ॥०॥

## (२) पंचवर्गीयसंयोजनक्षयाधिकारः

पंचवर्गीयसंयोजनानि । तद्यथा । दुःखदर्शनहेयसंयोजनानि यावद् भावनाहेयसंयोजनानि ॥

दुःखदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

समुदयदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

निरोधदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

मार्गदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । चतुःश्रामण्यफलसंगृहीतः ॥

भावनाहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । अर्हत्फलसंगृहीतः ॥०॥

## (३) नववर्गीयसंयोजनक्षयाधिकारः

नववर्गीयसंयोजनानि । तद्यथा । दुःखधर्मज्ञानहेयसंयोजनानि यावद् भावनाहेयसंयोजनानि ॥

दुःखधर्मज्ञानहेयसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं । चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥



दुःखान्वयज्ञान —यावद्— मार्गधर्मज्ञानहेयसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं। चतुः श्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

मार्गान्वयज्ञानसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । चतुःश्रामण्यफलसंगृहीतः ॥

भावनाहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । अर्हत्फलसंगृहीतः ॥०॥

## (४) पंचदशवर्गीयसंयोजनक्षयाधिकारः

पंचदशवर्गीयसंयोजनानि । तद्यथा । त्रिषु धातुषु प्रत्येकस्मिन् पंचवर्गीयाणि दर्शनहेयसंयोजनानि यावद् भावनाहेयसंयोजनानि ॥

कामधातुकदुःखसमुदयनिरोधमार्गदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं। चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

कामधातुकभावनाहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । अनागाम्यर्हत्फलसंगृहीतः, असंगृहीतो वा ॥

रूपधातुकदुःखसमुदयनिरोधमार्गदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं। चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

रूपधातुकभावनाहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । अर्हत्फलसंगृहीतः, असंगृहीतो वा ॥

आरूप्यधातुकदुःखसमुदयनिरोधदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं। चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

आरूप्यधातुकमार्गदर्शनहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । चतुःश्रामण्यफलसंगृहीतः ॥

आरूप्यधातुकभावनाहेयसंयोजनक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । अर्हत्फलसंगृहीतः ॥०॥

## (५) त्रिसंयोजन—यावद्—अष्टानवत्यनुशयक्षयाधिकारः

त्रीणि संयोजनानि यावद् अष्टानवत्यनुशयाः । एकैकक्षयः कतमत्फलसंगृहीतः । प्रतिवचनं । त्रिषु संयोजनेषु सत्कायदृष्टिक्षयश् चतुःश्रामण्यफल-

संगृहीतः, असंगृहीतो वा ॥ यथा त्रिषु संयोजनेषु सत्कायदृष्टिक्षयः। तथा पंचावरभागीयसंयोजनेषु सत्कायदृष्टेः, पंचदृष्टिषु सत्कायदृष्ट्यन्तग्राहदृष्ट्योः क्षयोऽपि ज्ञातव्यः ॥

शीलव्रतपरामर्शविचिकित्साक्षयः चतुःश्रामण्यफलसंगृहीतः ॥ यथा त्रिषु संयोजनेषु शीलव्रतपरामर्शविचिकित्साक्षयः। तथा चतुरोघयोगेषु दृष्ट्योघयोगस्य, चतुरुपादानेषु दृष्ट्युपादानशीलव्रतो [ 941a ] पादानयोः, चतुःकायग्रन्थेषु शीलव्रतपरामर्शेदंसत्याभिनिवेशकायग्रन्थयोः, पंचावरभागीयसंयोजनेषु शीलव्रतपरामर्शविचिकित्सयोः, पंचदृष्टिषु मिथ्यादृष्टि-दृष्टिपरामर्श-शीलव्रतपरामर्शानां, सप्तानुशयेषु दृष्टिविचिकित्सानुशययोः, नवसंयोजनेषु दृष्टि-परामर्श-विचिकित्सासंयोजनां क्षयोऽपि ज्ञातव्यः ॥

त्रयाणामकुशलमूलानां क्षयोऽनागाम्यर्हत्फलसंगृहीतः, असंगृहीतो वा। यथा त्रयाणामकुशलमूलानां क्षयः। तथा त्र्यास्रवेषु कामास्रवस्य, चतुरोघयोगेषु कामौघयोगस्य, चतुरुपादानेषु कामोपादानस्य, चतुःकायग्रन्थेषु अभिध्याव्यापादयोः, पंचनीवरणेषु पौर्विकाणां चतुर्णां नीवरणानां, पंचसंयोजनेषु प्रतिघेर्ष्यामात्सर्यसंयोजनानां, पंचावरभागीयसंयोजनेषु कामरागप्रतिघयोः, षट्तृष्णाकायेषु घ्राणजिह्वासंस्पर्शजतृष्णाकाययोः, सप्तानुशयेषु कामरागप्रतिघयोः, नवसंयोजनेषु प्रतिघेर्ष्यामात्सर्यसंयोजनानां क्षयोऽपि ज्ञातव्यः ॥

भवास्रवाविद्यास्रवक्षयोऽर्हत्फलसंगृहीतः ॥ यथा भवास्रवाविद्यास्रवक्षयः। तथा चतुरोघयोगेषु भवाविद्यौघयोगयोः, चतुरुपादानेषु आत्मवादोपादानस्य, पंचसंयोजनेषु रागमानसंयोजनयोः, पंचोर्ध्वभागीयसंयोजनेषु रूपरागेतराणां चतुर्णां, षट्तृष्णाकायेषु मनःसंस्पर्शजतृष्णाकायस्य, सप्तानुशयेषु भवरागाविद्यामानानां, नवसंयोजनेषु तृष्णामानाविद्यासंयोजनानां क्षयोऽपि ज्ञातव्यः ॥

विचिकित्सानीवरणक्षयश् चतुः श्रामण्यफलसंगृहीतः। असंगृहीतो वा ॥

रूपरागोर्ध्वभागीयसंयोजनक्षयोऽर्हत्फलसंगृहीतः, असंगृहीतो वा। यथा रूपरागोर्ध्वभागीयसंयोजनक्षयः, तथा चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकायक्षयोऽपि ज्ञातव्यः ॥

अष्टानवत्यनुशयेषु कामधातुकदुःखसमुदयनिरोधमार्गदर्शनहेयानुशयानां क्षयः चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

कामधातुकभावनाहेयानुशयानां क्षयोऽनागाम्यर्हत्फलसंगृहीतः, असंगृहीतो वा॥



रूपधातुकदुःखसमुदयनिरोधमार्गदर्शनहेयानुशयानां क्षयः चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

रूपधातुकभावनाहेयानुशयानां क्षयोऽर्हत्फलसंगृहीतः, असंगृहीतो वा ॥

आरूप्यधातुकदुःखसमुदयनिरोधदर्शनहेयानुशयानां क्षयश् चतुःश्रामण्यफलसंगृहीतः, असंगृहीतो वा ॥

आरूप्यधातुकमार्गदर्शनहेयानुशयानां क्षयश् चतुःश्रामण्यफलसंगृहीतः ॥

आरूप्यधातुकभावनाहेयानुशयानां क्षयोऽर्हत्फलसंगृहीतः ॥०॥

## (६) मार्गफलप्रतिपत्तौ संयोजनक्षयाधिकारः

स्रोतआपत्तिमार्गप्रतिपत्तौ सर्वसंयोजनक्षयः कतमत्फलसंगृहीतः। प्रतिवचनं। असंगृहीतः ॥

स्रोतआपत्तिफलप्रतिपत्तौ सर्वसंयोजनक्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। स्रोतआपत्तिफलेन ॥

सकृदागामिमार्गप्रतिपत्तौ सर्वसंयोजनक्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। स्रोतआपत्तिफलेन, न केनचिद् वा ॥

सकृदागामिफलप्रतिपत्तौ सर्वसंयोजनक्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। सकृदागामिफलेन ॥

अनागामिमार्गप्रतिपत्तौ सर्वसंयोजन[ 941b ]क्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। सकृदागामिफलेन, न केनचिद् वा ॥

अनागामिफलप्रतिपत्तौ सर्वसंयोजनक्षय कतमेन फलेन संगृहीतः। प्रतिवचनं। अनागामिफलेन ॥

अर्हन्मार्गप्रतिपत्तौ सर्वसंयोजनक्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। अनागामिफलेन ; न केनचिद् वा ॥

अर्हत्फलप्रतिपत्तौ सर्वसंयोजनक्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। अर्हत्फलेन ॥०॥

## (७) दृष्टिप्राप्तौ संयोजनक्षयाधिकारः

दृष्टिप्राप्तस्य श्रावकस्य अप्रहीणे कामरागे कामधातुकभावनाहेयसर्व-

संयोजनक्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। सकृदागामिफलेन, न केनचिद् वा॥

प्रहीणकामरागस्य अप्रहीणे रूपरागे रूपधातुकभावनाहेयसर्वसंयोजनक्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। न केनचित्॥

प्रहीणरूपरागस्य अप्रहीणे आरूप्यरागे आरूप्यधातुकभावनाहेयसर्वसंयोजनक्षयः कतमेन फलेन संगृहीतः। प्रतिवचनं। न केनचित्॥०॥ [ फलसंग्रहसप्तकनिर्देशः परिनिष्ठितः ]॥०॥

## ३. निष्पत्तित्रिकं

### (१) शैक्षाशैक्षधर्माधिकारः

#### क—स्रोतआपन्नपुद्गलः

सर्वस्रोतआपन्ननिष्पाद्यशैक्षधर्माः। किमेतेषां धर्माणां स्रोतआपत्तिफलेन संग्रहः। प्रतिवचनं। संग्रहो वा, असंग्रहो वा। संग्रहः कतमस्य। प्रतिवचनं। संस्कृतस्य स्रोतआपत्तिफलस्य लब्धस्य अविप्रणष्टस्य। असंग्रहः कतमस्य। प्रतिवचनं। सर्वस्रोतआपन्नप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृतधर्माणां॥

ननु स्रोतआपत्तिफलसंगृहीता धर्मा एते शैक्षधर्माः किं। प्रतिवचनं। शैक्षा वा, नशैक्षनाशैक्षा वा। शैक्षः कतमः। प्रतिवचनं। संस्कृतं स्रोतआपत्तिफलं। नशैक्षनाशैक्षः कतमः। प्रतिवचनं। असंस्कृतं स्रोतआपत्तिफलं॥

#### ख—सकृदागामिपुद्गलः

सर्वसकृदागामिनिष्पाद्यशैक्षधर्माः। किमेतेषां धर्माणां सकृदागामिफलेन संग्रहः। प्रतिवचनं। संग्रहो वा, असंग्रहो वा। संग्रहः कतमस्य। प्रतिवचनं। संस्कृतस्य सकृदागामिफलस्य लब्धस्य अविप्रणष्टस्य। असंग्रहः कतमस्य। प्रतिवचनं। सर्वसकृदागामिप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृतधर्माणां॥



ननु सकृदागामिफलसंगृहीता धर्मा एते शैक्षधर्माः किं। प्रतिवचनं। शैक्षा वा, नशैक्षनाशैक्षा वा। शैक्षः कतमः। प्रतिवचनं। संस्कृतं सकृदागामिफलं। नशैक्षनाशैक्षः कतमः। प्रतिवचनं। असंस्कृतं सकृदागामिफलं॥

#### ग—अनागामिपुद्गलः

सर्वानागामिनिष्पाद्यशैक्षधर्माः। किमेतेषां धर्माणाम् अनागामिफलेन संग्रहः। प्रतिवचनं। संग्रहो वा, असंग्रहो वा। संग्रहः कतमस्य। प्रतिवचनं। संस्कृतस्य अनागामिफलस्य लब्धस्य अविप्रणष्टस्य। असंग्रहः कतमस्य। प्रतिवचनं। सर्वानागामिप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृतधर्माणां॥

ननु अनागामिफलसंगृहीता धर्मा एते शैक्षधर्माः किं। प्रतिवचनं। शैक्षा वा नशैक्षनाशैक्षा वा। शैक्षः कतमः। प्रतिवचनं। संस्कृतम् अनागामिफलं। नशैक्षनाशैक्षः कतमः। प्रतिवचनं। असंस्कृतम् अनागामिफलं॥

#### घ—अर्हत्पुद्गलः

सर्वार्हन्निष्पाद्या अशैक्षधर्माः। किमेतेषां धर्माणाम् अर्हत्फलेन संग्रहः। प्रतिवचनं। तथा॥

ननु अर्हत्फलसंगृहीता धर्माः [ 941c ] एते ऽशैक्षधर्माः किं। प्रतिवचनं। अशैक्षा वा, नशैक्षनाशैक्षा वा। अशैक्षः कतमः। प्रतिवचनं। संस्कृतम् अर्हत्फलं। नशैक्षनाशैक्षः कतमः। प्रतिवचनं। असंस्कृतम् अर्हत्फलं॥०॥

### (२) अनास्रवधर्माधिकारः

#### क—स्रोतआपन्नपुद्गलः

सर्वस्रोतआपन्ननिष्पाद्यानास्रवधर्माः। किमेतेषां धर्माणां स्रोतआपत्तिफलेन संग्रहः। प्रतिवचनं। संग्रहो वा, असंग्रहो वा। संग्रहः कतमस्य। प्रतिवचनं। संस्कृतासंस्कृतस्य स्रोतआपत्तिफलस्य लब्धस्य अविप्रणष्टस्य। असंग्रहः कतमस्य। सर्वस्रोतआपन्नप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृत-

धर्माणां, तत्साक्षात्कर्तव्यसर्वसंयोजनक्षयस्य, स्रोतआपत्तिप्राप्यस्य अप्रतिसंख्यानिरोधस्य च ॥

ननु स्रोतआपत्तिफलसंगृहीता धर्मा एते ऽनास्रवधर्माः किं। प्रतिवचनं। तथा ॥

### ख—सकृदागामिपुद्गलः

सर्वसकृदागामिनिष्पाद्यानास्रवधर्माः। किमेतेषां धर्माणां सकृदागामिफलेन संग्रहः। प्रतिवचनं। संग्रहो वा, असंग्रहो वा। संग्रहः कतमस्य। प्रतिवचनं। संस्कृतासंस्कृतस्य सकृदागामिफलस्य लब्धस्य अविप्रणष्टस्य। असंग्रहः कतमस्य। प्रतिवचनं। सर्वसकृदागामिप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृतधर्माणां, तत्साक्षात्कर्तव्यसर्वसंयोजनक्षयस्य, सकृदागामिप्राप्यस्य अप्रतिसंख्यानिरोधस्य च ॥

ननु सकृदागामिफलसंगृहीता धर्मा एते ऽनास्रवधर्माः किं। प्रतिवचनं। तथा ॥

### ग—अनागामिपुद्गलः

सर्वानागामिनिष्पाद्यानस्रवधर्माः। किमेतेषां धर्माणाम् अनागामिफलेन संग्रहः। प्रतिवचनं। संग्रहो वा, असंग्रहो वा। संग्रहः कतमस्य। प्रतिवचनं। संस्कृतासंकृतस्य अनागामिफलस्य लब्धस्य अविप्रणष्टस्य। असंग्रहः कतमस्य। प्रतिवचनं। सर्वानागामिप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृतधर्माणां, तत्साक्षात्कर्तव्यसर्वसंयोजनक्षयस्य, अनागामिप्राप्यस्य अप्रतिसंख्यानिरोधस्य च ॥

ननु अनागामिफलसंगृहीता धर्मा एते अनास्रवधर्माः किं। प्रतिवचनं। तथा ॥

### घ—अर्हत्पुद्गलः

सर्वार्हन्निष्पाद्यानास्रवधर्माः। किमेतेषां धर्माणाम् अर्हत्फलेन संग्रहः। प्रतिवचनं। संग्रहो वा, असंग्रहो वा। संग्रहः कतमस्य। प्रतिवचनं। संस्कृता-



संस्कृतस्य अर्हत्फलस्य लब्धस्य अविप्रणष्टस्य। असंग्रहः कतमस्य। प्रतिवचनं। अर्हत्प्राप्यस्य अप्रतिसंख्यानिरोधस्य ॥

ननु अर्हत्फलसंगृहीता धर्मा एते ऽनास्रवधर्माः किं। प्रतिवचनं। तथा ॥

## (३) सर्वधर्माधिकारः

### क—स्रोतआपन्नपुद्गलः

स्रोतआपन्ननिष्पाद्यसर्वधर्माः। किमेतेषां धर्माणां स्रोतआपत्तिफलेन संग्रहः। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। स्रोतआपन्ननिष्पाद्यानां केषां चन धर्माणां न स्रोतआपत्तिफलेन संग्रहः। तद्यथा। स्रोतआपन्नप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृतधर्माणां, तत्साक्षात्कर्तव्यसर्वसंयोजनक्षयस्य, स्रोतआपन्नप्राप्यस्य अप्रतिसंख्यानिरोधस्य, सास्रवधर्माणां च ॥

कश्चन धर्मः स्रोतआपत्तिफलसंगृहीतो न स्रोतआपन्ननिष्पाद्यः। तद्यथा। स्रोतआपत्तिफलम् अलब्धं [ 942a ] विप्रणष्टं ॥

कश्चन धर्मः स्रोतआपन्ननिष्पाद्यः स्रोतआपत्तिफलसंगृहीतश्च। तद्यथा। स्रोतआपत्तिफलं लब्धम् अविप्रणष्टं ॥

कश्चन धर्मो न स्रोतआपन्ननिष्पाद्यो नापि स्रोतआपत्तिफलसंगृहीतः। तद्यथा। स्थापयित्वा पूर्वलक्षणं ॥

### ख—सकृदागामिपुद्गलः

सकृदागामिनिष्पाद्यसर्वधर्माः। किमेतेषां धर्माणां सकृदागामिफलेन संग्रहः। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। सकृदागामिनिष्पाद्यानां केषांचन धर्माणां न सकृदागामिफलेन संग्रहः। तद्यथा। सकृदागामिप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृतधर्माणां, तत्साक्षात्कर्तव्यसर्वसंयोजनक्षयस्य, सकृदागामिप्राप्यस्य अप्रतिसंख्यानिरोधस्य, सास्रवधर्माणां च ॥

कश्चन धर्मः सकृदागामिफलसंगृहीतो न सकृदागामिनिष्पाद्यः। तद्यथा। सकृदागामिफलम् अलब्धं विप्रणष्टं ॥

कश्चन धर्मः सकृदागामिनिष्पाद्यः सकृदागामिफलसंगृहीतश्च । तद्यथा । सकृदागामिफलं लब्धम् अविप्रणष्टं ॥

कश्चन धर्मो न सकृदागामिनिष्पाद्यो नापि सकृदागामिफलसंगृहीतः। तद्यथा। स्थापयित्वा पूर्वलक्षणं ॥

### ग—अनागामिपुद्गलः

अनागामिनिष्पाद्यसर्वधर्माः । किमेतेषां धर्माणाम् अनागामिफलेन संग्रहः । प्रतिवचनं । चतस्रः कोटयः कर्तव्याः । अनागामिनिष्पाद्यानां केषां चन धर्माणां न अनागामिफलेन संग्रहः । तद्यथा । अनागामिप्राप्याणां प्रणीतानाम् अनास्रवेन्द्रियादिसंस्कृतधर्माणां, तत्साक्षात्कर्तव्यस्य सर्वसंयोजनक्षयस्य, अनागामिप्राप्यस्य अप्रतिसंख्यानिरोधस्य, सास्रवधर्माणां च ॥

कश्चन धर्मो ऽनागामिफलसंगृहीतो न अनागामिनिष्पाद्यः । तद्यथा । अनागामिफलम् अलब्धं विप्रणष्टं ॥

कश्चन धर्मो ऽनागामिनिष्पाद्यो ऽनागामिफलसंगृहीतश्च । तद्यथा । अनागामिफलं लब्धम् अविप्रणष्टं ॥

कश्चन धर्मो न अनागामिनिष्पाद्यो नापि च अनागामिफलसंगृहीतः। तद्यथा। स्थापयित्वा पूर्वलक्षणं ॥

### घ—अर्हत्पुद्गलः

अर्हन्निष्पाद्यसर्वधर्माः। किमेतेषां धर्माणाम् अर्हत्फलेन संग्रहः। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। अर्हन्निष्पाद्यानां केषां चन धर्माणां न अर्हत्फलेन संग्रहः। तद्यथा। अर्हत्प्राप्यस्य अप्रतिसंख्यानिरोधस्य, सास्रवधर्माणां च ॥

कश्चन धर्मो अर्हत्फलसंगृहीतो न अर्हन्निष्पाद्यः। तद्यथा। अर्हत्फलम् अलब्धं विप्रणष्टं ॥

कश्चन धर्मो ऽर्हन्निष्पाद्यो न अर्हत्फलसंगृहीतो । तद्यथा । अर्हत्फलं लब्धम् अविप्रणष्टं ॥



कश्चन धर्मो न अर्हन्निष्पाद्यो नापि च अर्हत्फलसंगृहीतः। तद्यथा। स्थापयित्वा पूर्वलक्षणं ॥०॥ [ निष्पत्तित्रिकनिर्देशः परिनिष्ठितः ] ॥०॥

## ४. च्युतोपपादषडाकाराः

### (१) प्रथम आकारः
### स्वधातुच्युतोपपन्नस्य भवोपलंभानुपलंभौ

### क—कामधातुच्युतोपपन्नः

सर्वः कामधातुच्युतोपपन्नः, स सर्वः किमुपलभते कामभवं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। कश्चन कामधातुच्युतोपपन्नो नोपलभते कामभवं। तद्यथा। कामधातुमग्नोत्थितो रूपधात्वन्तराभवः ॥

कश्चन उपलभते कामभवं न कामधातुच्युतोपपन्नः। तद्यथा। रूपधातुमग्नोत्थितः कामधात्वन्तराभवः ॥

कश्चन कामधातुच्युतोपपन्नश्च उपलभते च कामभवं। तद्यथा। कामधातुमग्नोत्थितः कामधात्वन्तराभवः, उपपत्तिभवश्च ॥

कश्चन न च कामधातुच्युतोपपन्नो न च [942b] उपलभते कामभवं। तद्यथा। रूपधातुच्युतो रूपारूप्यधातूपपन्नः। आरूप्यधातुच्युतो रूपारूप्यधातूपपन्नः ॥

### ख—रूपधातुच्युतोपपन्नः

सर्वो रूपधातुच्युतोपपन्नः, स सर्वः किमुपलभते रूपभवं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। कश्चन रूपधातुच्युतोपपन्नो नोपलभते रूपभवं। तद्यथा। रूपधातुमग्नोत्थितः कामधात्वन्तराभवः ॥

कश्चन उपलभते रूपभवं न रूपधातुच्युतोपपन्नः। तद्यथा। कामधातुमग्नोत्थितो रूपधात्वन्तराभवः ॥

कश्चन रूपधातुच्युतोपपन्नश्च उपलभते च रूपभवं। तद्यथा। रूपधातुमग्नोत्थितो रूपधात्वन्तराभवः, उपपत्तिभवश्च ॥

कश्चन न च रूपधातुच्युतोपपन्नो न च उपलभते रूपभवं। तद्यथा। कामधातुच्युतः कामारूप्यधातूपपन्नः। आरूप्यधातुच्युतः कामारूप्यधातूपपन्नः॥

ग—आरूप्यधातुच्युतोपपन्नः

सर्व आरूप्यधातुच्युतोपपन्नः, स सर्वः किमुपलभते आरूप्यभवं। प्रतिवचनं। आरूप्यधातुच्युतोपपन्नः सर्वं उपलभते आरूप्यभवं॥

कश्चन उपलभते आरूप्यभवं, स न आरूप्यधातुच्युतः, प्रत्युत आरूप्यधातूपपन्नः। तद्यथा। कामरूपधातुच्युत आरूप्यधातूपपन्नः॥

घ—च्युतोपपन्नानां परिगणनं

कामधातुच्युतोपपन्नाः सर्वे कति। प्रतिवचनं। चत्वारः। तद्यथा। आर्यपृथग्जनौ कामरूपधातुकौ॥

रूपधातुच्युतोपपन्नाः सर्वे कति। प्रतिवचनं। त्रयः। तद्यथा। पृथग्जनः कामधातुकः। आर्यपृथग्जनौ रूपधातुकौ॥

आरूप्यधातुच्युतोपन्नाः सर्वे कति। प्रतिवचनं। द्वौ। आर्यपृथग्जनौ आरूप्यधातुकौ॥०॥

(२) द्वितीय आकारः

नस्वधातुच्युतोपपन्नस्य भवानुपलंभनानुपलंभौ

क—नकामधातुच्युतोपपन्नः

सर्वो नकामधातुच्युतोपपन्नः, स सर्वः किं नोपलभते कामभवं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। कश्चन नकामधातुच्युतोपपन्नो न नोपलभते कामभवं। तद्यथा। रूपधातुमग्नोत्थितः कामधात्वन्तराभवः॥

कश्चन नोपलभते कामभवं न नकामधातुच्युतोपपन्नः। तद्यथा। कामधातुमग्नोत्थितो रूपधात्वन्तराभवः॥



कश्चन नकामधातुच्युतोपपन्नश्च नोपलभते च कामभवं। तद्यथा। रूपधातुच्युतो रूपारूप्यधातूपपन्नः। आरूप्यधातूच्युतो रूपारूप्यधातूपपन्नः॥

कश्चन न च नकामधातुच्युतोपपन्नो न च नोपलभते कामभवं। तद्यथा। कामधातुमग्नोत्थितः कामधात्वन्तराभवः, उपपत्तिभवश्च॥

ख—नरूपधातुच्युतोपपन्नः

सर्वो नरूपधातुच्युतोपपन्नः, स सर्वः किं नोपलभते रूपभवं। प्रतिवचनं। चतस्रः कोटयः कर्तव्याः। कश्चन नरूपधातुच्युतोपपन्नो न नोपलभते रूपभवं। तद्यथा। कामधातुमग्नोत्थितो रूपधात्वन्तराभवः॥

कश्चन नोपलभते रूपभवं न नरूपधातुच्युतोपपन्नः। तद्यथा। रूपधातुमग्नोत्थितः कामधात्वन्तराभवः॥

कश्चन नरूपधातुच्युतोपपन्नश्च नोपलभते च रूपभवं। तद्यथा। कामधातुच्युतः कामारूप्यधातूपपन्नः। आरूप्यधातुच्युतः कामारूप्यधातूपपन्नः॥

कश्चन न च नरूपधातुच्युतोपपन्नो न च नोपलभते रूपभवं। तद्यथा। रूपधातुमग्नोत्थितो रूपधात्वन्तराभवः, उपपत्तिभवश्च॥

ग—नारूप्यधातुच्युतोपपन्नः

सर्वो नारूप्य[ 942c ]धातुच्युतोपपन्नः, स सर्वो नोपलभते किम् आरूप्यभवं। प्रतिवचनं। नारूप्यधातुच्युतोपपन्नः सर्वो नोपलभते आरूप्यभवं॥

कश्चन नोपलभते आरूप्यभवं, न नारूप्यधातुच्युतः, प्रत्युत नारूप्यधातूपपन्नः। तद्यथा। आरूप्यधातुच्युतः कामरूपधातूपपन्नः॥

घ—नच्युतोपपन्नानां परिगणनं

नकामधातुच्युतोपपन्नाः सर्वे कति। प्रतिवचनं। पंच। तद्यथा। पृथग्जनः कामधातुकः, आर्यपृथग्जनौ रूपारूप्यधातुकौ॥

नरूपधातुच्युतोपपन्नाः सर्वे कति । प्रतिवचनं । षट् । तद्यथा । आर्यपृथग्जनौ त्रैधातुकौ ॥

नारूप्यधातुच्युतोपपन्नाः सर्वे कति । प्रतिवचनं । चत्वारः । तद्यथा । आर्यपृथग्जनौ कामरूपधातुकौ ॥०॥

(३) तृतीय आकारः

स्वधातुच्युतस्य स्वपरधातौ नोपपत्तिः

क—कामधातुच्युतः

अस्ति कश्चन कामधातुच्युतो न कामधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुका ऽन्तराभव आरूप्यधातूपपन्नः, परिनिर्वाणो वा ॥

अस्ति कश्चन कामधातुच्युतो न रूपधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुको ऽन्तराभव आरूप्यधातूपपन्नः, परिनिर्वाणो वा ॥

अस्ति कश्चन कामधातुच्युतो नारूप्यधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुको ऽन्तराभवः, परिनिर्वाणो वा ॥

ख—रूपधातुच्युतः

अस्ति कश्चन रूपधातुच्युतो न रूपधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुको ऽन्तराभव आरूप्यधातूपपन्नः, परिनिर्वाणो वा ॥

अस्ति कश्चन रूपधातुच्युतो न कामधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुको ऽन्तराभव आरूप्यधातूपपन्नः परिनिर्वाणो वा ॥

अस्ति कश्चन रूपधातुच्युतो नारूप्यधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुको ऽन्तराभवः, परिनिर्वाणो वा ॥

ग—आरूप्यधातुच्युतः

अस्ति कश्चन आरूप्यधातुच्युतो नारूप्यधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुको ऽन्तराभवः, परिनिर्वाणो वा ॥



अस्ति कश्चन आरूप्यधातुच्युतो न कामधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुको ऽन्तराभव आरूप्यधातूपपन्नः, परिनिर्वाणो वा ॥

अस्ति कश्चन आरूप्यधातुच्युतो न रूपधातूपपन्नः । प्रतिवचनं । अस्ति । तद्यथा । उत्थितः कामरूपधातुको ऽन्तराभव आरूप्यधातूपपन्नः, परिनिर्वाणो वा ॥

घ—च्युतानां नोपपन्नानां परिगणनं

कामधातुच्युता न कामधातूपपन्नाः सर्वे कति । प्रतिवचनं । षट् । तद्यथा । आर्यपृथग्जनौ त्रैधातुकौ ॥

कामधातुच्युता न रूपधातूपपन्नाः सर्वे कति । प्रतिवचनं । षट् । तद्यथा । आर्यपृथग्जनौ त्रैधातुकौ ॥

कामधातुच्युता नारूप्यधातूपपन्नाः सर्वे कति । प्रतिवचनं । चत्वारः । तद्यथा । आर्यपृथग्जनौ कामरूपधातुकौ ॥

रूपधातुच्युता न रूपधातूपपन्नाः सर्वे कति । प्रतिवचनं । पंच । तद्यथा । पृथग्जनः कामधातुकः, आर्यपृथग्जनौ रूपारूप्यधातुकौ ॥

रूपधातच्युता न कामधातूपपन्नाः सर्वे कति । प्रतिवचनं । पंच । तद्यथा । पृथग्जनः कामधातुकः, आर्यपृथग्जनौ रूपारूप्यधातुकौ ॥ [ 943a ]

रूपधातुच्युता नारूप्यधातूपपन्नाः सर्वे कति । प्रतिवचनं । त्रयः । तद्यथा । पृथग्जनः कामधातुकः, आर्यपृथग्जनौ रूपधातकौ ॥

आरूप्यधातुच्युता नारूप्यधातूपपन्नाः सर्वे कति । प्रतिवचनं । द्वौ । तद्यथा । पृथग्जनः कामरूपधातुकः ॥

आरूप्यधातुच्युता न कामधातूपपन्नाः सव कति । प्रतिवचनं । चत्वारः । तद्यथा । आर्यपृथग्जनौ आरूप्यधातुकौ, पृथग्जनः कामरूपधातुकः ॥

आरूप्यधातुच्युता न रूपधातूपपन्नाः सर्वे कति । प्रतिवचनं । चत्वारः । तद्यथा । आर्यपृथग्जनौ आरूप्यधातुकौ, पृथग्जनः कामरूपधातुकः ॥

(४) चतुर्थ आकारः

स्वधातुच्युतस्य त्रिधातौ नोपपत्तिः

क—च्युतत्रिधात्वनुपपन्ननिर्देशः

अस्ति कश्चन कामधातुच्युतो न त्रिधातूपपन्नः। प्रतिवचनं। अस्ति। तद्यथा। उत्थितः कामरूपधातुको ऽन्तराभवः, परिनिर्वाणो वा ॥

अस्ति कश्चन रूपधातुच्युतो न त्रिधातूपपन्नः। प्रतिवचनं। अस्ति। तद्यथा। उत्थितः कामरूपधातुको ऽन्तराभवः, परिनिर्वाणो वा ॥

अस्ति कश्चन आरूप्यधातुच्युतो न त्रिधातूपपन्नः। प्रतिवचनं। अस्ति। तद्यथा। उत्थितः कामरूपधातुको ऽन्तराभवः, परिनिर्वाणो वा ॥

ख—च्युतत्रिधात्वनुपपन्नपरिगणनं

कामधातच्युता न त्रिधातूपपन्नाः सर्वे कति। प्रतिवचनं। चत्वारः। तद्यथा। आर्यपृथग्जनौ कामरूपधातुकौ ॥

रूपधातुच्युता न त्रिधातूपपन्नाः सर्वे कति। प्रतिवचनं। त्रयः। तद्यथा। पृथग्जनः कामधातुकः, आर्यपृथग्जनौ रूपधातुकौ ॥

आरूप्यधातुच्युता न त्रिधातूपपन्नाः सर्वे कति। प्रतिवचनं। द्वौ। तद्यथा। पृथग्जनः कामरूपधातकः ॥

(५) पंचम आकारः

अप्रहीणरागस्यापि नोपपत्तिः

क—अप्रहीणरागानुपपन्ननिर्देशः

अस्ति कश्चन अप्रहीणकामरागः क्षीणायुर् न कामधातूपपन्नः। प्रतिवचनं। अस्ति। उत्थितः कामधातुको ऽन्तराभवः ॥

अस्ति कश्चन अप्रहीणरूपरागः क्षीणायुर् न कामरूपधातूपपन्नः। प्रतिवचनं। अस्ति। तद्यथा। उत्थितः कामरूप[धातुको] ऽन्तराभवः ॥

अस्ति कश्चन अप्रहीणारूप्यरागः क्षीणायुर् न त्रिधातूपपन्नः। अस्ति। तद्यथा। उत्थितः कामरूपधातको ऽन्तराभवः ॥



ख—अप्रहीणरागानुपपन्नपरिगणनं

अप्रहीणकामरागाः क्षीणायुषो न कामधातूपपन्नाः सर्वे कति। प्रतिवचनं। द्वौ। तद्यथा। आर्यपृथग्जनौ कामधातुकौ ॥

अप्रहीणरूपरागाः क्षीणायुषो न कामरूपधातूपपन्नाः सर्वे कति। प्रतिवचनं। चत्वारः। तद्यथा। आर्यपृथग्जनौ कामरूपधातुकौ ॥

अप्रहीणारूप्यरागाः क्षीणायुषो न त्रिधातूपपन्नाः सर्वे कति। प्रतिवचनं। चत्वारः। तद्यथा। आर्यपृथग्जनौ कामरूपधातुकौ ॥

(६) षष्ठ आकारः

आर्यपृथग्जनानाम् अनुशयसंयोजनसंबन्धः

इह आर्यपृथग्जनौ कामधातुकौ कत्यनुशयानुशयितौ कतिसंयोजनप्रतिसंयुक्तौ। प्रतिवचनं। पृथग्जनो ऽष्टानवत्यनुशयानुशायितः, नवसंयोजनप्रतिसंयुक्तः। आर्यो दशानुशयानुशायितः, षट्संयोजनप्रतिसंयुक्तः ॥

आर्यपृथग्जनौ रूपधातुकौ कत्यनुशयानुशायितौ कतिसंयोजनप्रतिसंयुक्तौ। प्रतिवचनं। पृथग्जनो द्वाषष्ट्यनुशयानुशायितः, षट्संयोजनप्रतिसंयुक्तः। आर्यः षडानुशयानुशयितः, त्रिसंयोजनप्रतिसंयुक्तः ॥ [943b]

आर्यपृथग्जनौ आरूप्यधातुकौ कत्यनुशयानुशयितौ कतिसंयोजनप्रतिसंयुक्तौ। प्रतिवचनं। पृथग्जन एकत्रिंशदनुशयानुशायितः, षट्संयोजनप्रतिसंयुक्तः। आर्यस् त्र्यनुशयानुशायितः, त्रिसंयोजनप्रतिसंयुक्तः ॥०॥ [च्युतोपपादषडाकारनिर्देशः परिनिष्ठितः] ॥०॥

इति ज्ञानप्रस्थानस्य द्वितीये संयोजनस्कंधे सत्वा नाम तृतीयो निःश्वासः ॥

द्वितीये संयोजनस्कन्धे

# चतुर्थो निःश्वासः

दश द्वाराणि

उद्देशः

१द्वाचत्वारिंशदनुशयितं २-३द्वे आलंबने ४समनन्तरं ५स[वितर्कादि]।
६इन्द्रिय[संप्रयोगः] ७-८भवत्यभवती[1] ९परिज्ञा १०साक्षात्कारः—
इति वर्गाविवक्षितं ॥

## १. द्वाचत्वारिंशदनुशयितं

### (१) द्वाचत्वारिंशन्मातृकोद्देशः

[१] द्वाविंशतिरिन्द्रियाणि ।
[२] अष्टादशधातवः ।
[३] द्वादश आयतनानि ।
[४] पंच स्कंधाः ।
[५] पंच उपादानस्कंधाः ।
[६] षड् धातवः ।
[७] रूपिणो ऽरूपिणो धर्माः।
[८] सनिदर्शना अनिदर्शना धर्माः ।
[९] सप्रतिघा अप्रतिघा धर्माः ।
[१०] सास्रवा अनास्रवा धर्माः ।
[११] संस्कृता असंस्कृता धर्माः ।
[१२] अतीता अनागताः प्रत्युत्पन्ना धर्माः ।

1. निष्पद्यत्यनिष्पद्यती इति यथारुतं। भवत्यभवती अपि तदर्थबोधनक्षमे इति तात्पर्यार्थप्रवणस्य व्यंजनोपेक्षा ।



[१३] कुशला अकुशला अव्याकृता धर्माः ।
[१४] कामधातु० रूपधातु० आरूप्यधातुप्रतिसंयुक्ता धर्माः ।
[१५] शैक्षा अशैक्षा नशैक्षनाशैक्षा धर्माः ।
[१६] दर्शनहेया भावनाहेया अहेया धर्माः ।
[१७] चत्वारि सत्यानि ।
[१८] चत्वारि ध्यानानि ।
[१९] चत्वारि अप्रमाणानि ।
[२०] चत्वार आरूप्याः ।
[२१] अष्टौ विमोक्षाः ।
[२२] अष्टौ अभिभ्वायतनानि ।
[२३] दशकृत्स्नायतनानि ।
[२४] अष्टौ ज्ञानानि ।
[२५] त्रयः समाधयः ।
[२६] त्रिविधाः समाधयः ।
[२७] त्रीणि संयोजनानि ।
[२८] त्रीणि अकुशलमूलानि ।
[२९] त्रय आस्रवाः ।
[३०] चत्वार ओघाः ।
[३१] चत्वारो योगाः ।
[३२] चत्वारि उपादानानि ।
[३३] चत्वारः कायग्रन्थाः ।
[३४] पंच नीवरणानि ।
[३५] पंच संयोजनानि ।
[३६] पंच अवरभागीयसंयोजनानि ।
[३७] पंच ऊर्ध्वभागीयसंयोजनानि ।
[३८] पंच दृष्टयः ।
[३९] षट् तृष्णाकायाः ।
[४०] सप्त अनुशयाः ।

[४१] नव संयोजनानि ।

[४२] अष्टानवतिरनुशयाः ॥

(२) अनुशयसंबन्धेन निर्देशः

चक्षुरिन्द्रियं यावद् आरूप्यधातुकभावनाहेयो ऽविद्यनुशयः । एकैकम् अष्टानवत्यनुशयेषु कतिभिरनुशैरनुशयितं । प्रतिवचनं । चक्षुरिन्द्रियं कामधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितं । श्रोत्रघ्राणजिह्वाकायेन्द्रियाण्यपि तथा ॥

स्त्रीन्द्रियं कामधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितं । पुरुषदुःखेन्द्रिये अपि तथा ॥

जीवितेन्द्रियं त्रैधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितं । श्रद्धादीनि पंच इन्द्रियाण्यपि तथा ॥

मन इन्द्रियं सर्वैर् अनुशयैरनुशयितं । उपेक्षेन्द्रियमपि तथा ॥

सुखेन्द्रियं रूपधातुकैः सर्वैः, कामधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितं ॥

सौमनस्येन्द्रियं रूपधातुकैः सर्वैः, अनास्रवालंबनां विचिकित्सां तत्संप्रयुक्तामविद्यां च वर्जयित्वा, सर्वैरन्यैः कामधातुकैः अनुशयैरनुशयितं ॥

दौर्मनस्येन्द्रियं कामधातुकैः सर्वैर् अनुशयैरनुशयितं ॥

त्रीणि अनास्रवेन्द्रियाणि न अनुशयैरनुशयितानि ॥

चक्षुः श्रोत्रघ्राणजिह्वाकाय— रूपशब्दस्पर्श— चक्षुःश्रोत्रकायविज्ञान-धातवः कामरूपधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयिताः । चक्षुःश्रोत्रघ्राण-जिह्वाकायरूपशब्दस्पर्शायतनानि, रूपस्कन्धः, रूपोपादानस्कन्धः, पौर्विकाः पंच धातवः, रूपिणः सनिदर्शनाः सप्रतिघा धर्मा अपि तथा ॥

गन्ध [ 943c ] रसजिह्वाघ्राणविज्ञानधातवः कामधातुकैः सर्वत्रगैः, भावना-हेयैश्च, अनुशयैरनुशयिताः । गन्धरसायतने अपि तथा ॥

मनोधर्ममनोविज्ञानधातवः सर्वैर् अनुशयैरनुशयिताः । मनोधर्मायतने, पश्चिमाश् चत्वारः स्कन्धाः, पश्चिमाश् चत्वार उपादानस्कन्धाः, विज्ञानधातुः, अरूपिणो ऽनिदर्शना अप्रतिघाः सास्रव-संस्कृत-धर्माः, अतीता अनागताः प्रत्युत्पन्ना नशैक्षनाशैक्षधर्मा अपि तथा ॥



अनास्रवा असंस्कृता धर्मा नानुशयैरनुशयिताः । शैक्षाः, अशैक्षाः, अहेयाश्च धर्मा अपि तथा ॥

कुशलाः, भावनाहेयाश्च धर्मास् त्रैधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयिताः ॥

अकुशलाः, कामधातुप्रतिसंयुक्ताश्च धर्माः कामधातुकैः सर्वैर् अनुशयैरनुशयिताः ॥

अव्याकृता धर्मा रूपारूप्यधातुकैः सर्वैः, कामधातुकैर् द्विवर्गीयैः, समुदय-दर्शनहेयैश्च सर्वत्रगैः, अनुशयैरनुशयिताः ॥

रूपधातुप्रतिसंयुक्ता धर्मा रूपधातुकैः सर्वैर् अनुशयैरनुशयिताः ॥

आरूप्यधातुप्रतिसंयुक्ता धर्मा आरूप्यधातुकैः सर्वैर् अनुशयैरनुशयिताः ॥

दर्शनहेया धर्माः सर्वैर् दर्शनहेयैर् अनुशयैरनुशयिताः ॥

दुःखसमुदयसत्ये सर्वैर् अनुशयैरनुशयिते ॥

निरोधमार्गसत्ये नानुशयैरनुशयिते । धर्मान्वयदुःखसमुदयनिरोधमार्गज्ञानानि त्रयः समाधयश्चापि तथा ॥

चत्वारि ध्यानानि रूपधातकैः सर्वैर् अनुशयैरनुशयितानि ॥

चत्वारि अप्रमाणानि रूपधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितानि । पौर्विकास्त्रयो विमोक्षाः, अष्टौ अभिभ्वायतनानि, पौर्विकाणि अष्टौ कृत्स्नायतनानि, परचित्तज्ञानं चापि तथा ॥

चत्वार आरूप्या आरूप्यधातुकैः सर्वैर् अनुशयैरनुशयिताः ॥

पश्चिमाः पंच विमोक्षाः, पश्चिमे द्वे कृत्स्नायतने च आरूप्यधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितानि ॥

संवृतिज्ञानं, वर्जयित्वा अनास्रवलंबनां दृष्टिं, सर्वैरन्यैरनुशयैरनुशयितं ॥

त्रिविधसमाधयस् त्रैधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयिताः ॥

सत्कायदृष्टिसंयोजनं दुःखदर्शनहेयैः सर्वैः, समुदयदर्शनहेयैश्च सर्वत्रगैः, अनुशयैरनुशयितं । सत्कायदृष्ट्यवरभागीयसंयोजनं सत्कायदृष्ट्यन्तग्राहदृष्टी चापि तथा ॥

शीलव्रतपरामर्शसंयोजनं दुःखदर्शनहेयैः सर्वैः, समुदयदर्शनहेयैश्च सर्वत्रगः, मार्गदर्शनहेयैः सास्रवालंबनैः, अनुशयैरनुशयितं । शीलव्रतोपादानं, शीलव्रतपरामर्शकायग्रन्थः, शीलव्रतपरामर्शावरभागीयसंयोजनं चापि तथा ॥

विचिकित्सासंयोजनं दर्शनहेयैः सास्रवालंबनैः, विचिकित्सासंप्रयुक्तया अनास्रवालंबनया अविद्यया च, अनुशयैरनुशयितं । विचिकित्सावरभागीयसंयोजनं, विचिकित्सानुशयः, विचिकित्सासंयोजनं चापि तथा ॥

लोभद्वेषाकुशलमूले कामधातुकैः सास्रवालंबनैर् अनुशयैरनुशयिते । पौर्विकौ द्वौ कायग्रन्थौ, पौर्विके द्वे नीवरणे, प्रतिघसंयोजनं, पौर्विके द्वे अवरभागीयसंयोजने, पौर्विकौ द्वावनुशयौ, [ नवसंयोजनेषु ] प्रतिघसंयोजनं चापि तथा ॥

मोहाकुशलमूलं कामधातुकैः, वर्जयित्वा अनास्रवालंबनामविद्याम्, सर्वैर् अन्यैर् अनुशयैरनुशयितं ॥

कामास्रवः [ 944a ] कामधातुकैः सर्वैर् अनुशयैरनुशयितः । ओघयोगोपादानानां कामः, स्त्यानमिद्धौद्धत्यनीवरणे चापि तथा ॥

भवास्रवो रूपारूप्यधातुकैः सर्वैर् अनुशयैरनुशयितः । ओघयोगयोर् भवः, आत्मवादोपादानं चापि तथा ॥

अविद्यास्रवो वर्जयित्वा अनास्रवलंबनाम् अविद्यां सर्वैर् अन्यैर् अनुशयैरनुशयितः । ओघयोगयोर् अविद्या, अविद्यानुशयः, अविद्यासंयोजनं चापि तथा ॥

ओघयोगयोर् दृष्टिर् दर्शनहेयैः सास्रवालंबनैः, दृष्टिसंप्रयुक्तया अनास्रवालंबनया अविद्यया च, अनुशयैरनुशयिता । दृष्टिपरामर्शः, मिथ्यादृष्टिः, दृष्ट्यनुशयः, दृष्टिसंयोजनं चापि तथा ॥

इदंसत्याभिनिवेशकायग्रन्थो दर्शनहेयैः सास्रवालंबनैर् अनुशयैरनुशयितः । दृष्टिपरामर्शः, परामर्शसंयोजनं चापि तथा ॥

कौकृत्यनीवरणं कामधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितं । [ पंचसंयोजनेषु ] ईर्ष्यामात्सर्यसंयोजने, घ्राणजिह्वासंस्पर्शजतृष्णाकायौ, [ नवसंयोजनेषु ] ईर्ष्यामात्सर्यसंयोजने चापि तथा ॥

विचिकित्सानीवरणं कामधातुकैर् दर्शनहेयैः सास्रवालंबनैः, विचिकित्सासंप्रयुक्तया च अनास्रवालंबनया अविद्यया, अनुशयैरनुशयितं ॥

रागमानसंयोजने त्रैधातुकैः सास्रवालंबनैर् अनुशयैरनुशयिते । मनःसंस्पर्शजतृष्णाकायः, मानानुशयः, तृष्णामानसंयोजने चापि तथा ॥



रूपरागो रूपधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितः ॥

आरूप्यराग आरूप्यधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितः ॥

पश्चिमानि त्रीणि ऊर्ध्वभागीयसंयोजनानि रूपारूप्यधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयितानि ॥

चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकायाः कामरूपधातुकैः सर्वत्रगैः, भावनाहेयैश्च, अनुशयैरनुशयिताः ॥

भवरागानुशयो रूपारूप्यधातुकैः सास्रवालंबनैर् अनुशयैरनुशयितः ॥

कामधातुकदुःखदर्शनहेयानुशयाः कामधातुकैर् दुःखदर्शनहेयैः सर्वैः, समुदयदर्शनहेयैश्च सर्वत्रगैः, अनुशयैरनुशयिताः ॥

कामधातुकसमुदयदर्शनहेयानुशयाः कामधातुकैः समुदयदर्शनहेयैः सर्वैः, दुःखदर्शनहेयैश्च सर्वत्रगैः, अनुशयैरनुशयिताः ॥

कामधातुकनिरोधदर्शनहेयानुशयाः कामधातुकैर् निरोधदर्शनहेयैर् वर्जयित्वा अनास्रवालंबनाम् आवेणिकीम् अविद्यां सर्वैरन्यैः, सर्वत्रगैश्च, अनुशयैरनुशयिताः ॥

कामधातुकमार्गदर्शनहेयानुशयाः कामधातुकैर् मार्गदर्शनहेयैर् वर्जयित्वा अनास्रवालंबनाम् आवेणिकीम् अविद्यां सर्वैरन्यैः, सर्वत्रगैश्च, अनुशयैरनुशयिताः ॥

कामधातुकभावनाहेयानुशयाः कामधातुकैर् भावनाहेयैः सर्वैः, सर्वत्रगैश्च, अनुशयैरनुशयिताः ॥

रूपारूप्यधातुकानां पंचवर्गीयानुशयानां विस्तरनिर्देशो ऽपि तथा । विशेषः स्वधातुनिर्देश्यः ॥०॥ [ द्वाचत्वारिंशदनुशयितनिर्देशः परिनिष्ठितः ] ॥०॥

## २-३ द्वे आलंबने
## तत्तदालंबन-तत्तदालंबनालंबनविज्ञानयोरनुशयानुशयितत्वं

चक्षुरिन्द्रिय —यावद्— आरूप्यधातुकाविद्यानुशयालंबनविज्ञानं, [944b] आलंबनालंबनविज्ञानं[1] च । एकैकमष्टानवत्यनुशयेषु कतिभिरनुशयैरनुशयितं । प्रतिवचनं । चक्षुरिन्द्रियालंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः । आरूप्यधातुकैः सर्वत्रगैः । भावनाहेयैश्च । आलंबनालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः । श्रोत्रघ्राणजिह्वाकायेन्द्रियाण्यपि तथा ॥

स्त्रीन्द्रियालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः । रूपधातुकैः सर्वत्रगैः । भावनाहेयैश्च । आलंबनालंबनविज्ञानं कामधातकैश् चतुर्वर्गीयैः । रूपधातुकैस् त्रिवर्गीयैः । आरूप्यधातुकैः सर्वत्रगैः । भावनाहेयैश्च । पुरुषदुःखेन्द्रिये अपि तथा ॥

जीवितेन्द्रियालंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः । आलंबनालंबनविज्ञानं त्रैधातकैश् चतुर्वर्गीयैः ॥

मन इन्द्रियालंबनविज्ञानम्, आलंबनालंबनविज्ञानं [च], संस्कृतालंबनैः । उपेक्षेन्द्रियमपि तथा ॥

सुखेन्द्रियालंबनविज्ञानं कामधातुकैश् चतुर्वर्गीयैः । रूपधातुकैः संस्कृतालंबनैः । आरूपधातुकैर् द्विवर्गीयैः । सर्वत्रगैश्च । आलंबनालंबनविज्ञानं कामारूप्यधातुकैश् चतुर्वर्गीयैः । रूपधातुकैः संस्कृतालंबनैः ॥

सौमनस्येन्द्रियालंबनविज्ञानं कामरूपधातुकैः संस्कृतालंबनैः । आरूप्यधातुकैर् द्विवर्गीयैः । सर्वत्रगैश्च । आलंबनालंबनविज्ञानं कामरूपधातुकैः संस्कृतालंबनैः । आरूप्यधातुकैश् चतुर्वर्गीयैः ॥

दौर्मनस्येन्द्रियालंबनविज्ञानं कामधातुकैः सास्रवालंबनैः । रूपधातुकैः सर्वत्रगैः । भावनाहेयैश्च । आलंबनालंबनविज्ञानं कामधातुकैः संस्कृतालंबनैः । रूपधातुकैस् त्रिवर्गीयैः । आरूप्यधातुकैः सर्वत्रगैः । भावनाहेयैश्च ॥

श्रद्धादिपंचेन्द्रियालंबनविज्ञानम्, आलंबनालंबनविज्ञानं [च] त्रैधातुकैश् चतुवर्गीयैः ॥

1. विज्ञानमालंब्य प्रवर्तमानं विज्ञानमिति यावत्।



त्र्यनास्रवेन्द्रियालंबनविज्ञानं त्रैधातुकैर् द्विवर्गीयैः । सर्वत्रगैश्च । आलंबनालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः ॥

चक्षुःश्रोत्रघ्राणजिह्वाकायरूपशब्दस्पर्शधात्वालंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः । आरूप्यधातुकैः सर्वत्रगैः । भावनाहेयैश्च । आलंबनालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः । चक्षुश्रोत्रघ्राणजिह्वाकायरूपशब्दस्पर्शायतनानि, रूपोपादानस्कन्धः, पौर्विकाः पंच धातवः, सनिदर्शनाः सप्रतिघा धर्मा अपि तथा ॥

गन्धरसघ्राणजिह्वाविज्ञानधात्वालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः । रूपधातुकैः सर्वत्रगैः । भावनाहेयैश्च । आलंबनालंबनविज्ञानं कामधातुकैश् चतुर्वर्गीयैः । रूपधातुकैस् त्रिवर्गीयैः । आरूप्यधातुकैः सर्वत्रगैः । भावनाहेयैश्च । गन्धरसायतने अपि तथा ॥

चक्षुःश्रोत्रकायविज्ञानधात्वालंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः । आलंबनालंबनविज्ञानं कामरूपधातुकैश् चतुर्वर्गीयैः । आरूप्यधातुकैर् द्विवर्गीयैः । सर्वत्रगैश्च ॥

मनोधातुमनोविज्ञानधात्वालंबनविज्ञानम्, आलंबनालंबनविज्ञानं [च] संस्कृतालंबनैः । मन आयतनं, पश्चिमाश् चत्वारः स्कन्धाः, संस्कृतधर्माः, अतीतानागतप्रत्युत्पन्न धर्मा अपि तथा ॥

धर्मधात्वालंबनविज्ञानं त्रैधातुकैः सर्वैः । आलंबनालंबनविज्ञानं संस्कृतालंबनैः । धर्मायतनम् अरूपिणो ऽनिदर्शना अप्रतिघाः कुशला धर्मा अपि तथा ॥

रूपस्कंधालंबनविज्ञानं कामरूपधातुकैश् चतुर्वर्गीयैः । आरूप्यधातुकैर् द्विवर्गीयैः । सर्वत्रगैश्च । आलंबनालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः । रूपिणो धर्मा अपि तथा ॥

पश्चिमचतुरुपादानस्कंधालंबनविज्ञानं सास्रवालंबनैः । आलंबनालंबनविज्ञानं संस्कृतालंबनैः । विज्ञानधातुः [944c] सास्रवधर्मा दर्शनहेयधर्मा अपि तथा ॥

अनास्रवधर्मालंबनविज्ञानं त्रैधातुकैस्त्रिवर्गीयैः । सर्वत्रगैश्च । आलंबनालंबनविज्ञानं संस्कृतालंबनैः । अहेयधर्मा अपि तथा ॥

असंस्कृतधर्मालंबनविज्ञानं त्रैधातुकैर् द्विवर्गीयैः । सर्वत्रगैश्च । आलंबनालंबनविज्ञानं संस्कृतालंबनैः ॥

अकुशलधर्मालंबनविज्ञानं कामधातुकैः सास्रवालंबनैः । रूपधातुकैः

सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैः संस्कृतालंबनैः। रूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। कामधातुप्रतिसंयुक्तधर्मा अपि तथा ॥

अव्याकृतधर्मालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैः संस्कृतालंबनैः। आलंबनालंबनविज्ञानं कामधातुकैश चतुर्वर्गीयैः। रूपारूप्यधातुकैः संस्कृतालंबनैः ॥

रूपधातुप्रतिसंयुक्तधर्मालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैः सास्रवालंबनैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैः संस्कृतालंबनैः। आरूप्यधातुकैश चतुर्वर्गीयैः ॥

आरूप्यधातुप्रतिसंयुक्तधर्मालंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सास्रवालंबनैः। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैश् चतुर्वर्गीयैः। आरूप्यधातुकैः संस्कृतालंबनैः ॥

शैक्षाशैक्षधर्मालंबनविज्ञानं त्रैधातुकैर् द्विवर्गीयैः। सर्वत्रगैश्च। आलंबनालंबनविज्ञानं त्रैधातकैश् चतुर्वर्गीयैः ॥

नशैक्षनाशैक्षधर्मालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः। मार्गदर्शनहेयैः सास्रवालंबनैश्च। आलंबनालंबनविज्ञानं संस्कृतालंबनैः ॥

भावनाहेयधर्मालंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। आलंबनालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः ॥

दुःखसमुदयसत्यालंबनविज्ञानं सास्रवालंबनैः। आलंबनालंबनविज्ञानं संस्कृतालंबनैः। संवृतिज्ञानमपि तथा ॥

निरोधसत्यालंबनविज्ञानं त्रैधातुकैर् द्विवर्गीयैः। सर्वत्रगैश्च। आलंबनालंबनविज्ञानं संस्कृतालंबनैः ॥

मार्गसत्यालंबनविज्ञानं त्रैधातुकैर् द्विवर्गीयैः। सर्वत्रगैश्च। आलंबनालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः। दुःखसमुदयनिरोधमार्गज्ञानानि त्रयः समाधयश्चापि तथा ॥

चतुर्ध्यानालंबनविज्ञानं कामधातुकैश् चतुर्वर्गीयैः। रूपधातुकैः संस्कृतालंबनैः। आरूप्यधातुकैर् द्विवर्गीयैः। सर्वत्रगैश्च। आलंबनालंबनविज्ञानं कामारूप्यधातुकैश् चतुर्वर्गीयैः। रूपधातुकैः संस्कृतालंबनैः ॥



मैत्रीकरुणोपेक्षाऽप्रमाणालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः। शुभविमोक्षः, पश्चिमानि चत्वारि अभिभ्वायतनानि, अष्टौ पौर्विकाणि कृत्स्नायतनानि चापि तथा ॥

मुदिताऽप्रमाणालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैश् चतुर्वर्गीयैः। आरूप्यधातुकैर् द्विवर्गीयैः। सर्वत्रगैश्च। आद्यौ द्वौ विमोक्षौ, पौर्विकाणि चत्वारि अभिभ्वायतनानि चापि तथा ॥

पौर्विकत्र्यारूप्यालंबनविज्ञानम् आलंबनालंबनविज्ञानं [च] कामधातकैस् त्रिवर्गीयैः। रूपधातुकैश् चतुर्वर्गीयैः। आरूप्यधातुकैः संस्कृतालंबनैः ॥

नैवसंज्ञानासंज्ञायतनालंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सास्रवालंबनैः। आलंबन[ 945a ]लंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैश् चतुर्वर्गीयैः। आरूप्यधातुकैः संस्कृतालंबनैः ॥

आकाशविज्ञानानन्त्यायतनाकिंचन्यायतनविमोक्षालंबनविज्ञानम् आलंबनालंबनविज्ञानं [च] कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः ॥

पश्चिमयोर् द्वयोर् विमोक्षयोः पश्चिमयोर् द्वयोः कृत्स्नायतनयोश्च, आलंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः ॥

धर्मज्ञानालंबनविज्ञानं कामधातुकैर् द्विवर्गीयैः। सर्वत्रगैश्च। रूपधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैश् चतुर्वर्गीयैः। रूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च ॥

अन्वयज्ञानालंबनविज्ञानं रूपारूप्यधातुकैर् द्विवर्गीयैः। सर्वत्रगैश्च। कामधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः ॥

परचित्तज्ञानालंबनविज्ञानं कामरूपधातुकैश् चतुर्वर्गीयैः। आरूप्यधातुकैर् द्विवर्गीयैः। सर्वत्रगैश्च। आलंबनालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः ॥

त्रिविधसमाध्यालंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। आलंबनालंबनविज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः ॥

सत्कायदृष्टिसंयोजनालंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। आलंबनालंबन-

विज्ञानं त्रैधातुकैश् चतुर्वर्गीयैः। सत्कायदृष्ट्यवरभागीयसंयोजनं, सत्कायदृष्ट्यन्तग्राहदृष्टी अपि तथा ॥

शीलव्रतपरामर्शसंयोजनालंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। मार्गदर्शनहेयैश्च सास्रवालंबनैः। आलंबनालंबनविज्ञानं त्रैधातुकैश्चतुर्वर्गीयैः। शीलव्रतपरामर्शः, शीलव्रतपरामर्शकायग्रन्थः, शीलव्रतपरामर्शावरभागीयसंयोजनं, शीलव्रतोपादानं चापि तथा ॥

विचिकित्सासंयोजनालंबनविज्ञानं सास्रवालंबनैः। आलंबनालंबनविज्ञानं संस्कृतालंबनैः। आस्रवौघयोगानाम् अविद्या, दृष्ट्युपादानं, इदंसत्याभिनिवेशकायग्रन्थः रागमानसंयोजने, विचिकित्सावरभागीयसंयोजनं, मिथ्यादृष्टिः, दृष्टिपरामर्शः, मनःसंस्पर्शजतृष्णाकायः, मानाविद्यादृष्टिविचिकित्सानुशयाः, तृष्णामानाविद्यादृष्टिपरामर्शविचिकित्सासंयोजनानि चापि तथा ॥

त्रयाणाम् अकुशलेन्द्रियाणां, कामास्रवस्य च, आलंबनविज्ञानं कामधातुकैः सास्रवालंबनैः। रूपधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैः संस्कृतालंबनैः। रूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। ओघयोगोपादानानां कामः, पौर्विकौ द्वौ कायग्रन्थौ, कौकृत्यं वर्जयित्वा अन्यानि नीवरणानि, प्रतिघसंयोजनं, पौर्विके द्वे अवरभागीयसंयोजने, कामरागप्रतिघानुशयौ, प्रतिघसंयोजनं चापि तथा ॥

भवास्रवालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैः सास्रवालंबनैः। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैः संस्कृतालंबनैः। आस्रवौघयोगानां भवः, आत्मवादोपादानं, भवरागानुशयश् चापि तथा ॥

कौकृत्यनीवरणालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैश् चतुर्वर्गीयैः। रूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। [पंचसंयोजनानाम्] ईर्ष्यामात्सर्यसंयोजने, घ्राणजिह्वासंस्पर्शजतृष्णाकायौ, [नवसंयोजनानाम्] ईर्ष्यामात्सर्यसंयोजने [945b] चापि तथा ॥

रूपरागोर्ध्वभागीयसंयोजनालंबनविज्ञानं कामधातकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः ॥



पश्चिमचतुरूर्ध्वभागीयसंयोजनालंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः ॥

चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकायालंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः। आलंबनालंबनविज्ञानं कामरूपधातुकैश् चतुर्वर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च ॥

कामधातुकानां दुःखसमुदयदर्शनेन भावनया च हेयानामनुशयानाम् आलंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैश् चतुर्वर्गीयैः। रूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च ॥

कामधातुकनिरोधदर्शनहेयानुशयालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। निरोधदर्शनहेयैश्च सास्रवालंबनैः। रूपधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैः संस्कृतालंबनैः। रूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च ॥

कामधातुकमार्गदर्शनहेयानुशयालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। मार्गदर्शनहेयैश्च सास्रवालंबनैः। रूपधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैश चतुर्वर्गीयैः। रूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च ॥

रूपधातुकानां दुःखसमुदयदर्शनेन भावनया च हेयानाम् अनुशयानाम् आलंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः ॥

रूपधातुकनिरोधदर्शनहेयानुशयालंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः। रूपधातुकैश्च निरोधदर्शनहेयैः सास्रवालंबनैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैः संस्कृतालंबनैः। आरूप्यधातुकैश् चतुर्वर्गीयैः ॥

रूपधातुकमार्गदर्शनहेयानुशयालंबनविज्ञानं कामरूपधातुकैस् त्रिवर्गीयैः। रूपधातुकैश्च मार्गदर्शनहेयैः सास्रवालंबनैः। आरूप्यधातुकैः सर्वत्रगैः। भावनाहेयैश्च। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः ॥

आरूप्यधातुकानां दुःखसमुदयदर्शनेन भावनया च हेयानाम् अनुशयानाम् अलंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश् चतुर्वर्गीयैः॥

आरूप्यधातुकनिरोधदर्शनहेयानुशयालंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैश्च निरोधदर्शनहेयैः सास्रवालंबनैः। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपधातुकैश् चतुर्वर्गीयैः। आरूप्यधातुकैः संस्कृतालंबनैः।

आरूप्यधातुकमार्गदर्शनहेयानुशयालंबनविज्ञानं त्रैधातुकैस् त्रिवर्गीयैः। आरूप्यधातुकैश्च मार्गदर्शनहेयैः सास्रवालंबनैः। आलंबनालंबनविज्ञानं कामधातुकैस् त्रिवर्गीयैः। रूपारूप्यधातुकैश्चतुर्वर्गीयैः ॥०॥ [ द्व्यालंबननिदशः परिनिष्ठितः ]॥०॥ [ 945c ]

## ४. समनन्तर [ चित्तोत्पादः ]

मन इन्द्रियं यावद् आरूप्यधातुकभावनाहेयाविद्यानुशयः। एकैकं त्रैधातुकपंचदशवर्गीयेषु चित्तेषु समनन्तरं जनयति कति चित्तानि। प्रतिवचनं। मन इन्द्रियं समनन्तरं जनयति पंचदश चित्तानि। उपेक्षेन्द्रियं श्रद्धादीनि पंचेन्द्रियाणि चापि तथा ॥

सुखेन्द्रियं समनन्तरं जनयत्येकादशचित्तानि ॥

दुःखेन्द्रियं समनन्तरं जनयति पंच चित्तानि। दौर्मनस्येन्द्रियमपि तथा ॥

सौमनस्येन्द्रियं समनन्तरं जनयति दश चित्तानि ॥

अनाज्ञातमाज्ञास्यामीन्द्रियं समनन्तरं न जनयति चित्तं ॥

आज्ञा- ऽऽज्ञातावीन्द्रिये समनन्तरं जनयतस्त्रीणि चित्तानि ॥

चक्षुःश्रोत्रकायविज्ञानधातवः समनन्तरं जनयन्ति दश चित्तानि ॥

घ्राणजिह्वाविज्ञानधातू समनन्तरं जनयतः पंच चित्तानि। अकुशलधर्मा अपि तथा ॥

मनो-धर्म-मनोविज्ञानधातवः समनन्तरं जनयन्ति पंचदश चित्तानि। मनो-धर्मायतने, पश्चिमाश चत्वारः स्कन्धाः, पश्चिमाश् चत्वार उपादानस्कन्धाः, विज्ञानधातुः, अरूपिणो ऽनिदर्शना अप्रतिघाः सास्रवाः संस्कृता धर्माः, प्रत्युत्पन्नाः



कुशला अव्याकृतास् त्रिधातुप्रतिसंयुक्ता नशैक्षनाशैक्षा दर्शनभावनाहेया धर्माश् चापि तथा ॥

अनास्रवधर्माः समनन्तरं जनयन्ति त्रीणि चित्तानि। शैक्षा अशैक्षा अहेया धर्माश् चापि तथा ॥

अतीतधर्माः समनन्तरं जनयन्ति द्वे चित्ते ॥

अनागतधर्मा न जनयन्ति चित्तं ॥

दुःखसमुदयसत्ये समनन्तरं जनयतः पंचदश चित्तानि। चत्वारि ध्यानानि, चत्वार आरूप्या, संवृतिज्ञानं चापि तथा ॥

मार्गसत्यं समनन्तरं जनयति त्रीणि चित्तानि। दुःखसमुदयनिरोधमार्गान्वयज्ञानानि, त्रयः समधयश् चापि तथा ॥

चत्वारि अप्रमाणानि समनन्तरं जनयन्ति षट् चित्तानि। प्रथमद्वितीयचतुर्थपंचमविमोक्षाः, पौर्विकाणि चत्वारि अभिभ्वायतनानि परचित्तज्ञानं चापि तथा ॥

तृतीयषष्ठसप्तमविमोक्षाः समनन्तरं जनयन्ति पंच चित्तानि। पश्चिमानि चत्वारि अभिभ्वायतनानि, दश कृत्स्नायतनानि चापि तथा ॥

अष्टमविमोक्षो न जनयति चित्तं ॥

धर्मज्ञानं समनन्तरं जनयति द्वे चित्ते ॥

त्रीणि संयोजनानि समनन्तरं जनयन्ति पंचदश चित्तानि। भवाविद्यास्रवौ, ओघयोगयोर् भवो दृष्टिर् अविद्या च, पश्चिमानि त्रीण्युपादानानि, पश्चिमौ द्वौ कायग्रन्थौ, रागमानसंयोजने, पश्चिमानि त्रीणि अवरभागीय [ 946a ] संयोजनानि, पश्चिमानि चत्वारि ऊर्ध्वभागीयसंयोजनानि, पंच दृष्टयः, मनःसंस्पर्शजतृष्णाकायः, पश्चिमाः पंचानुशयाः, तृष्णादिषट्संयोजनानि चापि तथा ॥

त्रीण्यकुशलेन्द्रियाणि कामास्रवश्च समनन्तरं जनयन्ति पंच चित्तानि। ओघयोगोपादानानां कामः, पौर्विकौ द्वौ कायग्रन्थौ, पंच नीवरणानि, प्रतिघेर्ष्यामात्सर्यसंयोजनानि, पौर्विके द्वे अवरभागीयसंयोजने, घ्राणजिह्वासंस्पर्शजतृष्णाकायौ, कामरागप्रतिघानुशयौ, प्रतिघेर्ष्यामात्सर्यसंयोजनानि चापि तथा ॥

रूपारूप्यरागोर्ध्वभागीयसंयोजने समनन्तरं जनयतो द्वे चित्ते ॥

पश्चिमानि त्रीणि ऊर्ध्वभागीयसंयोजनानि समनन्तरं जनयन्ति त्रीणि चित्तानि ॥

चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकायाः समनन्तरं जनयन्ति दश चित्तानि ॥

कामधातुकाः षट्त्रिंशद् अनुशयाः समनन्तरं जनयन्ति पंच चित्तानि ॥

रूपधातुका एकत्रिंशद् अनुशयाः समनन्तरं जनयन्ति दश चित्तानि ॥

आरूप्यधातुका एकत्रिंशद् अनुशयाः समनन्तरं जनयन्ति पंचदश चित्तानि ॥०॥ [ समनन्तर(चित्तोत्पाद)निर्देशः परिनिष्ठितः ] ॥०॥

## ५. स [ वितर्कतादि ]

चक्षुरिन्द्रियं यावद् आरूप्यधातुकभावनाहेयाविद्यानुशयः । एकैकम् उपचितानुशयं वक्तव्यं किं सवितर्कसविचारं, किम् अवितर्कसविचारं, किम् अवितर्काविचारं। प्रतिवचनं। वक्तव्यं चक्षुरिन्द्रियम् उपचितानुशयं त्रिसमर्पितं। श्रोत्रघ्राणजिह्वाकायजीवितमनःसुखसौमनस्यश्रद्धादिपंचकेन्द्रियाणि चापि उपचितानुशयानि तथा ॥

स्त्रीन्द्रियम् उपचितानुशयं सवितर्कसविचारं। पुरुषदुःखदौर्मनस्येन्द्रियाणि चापि उपचितानुशयानि तथा ॥

चक्षुःश्रोत्रघ्राणजिह्वाकायरूपशब्दस्प्रष्टव्यमनोधर्ममनोविज्ञानधातव उपचितानुशयास् त्रिसमर्पिताः । चक्षुश्रोत्रघ्राणजिह्वाकायरूपशब्दस्प्रष्टव्यमनोधर्मायतनानि, पंच स्कन्धाः, पंचोपादानस्कंधाः, षड्धातवः, रूपिणो ऽरूपिणः सनिदर्शना अनिदर्शनाः सप्रतिघा अप्रतिघाः सास्रवाः संस्कृता धर्माः, अतीतानागतप्रत्युत्पन्नाः कुशलाव्याकृता रूपधातुप्रतिसंयुक्ता नशैक्षनाशैक्षा दर्शनभावनाहेया धर्माश्चापि उपचितानुशयास् तथा ॥

गन्धरसघ्राणजिह्वाविज्ञानधातव उपचितानुशयाः सवितर्कसविचाराः । गन्धरसायतने, अकुशलाः कामधातुप्रतिसंयुक्ता धर्माश्चापि उपचितानुशयास् तथा ॥

चक्षुःश्रोत्रकायविज्ञानधातव उपचितानुशयाः सवितर्कसविचारा वा, अवितर्कसविचारा वा ॥

आरूप्यधातुप्रतिसंयुक्ता धर्मा उपचितानुशया अवितर्काविचाराः ॥



दुःखसमुदयसत्ये उपचितानुशये त्रिसमर्पिते। चत्वारि अप्रमाणानि, आद्यौ द्वौ विमोक्षौ, पौर्विकाणि चत्वारि अभिभ्वायतनानि, परचित्तसंवृत्तिज्ञाने, त्रिविधसमाधयश्चापि उपचितानुशयानि तथा ॥

प्रथमध्यानमुपचितानुशयं सवितर्कसविचारं वा, अवितर्कसविचारं वा ॥

पश्चिमानि त्रीणि ध्यानानि उपचितानुशयानि अवितर्काविचाराणि। चत्वार आरूप्याः, पश्चिमाः षड् विमोक्षाः, पश्चिमानि चत्वारि अभिभ्वायतनानि, दशकृत्स्नायततानि चापि उपचितानुशयानि तथा ॥

त्रीणि संयोजनानि उपचितानुशयानि त्रिसमर्पितानि। भवाविद्या[946a]स्रवौ, ओघयोगोपानानानां पश्चिमानि त्रीणि, पश्चिमौ द्वौ कायग्रन्थौ, रागमानसंयोजने, पश्चिमानि त्रीणि अधोभागीयसंयोजनानि, वर्जयित्वारूप्यरागम् अन्यानि चत्वारि ऊर्ध्वभागीयसंयोजनानि, पंच दृष्टयः, षष्ठस्तृष्णाकायः, पश्चिमाः पंचानुशयाः, तृष्णादिषट्संयोजनानि चापि उपचितानुशयानि तथा ॥

त्रीण्यकुशलेन्द्रियाणि उपचितानुशयानि सवितर्कसविचाराणि। ओघयोगोपादानानां कामः, पौर्विकौ द्वौ कायग्रन्थौ, पंच नीवरणानि, प्रतिघेर्ष्यामात्सर्यसंयोजनानि, पौर्विके द्वे अवरभागीयसंयोजने, घ्राणजिह्वासंस्पर्शजतृष्णाकायौ, आद्यौ द्वावनुशयौ, प्रतिघेर्ष्यामात्सर्यसंयोजनानि चापि उपचितानुशयानि तथा ॥

आरूप्यराग उपचितानुशयो ऽवितर्को ऽविचारः ॥

चक्षुश्रोत्रकायसंस्पर्शजतृष्णाकाया उपचितानुशयाः सवितर्कसविचारा वा, अवितर्कसविचारा वा ॥

कामधातुकाः षट्त्रिंशदनुशया उपचितानुशयाः सवितर्कसविचाराः ॥

रूपधातुका एकत्रिंशदनुशया उपचितानुशयास् त्रिसमर्पिताः ॥

आरूप्यधातुका एकत्रिंशदनुशया उपचितानुशया अवितर्काविचाराः ॥०॥ [ सवितर्कतादिनिर्देशः परिनिष्ठितः ] ॥०॥

## ६. इन्द्रिय[संप्रयोगः]

चक्षुरिन्द्रियं यावद् आरूप्यधातुकभावनाहेयाविद्यानुशयः । एकैकम् अनुशयानुशयितं वक्तव्यं संप्रयुक्तं किं सुखेन्द्रियेण, किं दुःखेन्द्रियेण, किं सौमनस्येन्द्रियेण, किं दौर्मनस्येन्द्रियेण, किम् उपेक्षेन्द्रियेण । प्रतिवचनं । वक्तव्यं चक्षुरिन्द्रियम् अनुशयानुशयितं चतुर्भिरिन्द्रियैः संप्रयुक्तं वर्जयित्वा दुःखेन्द्रियं । श्रोत्रघ्राणजिह्वाकायजीवितसुखोपेक्षाश्रद्धादिपंचकेन्द्रियाणि चापि अनुशयानुशयितानि तथा ॥

स्त्रीन्द्रियम् अनुशयानुशयितं त्रिभिरिन्द्रियैः संप्रयुक्तं वर्जयित्वा सुखदुःखेन्द्रिये । पुरुषसौमनस्यदौर्मनस्येन्द्रियाणि चापि अनुशयानुशयितानि तथा ॥

मन इन्द्रियम् अनुशयानुशयितं पंचभिरिन्द्रियैः संप्रयुक्तं ॥

दुःखेन्द्रियम् अनुशयानुशयितं चतुर्भिरिन्द्रियैः संप्रयुक्तं वर्जयित्वा सुखेन्द्रियं ॥

चक्षुश्रोत्रघ्राणजिह्वाकायमनोविज्ञानधातवो ऽनुशयानुशयिताश् चतुर्भिरिन्द्रियैः संप्रयुक्ताः, वर्जयित्वा दुःखेन्द्रियं । चक्षुश्रोत्रघ्राणजिह्वाकायायतनदर्शनहेयधर्माश्चापि अनुशयानुशयितास् तथा ॥

रूपशब्दगन्धरसस्प्रष्टव्यचक्षुःश्रोत्रघ्राणजिह्वाकायविज्ञानमनोधर्मधातवो ऽनुशयानुशयिताः पंचभिरिन्द्रियैः संप्रयुक्ताः । रूपशब्दगन्धरसस्प्रष्टव्यमनोधर्मायतनानि, पंच स्कंधाः,पंचोपादानस्कंधाः, षड् धातवः, रूपिणो ऽरूपिणः सनिदर्शना अनिदर्शनाः सप्रतिघा अप्रतिघाः सास्रवाः संस्कृता धर्माः, अतीतानागतप्रत्युत्पन्नाः कुशलाकुशलाव्याकृताः कामधातुप्रतिसंयुक्ता नशैक्षनाशैक्षा भावनाहेया धर्माश्चापि अनुशयानुशयितास् तथा ॥

रूपधातुप्रतिसंयुक्तधर्मा अनुशयानुशयितास् त्रिभिरिन्द्रियैः प्रतिसंयुक्ताः । वर्जयित्वा दुःखदौर्मनस्येन्द्रिये ॥

आरूप्यधातुप्रतिसंयुक्ताधर्मा अनुशयानुशयिता उपेक्षेन्द्रियसंप्रयुक्ताः ॥

दुःखसमुदयसत्ये अनुशयानुशायिते पंचेन्द्रियसंप्रयुक्ते । संवृतिज्ञानं चापि अनुशतानुशयितं तथा ॥

प्रथमं ध्यानम् अनुशयानुशयितं त्रिभिरिन्द्रियैः संप्रयुक्तं वर्जयित्वा दुःखदौर्मनस्येन्द्रिये । मैत्रीकरुणोपेक्षाप्रमाणानि, परचित्तज्ञानं [946c] चापि अनुशयानुशयितानि तथा ॥



द्वितीयं ध्यानम् अनुशयानुशयितं सौमनस्योपेक्षेन्द्रियाभ्यां संप्रयुक्तं । मुदिताऽप्रमाणं, आद्यौ द्वौ विमोक्षौ, पौर्विकाणि चत्वारि अभिभ्वायतनानि चापि अनुशयानुशयितानि तथा ॥

तृतीयं ध्यानम् अनुशयानुशयितं सुखोपेक्षेन्द्रियाभ्यां संप्रयुक्तं ॥

चतुर्थं ध्यानम् अनुशयानुशयितम् उपेक्षेन्द्रियेण संप्रयुक्तं । चत्वार आरूप्याः, पश्चिमाः षड् विमोक्षाः, पश्चिमानि चत्वारि अभिभ्वायतनानि, दश कृत्स्नायतनानि चापि अनुशयानुशयितानि तथा ॥

त्रिविधसमाधयो ऽनुशतानुशयिताश् चतुर्भिरिन्द्रियैः संप्रयुक्ताः, वर्जयित्वोपेक्षेन्द्रियं ॥

त्रीणि संयोजनानि अनुशयानुशयितानि चतुर्भिरिन्द्रियैः संप्रयुक्ता वर्जयित्वा दुःखेन्द्रियं । लोभाकुशलमूलं, ओघयोगोपादानानां दृष्टिः, शीलव्रतोपादानं, अभिध्याशीलव्रतपरामर्शेदंसत्याभिनिवेशकायग्रन्थाः, कामच्छन्दनीवरणं, रागमानसंयोजने, कामरागसत्कायदृष्टिशीलव्रतपरामर्शविचिकित्सावरभागीयसंयोजनानि, पंच दृष्टयः, षट् तृष्णाकायाः, कामरागमानदृष्टिविचिकित्सानुशयाः तृष्णा-मान-दृष्टि-परामर्शसंयोजनानि चापि अनुशयानुशयितानि तथा ॥

द्वेषाकुशलमूलम् अनुशयानुशयितं चतुर्भिरिन्द्रियैः संप्रयुक्तं वर्जयित्वा दुःखेन्द्रियं । व्यापादकायग्रन्थः व्यापादनीवरणं, [ पंचसंयोजनेषु ] प्रतिघसंयोजनं, प्रतिघानुशयः, [ नवसंयोजनेषु ] प्रतिघसंयोघसंयोजनं चापि अनुशयानुशयितानि तथा ॥

मोहाकुशलमूलम् अनुशयानुशयितं पंचेन्द्रियसंप्रयुक्तं । आस्रवौघयोगानां कामाविद्ये, कामोपादानं, स्त्यानौद्धत्यनीवरणे, अविद्यानुशयश्चापि अनुशयानुशयितानि तथा ॥

भवास्रवो ऽनुशयानुशयितस् त्रिभिरिन्द्रियैः संप्रयुक्तः, वर्जयित्वा दुःखदौर्मनस्येन्द्रिये । ओघयोगयोर् भवः, आत्मवादोपादानं, रूपरागौद्धत्यमानाविद्योर्ध्वभागीयसंयोजनानि, भवरागानुशयश्च अनुशयानुशयितानि तथा ॥

मिद्धकौकृत्यविचिकित्सानीवरणानि अनुशयानुशयितानि त्रिभिरिन्द्रियैः संप्रयुक्तानि वर्जयित्वा सुखदुःखेन्द्रिये । [ पंचसंयोजनेषु ] ईर्ष्यामात्सर्यसंयोजने, [ नवसंयोजनेषु ] ईर्ष्यामात्सर्यसंयोजने चापि अनुशयानुशयितानि तथा ॥

आरूप्यरागो ऽनुशयानुशयित उपेक्षेन्द्रियसंप्रयुक्तः ॥

कामधातुका दर्शनहेयाः सर्वे, भावनाहेयश्च मानानुशयो ऽनुशयानुशयितास् त्रिभिरिन्द्रियैः संप्रयुक्ता वर्जयित्वा सुखदुःखेन्द्रिये ॥

कामधातुको भावनाहेयो रागानुशयो ऽनुशयानुशयितश् चतुर्भिरिन्द्रियैः संप्रयुक्तः, वर्जयित्वा दुःखेन्द्रियं ॥

कामधातुको भावनाहेयः प्रतिघानुशयो ऽनुशयानुशयिश् चतुर्भिरिन्द्रियैः संप्रयुक्तः, वर्जयित्वा सुखेन्द्रियं ॥

कामधातुको भावनाहेयो ऽविद्यानुशयो ऽनुशयानुशयितः पंचभिरिन्द्रियैः संप्रयुक्तः ॥

रूपधातुका एकत्रिंशद् अनुशया अनुशयानुशयितास् त्रिभिरिन्द्रियैः संप्रयुक्ता वर्जयित्वा दुःखदौर्मनस्येन्द्रिये ॥

आरूप्यधातुका एकत्रिंशदनुशया अनुशयानुशयिता उपेक्षेन्द्रियसंप्रयुक्ताः ॥०॥

[ इन्द्रियसंप्रयोगनिर्देशः परिनिष्ठितः ] ॥०॥

## ७-८. भवत्यभवतो

चक्षुरिन्द्रियं यावद् आरूप्यधातुकभावनाहेयाविद्यानुशयः। कस्य भवन्ति कस्य न भवन्ति। प्रतिवचनं। चक्षुरिन्द्रियं रूपधातुकस्य, प्राप्ताविनष्टं चेत् [ 947a ] कामधातुकस्य च भवति। आरूप्यधातुकस्य, अप्राप्तविनष्टं चेत् कामधातुकस्य च न भवति। श्रोत्रघ्राणजिह्वेन्द्रियाण्यपि तथा ॥

कायेन्द्रियं कामरूपधातुकस्य भवति। आरूप्यधातुकस्य न भवति ॥

स्त्रीपुरुषेन्द्रिये प्राप्ताविनष्टे चेत् कामधातुकस्य भवतः। रूपारूप्यधातुकस्य, अप्राप्तविनष्टे चेत् कामधातुकस्य च न भवतः ॥

जीवितमनउपेक्षेन्द्रियाणि सर्वसत्त्वानां संभवन्ति ॥

सुखेन्द्रियं शुभकृत्स्नाद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्जनस्योर्ध्वजातस्य न भवति ॥

दुःखेन्द्रियं कामधातुकस्य भवति। रूपारूप्यधातुकस्य न भवति ॥

सौमनस्येन्द्रियम् आभास्वराद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्जनस्य ऊर्ध्वजातस्य न भवति ॥



दौर्मनस्येन्द्रियम् अवीतकामरागस्य भवति। वीतकामरागस्य न भवति ॥

श्रद्धादीनि पंचेन्द्रियाणि अप्रहीणकुशलमूलस्य भवन्ति। प्रहीणकुशलमूलस्य न भवन्ति ॥

त्रीण्यनास्रवेन्द्रियाणि प्राप्त्याप्रणाशवतो भवन्ति। अप्राप्ति-प्रणाशवतो न भवन्ति ॥

चक्षुःश्रोत्रघ्राणजिह्वाधातवो रूपधातुकस्य, प्राप्ताविनष्टाश् चेत् कामधातुकस्य भवन्ति। आरूप्यधातुकस्य, अप्राप्तविनष्टाश् चेत् कामधातुकस्य च न भवन्ति। चक्षुःश्रोत्रघ्राणजिह्वायतनान्यपि तथा ॥

कायरूपशब्दस्प्रष्टव्यधातवः कामरूपधातुकस्य भवन्ति। आरूप्यधातुकस्य न भवन्ति। कायरूपशब्दस्प्रष्टव्यायतनानि, रूपोपादानस्कंधः, पौर्विकाः पंच धातवः, सनिदर्शनाः सप्रतिघा धर्माः, कामरूपधातुप्रतिसंयुक्तधर्माश् चापि तथा ॥

गन्धरसघ्राणजिह्वाविज्ञानधातवः कामधातुकस्य भवन्ति। रूपारूप्यधातुकस्य न भवन्ति। गन्धरसायतने अपि तथा ॥

चक्षुःश्रोत्रकायविज्ञानधातवो ब्रह्मलोकाद् अधरस्य, ऊर्ध्वजातस्य च त्रिध्यानप्रत्युत्पन्नाभिमुखस्य भवन्ति। अप्रत्युत्पन्नाभिमुखस्य, आरूप्यधातुकस्य च न भवन्ति ॥

मनोधर्ममनोविज्ञानधातवः सर्वसत्त्वानां संभवन्ति। मनोधर्मायतने, पश्चिमाश् चत्वारः स्कन्धाश् चत्वार उपादानस्कंधाः, विज्ञानधातुः, अरूपिणो ऽनिदर्शना अप्रतिघाः सास्रवानास्रवाः संस्कृतासंस्कृता धर्माः, अतीतानागतप्रत्युत्पन्ना अव्याकृता आरूप्यधातुप्रतिसंयुक्ता नशैक्षनाशैक्षा भावनाहेया अहेया धर्माश्चापि तथा ॥

रूपस्कंधः कामरूपधातुकस्य, आरूप्यधातुकस्य चार्यस्य भवति। आरूप्यधातुकस्य पृथग्जनस्य न भवति। रूपिणो धर्मा अपि तथा ॥

कुशला धर्मा अप्रहीणकुशलमूलस्य भवन्ति। प्रहीणकुशलमूलस्य न भवन्ति ॥

अकुशला धर्मा अवीतकामरागस्य भवन्ति। वीतकामरागस्य न मवन्ति ॥

शैक्षाशैक्षधर्माः प्राप्त्याप्रणाशवतो भवन्ति। अप्राप्ति-प्रणाशवतो न भवन्ति ॥

दर्शनहेयधर्मा अनुत्पन्नमार्गान्वज्ञानस्य भवन्ति। उत्पन्नस्य न भवन्ति ॥

दुःखसमुदयसत्ये सर्वेषां सत्त्वानां संभवन्ति । नैवसंज्ञानासंज्ञायतनं संवृतिज्ञानं चापि तथा ॥

निरोधसत्यं प्राप्त्याप्रणाशवतो भवति । अप्राप्ति-प्रणाशवतो न भवति। चत्वारि अ[ 947b ]प्रमाणानि, अष्टौ विमोक्षाः, अष्टावभिभ्वायतनानि, दश कृत्स्नायतनानि, परचित्तज्ञानं चापि तथा ॥

मार्गसत्यं प्राप्तिवतो भवति । अप्राप्तिवतो न भवति । धर्मान्वियदुःख-समुदयनिरोधमार्गज्ञानानि, त्रयः समाधयः, त्रिविधसमाधयश्चापि तथा ॥

प्रथमध्यानं ब्रह्मलोकाद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्जनस्य ऊर्ध्वजातस्य न भवति ॥

द्वितीयध्यानम् आभास्वराद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्‌जनस्य ऊर्ध्वजातस्य न भवति ॥

तृतीयध्यानं शुभकृत्स्नाद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्‌जनस्य ऊर्ध्वजातस्य न भवति ॥

चतुर्थध्यानं वृहत्फलाद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्जनस्य ऊर्ध्वजातस्य न भवति।

आकाशानन्त्यायतनम् आकाशानन्त्यायतनाद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्जनस्य ऊर्ध्वजातस्य न भवति ॥

विज्ञानानन्त्यायतनं विज्ञानानन्त्यायतनाद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्जनस्य ऊर्ध्वजातस्य न भवति ॥

आकिंचन्यायतनम् आकिंचन्यायतनाद् अधरस्य, आर्यस्य चोर्ध्वजातस्य भवति। पृथग्जनस्य ऊर्ध्वजातस्य न भवति ॥

सत्कायदृष्टिसंयोजनम् अनुत्पन्नदुःखान्वयज्ञानस्य भवति। उत्पन्नस्य तु न भवति। सत्कायदृष्ट्यवरभागीयसंयोजनं, सत्कायदृष्टिः, अन्तग्राहदृष्टिश्चापि तथा ॥

शीलव्रतपरामर्शविचिकित्सासंयोजने अनुत्पन्नमार्गान्वयज्ञानस्य भवतः। उत्पन्नस्य तु न भवतः। ओघयोगोपादानां दृष्टिः, शीलव्रतोपादानं, पश्चिमौ द्वौ कायग्रन्थौ, विचिकित्साशीलव्रतपरामर्शावरभागीयसंयोजने, पश्चिमास् तिस्रो दृष्टयः, दृष्टिविचिकित्सानुशयौ, दृष्टि-परामर्श-विचिकित्सासंयोजनानि चापि तथा ॥

त्रीण्यकुशलमूलानि अवीतकामरागस्य भवन्ति । वीतकामरागस्य न भवन्ति। आस्रवौघयोगोपादानानां कामः, पौर्विकौ द्वौ कायग्रन्थौ, पौर्विकाणि



चत्वारि नीवरणानि, [ पंचसंयोजनानां ] प्रतिघेर्ष्यामात्सर्यसंयोजनानि, पौर्विके द्वे अवरभागीयसंयोजने, घ्राणजिह्वासंस्पर्शजतृष्णाकायौ, कामरागप्रतिघानुशयौ, [ नव-संयोजनानां ] प्रतिघेर्ष्यमात्सर्यसंयोजनानि चापि तथा ॥

भवाविद्यास्रवौ अप्रहीणारूप्यरागस्य भवतः। प्रहीणारूप्यरागस्य न भवतः। ओघयोगयोर् भवाविद्ये, आत्मवादोपादानं, रागमानसंयोजने, पश्चिमानि चत्वारि अवरभागीयसंयोजनानि, मनःसंस्पर्शजतृष्णाकायः, भवरागमानाविद्यानुशयाः, तृष्णा-मानाविद्यासंयोजनानि चापि तथा ॥

विचिकित्सानीवरणम् अप्रहीणकामरागस्य पृथग्जनस्य, अप्रहीणकामरागस्य आर्यस्य, अनुत्पन्नधर्मज्ञानस्य च भवति। प्रहीणकामरागस्य आर्यस्य, उत्पन्नधर्म-ज्ञानस्य च न भवति ॥

रूपरागोर्ध्वभागीयसंयोजनम् अप्रहीणरूपरागस्य भवति। प्रहीणरूपरागस्य न भवति ॥

चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकाया अप्रहीणब्रह्मलोकरागस्य भवन्ति । प्रहीणब्रह्मलोकरागस्य न भवन्ति ॥

कामधातुकदुःखदर्शनहेयानु[ 947c ]शया अप्रहीणकामरागस्य पृथग्जनस्य, अप्रहीणकामरागस्य आर्यस्य अनुत्पन्नदुःखधर्मज्ञानस्य च भवन्ति। प्रहीणकाम-रागयोर् आर्यपृथग्जनयोः, अप्रहीणकामरागस्य आर्यस्य, उत्पन्नधर्मज्ञानस्य च न भवन्ति ॥

कामधातुकसमुदयदर्शनहेयानुशया अप्रहीणकामरागस्य पृथग्जनस्य, अप्रहीण-कामरागस्य आर्यस्य, अनुत्पन्नसमुदयधर्मज्ञानस्य च भवन्ति। प्रहीणकामरागयोर् आर्यपृथग्जनयोः, अप्रहीणकामरागस्य आर्यस्य, उत्पन्नसमुदयधर्मज्ञानस्य च न भवन्ति ॥

कामधातुकनिरोधदर्शनहेयानुशया अप्रहीणकामरागस्य पृथग्जनस्य, अप्रहीण-कामरागस्य आर्यस्य, अनुत्पन्ननिरोधधर्मज्ञानस्य च भवन्ति। प्रहीणकामरागयो-रार्यपृथग्जनयोः अप्रहीणकामरागस्य आर्यस्य, उत्पन्ननिरोधधर्मज्ञानस्य च न भवन्ति ॥

कामधातुकमार्गदर्शनहेयानुशया अप्रहीणकामरागस्य पृथग्जनस्य, अप्रहीण-कामरागस्य आर्यस्य, अनुत्पन्नमार्गधर्मज्ञानस्य च भवन्ति। प्रहीणकामरागयोर् आर्यपृथग्जनयोः, अप्रहीणकामरागस्य आर्यस्य, उत्पन्नमार्गधर्मज्ञानस्य न भवन्ति ॥

कामधातुकभावनाहेयानुशया अप्रहीणकामरागस्य भवन्ति । प्रहीणकामरागस्य न भवन्ति ॥

रूपधातुकदुःखदर्शनहेयानुशया अप्रहीणरूपरागस्य पृथग्जनस्य, अप्रहीणरूपरागस्य आर्यस्य, अनुत्पन्नदुःखान्वयज्ञानस्य च भवन्ति । प्रहीणरूपरागयोर् आर्यपृथग्जनयोः, अप्रहीणरूपरागस्य आर्यस्य उत्पन्नदुःखान्वयज्ञानस्य च न भवन्ति ॥

रूपधातुकसमुदयदर्शनहेयानुशया अप्रहीणरूपरागस्य पृथग्जनस्य, अप्रहीणरूपरागस्य आर्यस्य, अनुत्पन्नसमुदयान्वयज्ञानस्य च भवन्ति। प्रहीणरूपरागयोर् आर्यपृथग्जनयोः, अप्रहीणरूपरागस्य आर्यस्य उत्पन्नसमुदयान्वयज्ञानस्य च न भवन्ति ॥

रूपधातुकनिरोधदर्शनहेयानुशया अप्रहीणरूपरागस्य पृथग्जनस्य, अप्रहीणरूपरागस्य आर्यस्य, अनुत्पन्ननिरोधान्वयज्ञानस्य च भवन्ति। प्रहीणरूपरागयोर् आर्यपृथग्जनयोः, अप्रहीणरूपरागस्य आर्यस्य उत्पन्ननिरोधान्वयज्ञानस्य च न भवन्ति ॥

रूपधातुकमार्गदर्शनहेयानुशया अप्रहीणरूपरागस्य पृथग्जनस्य, अप्रहीणरूपरागस्य आर्यस्य अनुत्पन्नमार्गान्वयज्ञानस्य च भवन्ति । प्रहीणरूपरागयोर् आर्यपृथग्जनयोः, अप्रहीणरूपरागस्य आर्यस्य उत्पन्नमार्गान्वयज्ञानस्य च न भवन्ति ॥

रूपधातुकभावनाहेयानुशया अप्रहीणरूपरागस्य भवन्ति। प्रहीणरूपरागस्य न भवन्ति ॥

आरूप्यधातुकदुःखदर्शनहेयानुशया अनुत्पन्नदुःखान्वयज्ञानस्य भवन्ति । उत्पन्नस्य न भवन्ति ॥

आरूप्यधातुकसमुदयदर्शनहेयानुशया अनुत्पन्नसमुदयान्वयज्ञानस्य भवन्ति। उत्पन्नस्य न [ 948a ] भवन्ति ॥

आरूप्यधातुकनिरोधदर्शनहेयानुशया अनुत्पन्ननिरोधान्वयज्ञानस्य भवन्ति। उत्पन्नस्य न भवन्ति ॥

आरूप्यधातुकमार्गदर्शनहेयानुशया अनुत्पन्नमार्गान्वयज्ञानस्य भवन्ति । उत्पन्नस्य न भवन्ति ॥

आरूप्यधातुकभावनाहेयानुशया अप्रहीणारूप्यरागस्य भवन्ति। प्रहीणारूप्यरागस्य न भवन्ति ॥०॥ [ भवत्यभवत्योर्निर्देशः परिनिष्ठितः ] ॥०॥



## ६. परिज्ञा

चक्षुरिन्द्रियं यावद् आरूप्यधातुकभावनाहेयाविद्यानुशयः । एकैकस्य परिज्ञाप्राप्तिकाले ऽष्टानवत्यनुशयेषु कतीनां लभ्यते परिज्ञा, नवसंयोजनेषु कतीनां लभ्यते प्रहाणं । प्रतिवचनं । चक्षुरिन्द्रियपरिज्ञाप्राप्तिकाले रूपतृष्णाप्रहाणं । पृथग्जनस्य एकत्रिंशदनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं । आर्यस्य त्रयाणामनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। श्रोत्रघ्राणजिह्वाकायेन्द्रियाण्यपि तथा ॥

स्त्रीपुरुषेन्द्रियपरिज्ञाप्राप्तिकाले कामतृष्णाप्रहाणं । पृथग्जनस्य षट्त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य चतुर्णामनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं । दुःखदौर्मनस्येन्द्रिये अपि तथा ॥

जीवितेन्द्रियपरिज्ञाप्राप्तिकाले आरूप्यतृष्णाप्रहाणं । त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। मनउपेक्षाश्रद्धादीन्द्रियाण्यपि तथा ॥

सुखेन्द्रियपरिज्ञाप्राप्तिकाले शुभकृत्स्नतृष्णाप्रहाणं । केवलं सुखेन्द्रियपरिज्ञा लभ्यते, न संयोजनप्रहाणं ॥

सौमनस्येन्द्रियपरिज्ञाप्राप्तिकाले आभास्वररागप्रहाणं । केवलं सौमनस्येन्द्रियपरिज्ञा लभ्यते, न संयोजनप्रहाणं ॥

चक्षुःश्रोत्रघ्राणजिह्वाकायरूपशब्दस्प्रष्टव्यधातुपरिज्ञाप्राप्तिकाले रूपतृष्णाप्रहाणं । पृथग्जनस्य एकत्रिंशदनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं । आर्यस्य त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। चक्षुःश्रोत्रघ्राणजिह्वाकायरूपशब्दस्प्रष्टव्यायतनानि, रूपस्कन्धः, रूपोपादानस्कंधः, पौर्विकाः पंच धातवः, रूपिणः सनिदर्शनाः सप्रतिघा धर्माः, रूपधातुप्रतिसंयुक्तधर्माश् चापि तथा ॥

गन्धरसघ्राणजिह्वाविज्ञानधातुपरिज्ञाप्राप्तिकाले कामतृष्णाप्रहाणं। पृथग्जनस्य षट्त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं । आर्यस्य चतुर्णाम् अनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। गन्धरसायतने, अकुशलाः, कामधातुप्रतिसंयुक्ता धर्माश्चापि तथा ॥

चक्षुःश्रोत्रकायविज्ञानधातुपरिज्ञाप्राप्तिकाले ब्रह्मलोकतृष्णाप्रहाणं । केवलं चक्षुःश्रोत्रकायविज्ञानधातुपरिज्ञा लभ्यते, न संयोजनप्रहाणं ॥

मनोधर्ममनोविज्ञानधातुपरिज्ञाप्राप्तिकाले आरूप्यतृष्णाप्रहाणं । त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। मनोधर्मायतने, पश्चिमाश् चत्वारः स्कन्धाः, चत्वार उपादानस्कंधाः, विज्ञानधातुः, अरूपिणो ऽनिदर्शना अप्रतिघाः सास्रवाः संस्कृता धर्माः, अतीतानागतप्रत्युत्पन्नाः कुशलाव्याकृता आरूप्यधातुप्रतिसंयुक्ता नशैक्षनाशैक्षा भावनाहेया धर्माश्चापि तथा ॥

दर्शनहेयधर्मपरिज्ञाप्राप्तिकाले अप्रहीणरूपतृष्णस्य प्रत्युत्पन्नाभिमुखमार्गान्वयज्ञानस्य चतुर्दशानुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां [ 948b ] प्रहाणं। प्रहीणरूपतृष्णस्य प्रत्युत्पन्नाभिमुखमार्गान्वयज्ञानस्य सप्तानुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं ॥

दुःखसमुदयसत्यपरिज्ञाप्राप्तिकाले आरूप्यतृष्णाप्रहाणं। त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। नैवसंज्ञानासंज्ञायतनं, पश्चिमौ द्वौ विमोक्षौ, त्रिविधसमधयश्चापि तथा ॥

प्रथमध्यानपरिज्ञाप्राप्तिकाले ब्रह्मलोकतृष्णाप्रहाणं। केवलं प्रथमध्यानपरिज्ञा लभ्यते, न संयोजनप्रहाणं॥

द्वितीयध्यानपरिज्ञाप्राप्तिकाले आभास्वरतृष्णाप्रहाणं। केवलं द्वितीयध्यान-परिज्ञा लभ्यते, न संयोजनप्रहाणं। मुदिताप्रमाणम्, आद्यौ द्वौ विमोक्षौ, पौर्विकाणि चत्वार्यभिभ्वायतनान्यपि तथा ॥

तृतीयध्यानपरिज्ञाप्राप्तिकाले शुभकृत्स्नतृष्णाप्रहाणं। केवलं तृतीयध्यान-परिज्ञा लभ्यते, न संयोजनप्रहाणं ॥

चतुर्थध्यानपरिज्ञाप्राप्तिकाले रूपतृष्णाप्रहाणं। पृथग्जनस्य एकत्रिंशदनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। आर्यस्य त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। त्रीण्यप्रमाणानि, शुभविमोक्षः, पश्चिमानि चत्वार्य-भिभ्वायतनानि, अष्टौ कृत्स्नायतनानि, परचित्तज्ञानं चापि तथा ॥

आकाशानन्त्यायतनपरिज्ञाप्राप्तिकाले आकाशानन्त्यायतनतृष्णाप्रहाणं। केवल-माकाशानन्त्यायतनपरिज्ञा लभ्यते, न संयोजनप्रहाणं। आकाशानन्त्यायतनविमोक्ष-कृत्स्नायतने अपि तथा ॥

विज्ञानानन्त्यायतनपरिज्ञाप्राप्तिकाले विज्ञानानन्त्यायतनतृष्णाप्रहाणं। केवलं विज्ञानानन्त्यायतनपरिज्ञा लभ्यते, न संयोजनप्रहाणं। विज्ञानानन्त्यायतनविमोक्ष-कृत्स्नायतने अपि तथा ॥



आकिंचन्यायतनपरिज्ञाप्राप्तिकाले आकिंचन्यायतनतृष्णाप्रहाणं। केवलम् आकिंचन्यायनपरिज्ञा लभ्यते, न संयोजनप्रहाणं। आकिंचन्यायतनविमोक्षो ऽपि तथा ॥

सत्कायदृष्टिसंयोजनपरिज्ञाप्राप्तिकाले प्रत्युत्पन्नाभिमुखदुःखान्वयज्ञानस्य, अप्रहीणे रूपरागे, अष्टानवत्यनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। प्रहीणे रूपरागे, नवानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। सत्कायदृष्ट्यवरभागीय-संयोजनं, सत्कायदृष्ट्यन्तग्राहदृष्टी चापि तथा ॥

शीलव्रतपरामर्शसंयोजनपरिज्ञाप्राप्तिकाले प्रत्युत्पन्नाभिमुखमार्गान्वयज्ञानस्य, अप्रहीणे रूपरागे, चतुर्दशानुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। प्रहीणे रूपरागे सप्तानुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। ओघ-योगोपादानानां दृष्टिः, शीलव्रतोपादानं, पश्चिमौ द्वौ कायग्रन्थौ, पश्चिमे द्वे अवरभागीयसंयोजने, पश्चिमास् तिस्रो दृष्टयः, दृष्टिविचिकित्सानुशयौ, दृष्टि-परामर्श-विचिकित्सासंयोजनानि चापि तथा ॥

त्रयाणाम् अकुशलमूलानां कामास्रवस्य च परिज्ञाप्राप्तिकाले कामतृष्णाप्रहाणं। पृथग्जनस्य षट्त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य चतुर्णामनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। ओघयोगो-पादानानां कामः, पौर्विकौ द्वौ कायग्रन्थौ, पौर्विकाणि चत्वारि नीवरणानि, [ पंचसंयोजनेषु ] प्रतिघेर्ष्यामात्सर्यसंयोजनानि, पौर्विके द्वे अवरभागीयसंयोजने, घ्राणजिह्वासंस्पर्श[ 948c ]जतृष्णाकायौ, कामरागप्रतिघानुशयौ, [ नवसंयोजनेषु ] प्रतिघेर्ष्यामात्सर्यसंयोजनानि चापि तथा ॥

भवास्रवाविद्यास्रवपरिज्ञाप्राप्तिकाले आरूप्यतृष्णाप्रहाणं। त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। ओघयोगेषु भवाविद्य आत्मवादोपादानं, रागमानसंयोजने, पश्चिमानि चत्वारि ऊर्ध्वभागीयसंयोजनानि मनःसंस्पर्शजतृष्णाकायः, भवरागमानाविद्यानुशयाः, तृष्णामानाविद्यासंयोजनानि चापि तथा ॥

विचिकित्सानीवरणपरिज्ञाप्राप्तिकाले पृथग्जनस्य कामतृष्णाप्रहाणं। षट्-त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य मार्गधर्मज्ञाने प्रत्युत्पन्नाभिमुखे ऽष्टानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं ॥

रूपरागपरिज्ञाप्राप्तिकाले रूपतृष्णाप्रहाणं। पृथग्जनस्य एकत्रिंशदनुशयानां

लभ्यते परिज्ञा, न संयोजनप्रहाणं। आर्यस्य त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकायपरिज्ञाप्राप्तिकाले ब्रह्मलोकतृष्णाप्रहाणं। केवलं त्रयाणां तृष्णाकायानां परिज्ञा लभ्यते, न संयोजनप्रहाणं॥

कामधातुकदुःखदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य दुःखधर्मज्ञाने प्रत्युत्पन्नाभिमुखे दशानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

कामधातुकसमुदयदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य समुदयधर्मज्ञाने प्रत्युत्पन्नाभिमुखे सप्तानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

कामधातुकनिरोधदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य निरोधधर्मज्ञाने प्रत्युत्पन्नाभिमुखे सप्तानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

कामधातुकमार्गदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य मार्गधर्मज्ञाने प्रत्युत्पन्नाभिमुखे ऽष्टानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

कामधातुकभावनाहेयानुशयानां परिज्ञाप्राप्तिकाले कामतृष्णाप्रहाणं। पृथग्जनस्य षट्त्रिंशदनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य चतुर्णामनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं॥

रूपधातुकदुःखदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले पृथग्जनस्य रूपतृष्णाप्रहाणे एकत्रिंशदनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। आर्यस्य दुःखान्वयज्ञाने प्रत्युत्पन्नाभिमुखे ऽष्टादशानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

रूपधातुकसमुदयदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले पृथग्जनस्य रूपतृष्णाप्रहाणे एकत्रिंशदनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। आर्यस्य समुदयान्वयज्ञाने प्रत्युत्पन्नाभिमुखे द्वादशानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

रूपधातुकनिरोधदर्शनहेयानु[ 949a ]शयानां परिज्ञाप्राप्तिकाले पृथग्जनस्य रूपतृष्णाप्रहाणे एकत्रिंशदनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। आर्यस्य



निरोधान्वयज्ञाने प्रत्युत्पन्नाभिमुखे द्वादशानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

रूपधातुकमार्गदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले पृथग्जनस्य रूपतृष्णाप्रहाणे एकत्रिंशदनुशयानां लभ्यते परिज्ञा न संयोजनप्रहाणं। आर्यस्य मार्गान्वयज्ञाने प्रत्युत्पन्नाभिमुखे चतुर्णामनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं॥

रूपधातुकभावनाहेयानुशयानां परिज्ञाप्राप्तिकाले रूपतृष्णाप्रहाणं। पृथग्जनस्य एकत्रिंशदनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। आर्यस्य त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

आरूप्यधातुकदुःखदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले दुःखान्वयज्ञाने प्रत्युत्पन्नाभिमुखे ऽप्रहीणरूपरागस्य अष्टादशानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। प्रहीणरूपरागस्य नवानुशयानां लभ्यते परिज्ञा न संयोजनप्रहाणं॥

आरूप्यधातुकसमुदयदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले समुदयान्वयज्ञाने प्रत्युत्पन्नाभिमुखे ऽप्रहीणरूपरागस्य द्वादशानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। प्रहीणरूपरागस्य षडनुशयानां लभ्यते परिज्ञा न संयोजनप्रहाणं॥

आरूप्यधातुकनिरोधदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले निरोधान्वयज्ञाने प्रत्युत्पन्नाभिमुखे ऽप्रहीणरूपरागस्य द्वादशानुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं। प्रहीणरूपरागस्य षडनुशयानां लभ्यते परिज्ञा, न संयोजनप्रहाणं॥

आरूप्यधातुकमार्गदर्शनहेयानुशयानां परिज्ञाप्राप्तिकाले मार्गान्वयज्ञाने प्रत्युत्पन्नाभिमुखे ऽप्रहीणरूपरागस्य चतुर्दशानुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं। प्रहीणरूपरागस्य सप्तानुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं॥

आरूप्यधातुकभावनाहेयानुशयानां परिज्ञाप्राप्तिकाले आरूप्यतृष्णाप्रहाणं। त्रयाणाम् अनुशयानां लभ्यते परिज्ञा, त्रयाणां संयोजनानां प्रहाणं॥०॥ [ परिज्ञानिर्देशः परिनिष्ठितः ]॥०॥

## १०. साक्षात्कारः

चक्षुरिन्द्रियं यावद् आरूप्यधातुकभावनाहेयाविद्यानुशयः। एकैकस्य निरोध-साक्षात्कारकाले ऽष्टानवत्यनुशयेषु कतीनां निरोधसाक्षात्कारः। नवसंयोजनेषु कतीनां संयोजनानां प्रहाणं। प्रतिवचनं। चक्षुरिन्द्रियनिरोधसाक्षात्कारकाले रूपतृष्णाप्रहाणं। पृथग्जनस्य एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजन-प्रहाणं। आर्यस्य त्रयाणाम् अनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं। श्रोत्रघ्राणजिह्वाकायेन्द्रियाण्यपि तथा॥

स्त्रीपुरुषेन्द्रियनिरोधसाक्षात्कारकाले कामतृष्णाप्रहाणं। पृथग्जनस्य षट्त्रिंशदनुशयानां साक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य प्राप्ता-नागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षण्णां संयोजनानां प्रहाणं। यावत्। [949b] अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं। दुःखदौर्मनस्येन्द्रिये अपि तथा॥

जीवितेन्द्रियनिरोधसाक्षात्कारकाले प्राप्तार्हत्फलस्य अष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं। मनउपेक्षाश्रद्धादिपंचकेन्द्रियाण्यपि तथा॥

सुखेन्द्रियनिरोधसाक्षात्कारकाले शुभकृत्स्नतृष्णाप्रहाणं। केवलं सुखेन्द्रिय-निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

सौमनस्येन्द्रियनिरोधसाक्षात्कारकाले आभास्वरतृष्णाप्रहाणं। केवलं सौमनस्येन्द्रियनिरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्य-नुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

चक्षुःश्रोत्रघ्राणजिह्वाकायरूपशब्दस्प्रष्टव्यधातुनिरोधसाक्षात्कारकाले रूपतृष्णा-प्रहाणं। पृथग्जनस्य एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। आर्यस्य त्रयाणामनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं। चक्षुःश्रोत्र-घ्राणजिह्वाकायरूपशब्दस्प्रष्टव्यायतनानि, रूपस्कंधः, रूपोपादानस्कंधः, पौर्विकाः



पंच धातवः, रूपिणः सनिदर्शनाः सप्रतिघा धर्माः, रूपधातुप्रतिसंयुक्तधर्माश्चापि तथा॥

गन्धरसघ्राणजिह्वाविज्ञानधातुनिरोधसाक्षात्कारकाले कामतृष्णाप्रहाणं। पृथग्जनस्य षट्त्रिंशदनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य प्राप्तानागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं। गन्धरसायतने, अकुशलाः, कामधातुप्रतिसंयुक्ता धर्माश्चापि तथा॥

चक्षुःश्रोत्रकायविज्ञानधातुनिरोधसाक्षात्कारकाले ब्रह्मलोकतृष्णाप्रहाणं। केवलं त्रयाणां विज्ञानधातूनां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

मनोधर्ममनोविज्ञानधातुनिरोधसाक्षात्कारकाले प्राप्तार्हत्फलस्य अष्टानवत्य-नुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं। मनोधर्मायतने, पश्चिमाश चत्वारः स्कन्धाश् चत्वार उपादानस्कंधाः, विज्ञानधातुः, अरूपिणो ऽनिदर्शना अप्रतिघाः सास्रवाः संस्कृता धर्माः, अतीतानागतप्रत्युत्पन्नाः कुशलाव्याकृता आरूप्यधातुप्रतिसंयुक्ता नशैक्षनाशैक्षा भावनाहेया धर्माश्चापि तथा॥

दर्शनहेयधर्मनिरोधसाक्षात्कारकाले प्राप्तस्रोतआपत्तिफलस्य अष्टाशीत्यनु-शयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामि-फलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोध-साक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

दुःखसमुदयसत्यनिरोधसाक्षात्कारकाले प्राप्तार्हत्फलस्य अष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं। नैवसंज्ञानासंज्ञायतनं, पश्चिमौ द्वौ विमोक्षौ, संवृतिज्ञानं, त्रिविधसमाधयश्चापि तथा॥

प्रथमध्याननिरोधसाक्षात्कारकाले ब्रह्म[949c]लोकतृष्णाप्रहाणं। केवलं प्रथमध्याननिरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनु-शयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

द्वितीयध्याननिरोधसाक्षात्कारकाले आभास्वरतृष्णाप्रहाणं। केवलं द्वितीय-ध्याननिरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां

निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । मुदिताप्रमाणम्, आद्यौ द्वौ विमोक्षौ, पौर्विकाणि चत्वारि अभिभ्वायतनानि चापि तथा ॥

तृतीयध्याननिरोधसाक्षात्कारकाले शुभकृत्स्नतृष्णाप्रहाणं । केवलं तृतीयध्यानसाक्षात्कारः, न संयोजनप्रहाणं । यावत् । अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

चतुर्थध्याननिरोधसाक्षात्कारकाले रूपतृष्णाप्रहाणं । पृथग्जनस्य एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं । आर्यस्य त्रयाणाम् अनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं । यावत् । अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । त्रीण्यप्रमाणानि, शुभविमोक्षः, पश्चिमानि चत्वारि अभिभ्वायतनानि, पौर्विकाणि अष्टौ कृत्स्नायतनानि, परचित्तज्ञानं चापि तथा ॥

आकाशानन्त्यायतननिरोधसाक्षात्कारकाले आकाशानन्त्यायतनतृष्णाप्रहाणं । केवलं तन्निरोधसाक्षात्कारः, न संयोजनप्रहाणं । यावत् । अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । आकाशानन्त्यायतनविमोक्षकृत्स्नायतने अपि तथा ॥

विज्ञानानन्त्यायतननिरोधसाक्षात्कारकाले विज्ञानानन्त्यायतनतृष्णाप्रहाणं । केवलं तन्निरोधसाक्षात्कारः, न संयोजनप्रहाणं । यावत् । अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । विज्ञानानन्त्यायतनविमोक्षकृत्स्नायतने अपि तथा ॥

आकिंचन्यायतननिरोधसाक्षात्कारकाले आकिंचन्यायतनतृष्णाप्रहाणं । केवलं तन्निरोधसाक्षात्कारः, न संयोजनप्रहाणं । यावत् । अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । आकिंचन्यायतनविमोक्षो ऽपि तथा ॥

सत्कायदृष्टिसंयोजननिरोधसाक्षात्कारकाले प्रत्युत्पन्नाभिमुखदुःखान्वयज्ञानस्य अष्टादशानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं । यावत् । स्रोतआपत्तिफलस्याष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं । यावत् । सकृदागामिफलस्यापि तथा । यावत् । अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं । यावत् । अर्हतो



ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । सत्कायदृष्ट्यवरभागीयसंयोजनं, सत्कायदृष्ट्यन्तग्राहदृष्टी चापि तथा ॥

शीलव्रतपरामर्शविचिकित्सासंयोजननिरोधसाक्षात्कारकाले प्राप्तस्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं । यावत् । सकृदागामिफलस्यापि तथा । यावत् । अनागामिफलकाले द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं । यावत् । अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । ओघयोगोपादानानां दृष्टिः, शीलव्रतोपादानं, पश्चिमौ द्वौ कायग्रन्थौ, शीलव्रत [ ९५०a ] परामर्शविचिकित्सावरभागीयसंयोजने, पश्चिमाश् तिस्रो दृष्टयः, दृष्टिविचिकित्सानुशयौ, दृष्टि-परामर्शविचिकित्सासंयोजनानि चापि तथा ॥

त्रयाणाम् अकुशलमूलानां कामास्रवस्य च निरोधसाक्षात्कारकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं । आर्यस्य प्राप्तानागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं । यावत् । अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । ओघयोगोपादानानां कामः, पौर्विकौ द्वौ कायग्रन्थौ, पौर्विकाणि चत्वारि नीवरणानि, [ पंचसंयोजनेषु ] प्रतिघेर्ष्यामात्सर्यसंयोजनानि, पौर्विके द्वे अवरभागीयसंयोजने, घ्राणजिह्वासंस्पर्शजतृष्णाकायौ, कामरागप्रतिघानुशयौ, [ नवसंयोजनेषु ] प्रतिघेर्ष्यामात्सर्यसंयोजनानि चापि तथा ॥

भवास्रवाविद्यास्रवनिरोधसाक्षात्कारकाले प्राप्तार्हत्फलस्य अष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं । ओघयोगानां भवाविद्ये, आत्मवादोपादानं, रागमानसंयोजने, पश्चिमानि चत्वारि ऊर्ध्वभागीयसंयोजनानि, मनःसंस्पर्शजतृष्णाकायः, भवरागमानाविद्यानुशयाः, तृष्णामानाविद्यासंयोजनानि चापि तथा ॥

विचिकित्सानीवरणनिरोधसाक्षात्कारकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं । आर्यस्य मार्गधर्मज्ञाने प्रत्युत्पन्नाभिमुखे ऽष्टानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं । यावत् । स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं । यावत् । सकृदागामिफलस्यापि तथा । यावत् । अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं ।

यावत् । अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

रूपरागनिरोधसाक्षात्कारकाले रूपतृष्णाप्रहाणं। पृथग्जनस्य एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। आर्यस्य त्रयाणाम् अनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

चक्षुःश्रोत्रकायसंस्पर्शजतृष्णाकायानां निरोधसाक्षात्कारकाले ब्रह्मलोकतृष्णाप्रहाणं। केवलं त्रयाणां तृष्णाकायानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

कामधातुकदुःखदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य दुःखधर्मज्ञाने प्रत्युत्पन्नाभिमुखे दशानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हत्फलस्य अष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

कामधातुकसमुदयदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य समुदयधर्म [ 950b ] ज्ञाने प्रत्युत्पन्नाभिमुखे सप्तानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हत्फलस्य अष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

कामधातुकनिरोधदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य निरोधधर्मज्ञाने प्रत्युत्पन्नाभिमुखे सप्तानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥



कामधातुकमार्गदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य मार्गधर्मज्ञाने प्रत्युत्पन्नाभिमुखे ऽष्टानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

कामधातुकभावनाहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य कामतृष्णाप्रहाणे षट्त्रिंशदनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। आर्यस्य प्राप्तानागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

रूपधातुकदुःखदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य रूपतृष्णाप्रहाणे एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। आर्यस्य दुःखान्वयज्ञाने प्रत्युत्पन्नाभिमुखे ऽष्टादशानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। स्रोतआपत्तिफलस्याष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं ॥

रूपधातुकसमुदयदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य रूपतृष्णाप्रहाणे एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। आर्यस्य समुदयान्वयज्ञाने प्रत्युत्पन्नाभिमुखे द्वादशानुशयानां निरोधसाक्षात्कारः, न संयोजन-

प्रहाणं। यावत्। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां [ ९५०c ] निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

रूपधातुकनिरोधदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य रूपतृष्णाप्रहाणे एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। आर्यस्य निरोधान्वयज्ञाने प्रत्युत्पन्नाभिमुखे द्वादशानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

रूपधातुकमार्गदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले पृथग्जनस्य रूपतृष्णाप्रहाणे एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। आर्यस्य प्राप्तस्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

रूपधातुकभावनाहेयानुशयानां निरोधसाक्षात्कारकाले रूपतृष्णाप्रहाणं। पृथग्जनस्य एकत्रिंशदनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। आर्यस्य त्रयाणाम् अनुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

आरूप्यधातुकदुःखदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले दुःखान्वयज्ञाने प्रत्युत्पन्नाभिमुखे ऽष्टादशानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हत्फलस्य अष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥



आरूप्यधातुकसमुदयदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले समुदयान्वयज्ञाने प्रत्युत्पन्नाभिमुखे द्वादशानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

आरूप्यधातुकनिरोधदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले निरोधान्वयज्ञाने प्रत्युत्पन्नाभिमुखे द्वादशानुशयानां निरोधसाक्षात्कारः, न संयोजनप्रहाणं। यावत्। स्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥ [ ९५१a ]

आरूप्यधातुकमार्गदर्शनहेयानुशयानां निरोधसाक्षात्कारकाले प्राप्तस्रोतआपत्तिफलस्य अष्टाशीत्यनुशयानां निरोधसाक्षात्कारः, त्रयाणां संयोजनानां प्रहाणं। यावत्। सकृदागामिफलस्यापि तथा। यावत्। अनागामिफलस्य द्वानवत्यनुशयानां निरोधसाक्षात्कारः, षट्संयोजनानां प्रहाणं। यावत्। अर्हतो ऽष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥

आरूप्यधातुकभावनाहेयानुशयानां निरोधसाक्षात्कारकाले प्राप्तार्हत्फलस्य अष्टानवत्यनुशयानां निरोधसाक्षात्कारः, नवसंयोजनानां प्रहाणं॥०॥ [ साक्षात्कारनिर्देशः परिनिष्ठितः ]॥०॥

इति ज्ञानप्रस्थानस्य द्वितीये संयोजनस्कंधे दश द्वाराणि नाम चतुर्थो निःश्वासः॥

आर्यकात्यायनीपुत्रप्रणीते ज्ञानप्रस्थाननामाभिधर्मशास्त्रे
शुआन्-चुआङ्कृतचीनभाषान्तरात् संस्कृते शांतिभिक्षुणा प्रत्यनूदिते
द्वितीयः संयोजनस्कंधः
परिनिष्ठितः॥

—

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer